ISSN– 2320– 5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य संस्कृताध्ययनविभागस्य शोधपत्रिका)

## पञ्चमः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

मुख्यसम्पादकः

राकेशदाशः

सम्पादकमण्डली

गोपीकृष्णन् रघुः

वेङ्कटरमणभट्टः

नागराजभट्टः

नीरजकुमारभार्गवः

संस्कृतविभागः

रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानम्

वेलुडमठम्

प्रज्ञालोकः
(संस्कृताध्ययनविभागस्य शोधपत्रिका)
*Prajñāloka*
(Research Journal of Department of Sanskrit Studies)

ISSN– 2320– 5911

मुख्यसम्पादकः– राकेशदाशः
सम्पादकमण्डली–
गोपीकृष्णन् रघुः
वेङ्कटरमणभट्टः
नागराजभट्टः
नीरजकुमारभार्गवः
Chief Editor– Rakesh Das
Board of Editors–
Gopikrishnan Reghu
Venkataramana Bhat
Nagaraja Bhat
Neeraj Kumar Bhargave

प्रकाशकः– कुलसचिवः
रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु
Publisher– Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute
Belur Math, Howrah, West Bengal

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०१७
Year of Publishing– 2017

मूल्यम्– ₹ ६०/-
Price– ₹ 60/-

Powered by LaTeX 2ε

# सूचीपत्रम्

| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | i |
| २. | Foreword<br>Swami Atmapriyananda | ii |
| ३ | यास्ककृतनिरुक्तस्य भाषातात्त्विकं समीक्षणम्<br>उज्ज्वलकर्मकारः | १ |
| ४ | भगवद्गीतोक्तसामानाधिकरण्यविमर्शः<br>उमेशनेपालः | १५ |
| ५ | मण्डनमिश्राभिमताख्यातार्थविमर्शः<br>नीरजकुमारभार्गवः | २२ |
| ६ | नित्यकर्मविषये अद्वैतिनां सिद्धान्तः<br>सुदीप्तदे | ३१ |
| ७ | शाङ्कराद्वैते समाधिविमर्शः<br>त्रिदिवरायमण्डलः | ३५ |
| ८ | साङ्ख्यदृष्ट्या प्रकृतिविमर्शः<br>अनिलप्रतापगिरिः | ४३ |
| ९ | पातञ्जले चित्तभूमेरुपयोगः<br>ध्रुवज्योतिभट्टाचार्यः | ४७ |
| १० | बौद्धनिकाये प्रमाणम्<br>टिना-घोषः | ६० |
| ११ | बुद्धचरितदिशा बौद्धमतेष्वनीप्सिततत्त्वानां खण्डन-<br>विमर्शः<br>सुजितमाइतिः | ६९ |

| | | |
|---|---|---|
| १२ | सर्वादीनि सर्वनामानि<br>जगदीशभट्टः | ७५ |
| १३ | अधिवेदं निपातनप्रसङ्गः– एकं समीक्षात्मकम् अध्ययनम्<br>श्रीमन्त-चट्टोपाध्यायः | ८५ |
| १४ | स्थानेऽन्तरतमः इति सूत्रस्य महाभाष्यदिशा न्यासान्तरविचारः<br>मलय पोडे | ९५ |
| १५ | मेदिनीपुरमण्डले संक्षिप्तस्यसारस्य अनुशीलनम्<br>देवाञ्जन-दासः | १०२ |
| १६ | चक्रपाणिविजये विशिष्टशब्दानां व्याकरणविचार-विमर्शः<br>जयकृष्णः | १०८ |
| १७ | पूर्वत्रासिद्धम्– अध्ययनमेकम्<br>अनुपकुमारखानः | ११४ |
| १८ | कर्मस्वरूपम्<br>जयदेवदिण्डा | १२२ |
| १९ | आदेशागमलोपपरिपूरकाणां<br>हरिनामामृतव्याकरणगतसंज्ञानां विमर्शः<br>नित्यानन्दमान्ना | १३६ |
| २० | संस्कृतदृश्यकाव्यवर्णनधारा तथा तस्याः विवर्तनम्<br>विप्लवचक्रवर्ती | १४४ |
| २१ | भारतीयसंस्कृतौ विवाहसंस्कारः<br>अनन्यासरकारः | १५० |
| २२ | तारापदभट्टाचार्यस्य कथाद्वादशः विहङ्गावलोकनम्<br>प्रणवकुमारवरः | १६२ |

| | | |
|---|---|---|
| २३ | वैश्विकसंहतिकरणे अनुवादस्य गुरुत्वम्– संस्कृत-साहित्यालोके<br>मौमितावरः | १७३ |
| २४ | एकशरणनामधर्मः– एका समीक्षा<br>जयदेवदे | १८० |
| २५ | सामाजिकदुष्कृतीनां निवारणार्थं मूल्यशिक्षायाः प्रयोजनम्<br>एस.टि.पि.कनकवल्ली | १९७ |
| २६ | विष्णुपुराणे परिवेशभावना<br>चिरञ्जित मण्डल | २०३ |

# निवेदनम्

अनन्तकोटिब्रह्माण्डनायकस्य अकलितगुणगणविभूषितस्य श्रीभगवतः असीमकरुणया प्रज्ञालोकाख्या इयं पत्रिका पञ्चभ्यो वर्षेभ्यः प्राकाश्यं गच्छन्ती विदुषां मोदावहा भवतीति नितरां मोमुद्यामहे वयम्। ईश्वरस्य करुणया तथा विदुषाम् आशीर्वादेन पत्रिकेयं विश्वविद्यालयानुदानायोगस्य अधिकृतसूच्याम् अपि प्रविष्टा। तत्र सूच्यां ४९१९१ सङ्ख्या इयं पत्रिका निर्दिष्टा। संस्कृतविषयस्य पत्रिकाणां सूच्यां च पञ्चपञ्चाश्या अनया पत्रिकया भूयते।

विविधप्रसङ्गेषु देशस्य विविधेषु स्थानेषु स्थितानां विदुषां मुखाद् अस्याः पत्रिकायाः श्लाघां शृण्वद्भिः अस्माभिः सातिशयं प्रेरणा समुपलभ्यते अस्मिन् कर्मणि अग्रे वर्तितुम् इति महत् प्रमोदस्थानम् अस्माकम्। देशस्य विविधकोणेषु विद्वांसः इमां पत्रिकां पठन्ति इति जानद्भिः अस्माभिः पत्रिकायाः कार्यभारनिर्वहणे अधिकम् अवधानं देयमित्यपि स्खलनभीतिरपि उद्वेजयति मानसम्। तथापि यत्ने कृते यदि न सिध्यतीति अभियुक्तोक्तिं स्मारं स्मारम् अग्रे सारयाम इदं कार्यम्। तत्र विदुषाम् आशिषः पाथेयं भूयासुर्न इति सप्रश्रयं प्रार्थयामहे।

पत्रिकाया अस्मिन् अङ्के चतुर्विंशतिः लेखाः सन्ति। निःसङ्कोचम् इदं वदामो यत् केचन लेखाः पत्रिकाणां स्तरानुगुणाः न सन्ति किन्तु ते नवीनानां गवेषकाणां परिश्रमेण उद्भूताः इति नवीनेभ्यः अवकाशं प्रदद्म इति किञ्चित् शैथिल्यम् अस्माभिः अस्मिन् विषये प्रदर्शितम्।

पत्रिकायाः प्रकाशनार्थं नियतम् अस्मान् प्रोत्साहितवद्भ्यः सम्माननीयकुलपतिभ्यः, पत्रिकायाः प्रकाशकेभ्यः विश्वविद्यालयस्य माननीयकुलसचिवेभ्यः, पत्रिकायाः टङ्कनकार्ये अक्षरपरिष्कारादिकार्ये च साह्यम् आचरितवद्भ्यः अस्माकं विभागस्य शोधच्छात्रेभ्यः, संस्कृताध्ययनविभागस्य समायोजकेभ्यः स्वामिजपसिद्धानन्देभ्यः, मुद्रकेभ्यः, सर्वेभ्यः प्राबन्धिकेभ्यः च वयं सविनयं धन्यवादं वितरामः अस्मिन् प्रसङ्गे। सम्पादनकर्मणि विशेषतः साहाय्यम् आचरितवते शोधच्छात्राय जयदेवदिण्डामहोदयाय विशेषतः कार्तज्ञ्यं निवेदयामः।

भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः।

सम्पादकाः

Ramakrishna Mission Vivekananda Educational and Research Institute
(Deemed to be University)
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

ॐ वाङ्मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविराविर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासिनीरनेनाधीतनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः ॥

Om. May my speech be established in the mind, and in turn let my mind be established in speech. O Self-effulgent Brahman (the Supreme Being)! Reach me through and through! May my speech and mind be capable of revealing to me the inner meaning of the Vedic mantras. Let my learning never leave me [but be a constant source of inspiration and guidance]. May I be attuned day and night to the spirit of the Holy Scriptures that I have learnt. May I be truthful in speech and in thought. May the Supreme Being (Brahman) protect me (the disciple). May Brahman protect my teacher. [I repeat,] may He protect me and protect my teacher. May He protect my teacher. Om Peace, Peace, Peace!

The present issue of our Research Journal *Prajñāloka* of the Department of Sanskrit Studies, which has since been rechristened as the Department of Sanskrit and Philosophy with enlarged scope of academic achievement, under the School of Indian Heritage, Ramakrishna Mission Vivekananda Educational and Research Institute, is now being published after some delay.

It was to have been published on the occasion of the University Foundation Day on 4 July 2017. This journal, as mentioned in my Foreword to an earlier issue, is a reverential attempt to worship surabharati by our faculty of the Department of Sanskrit Studies. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. May Surabharati Medhadevi Vagdevi Saraswati illumine our hearts by making them Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, *Prajñāloka*, is the humble prayer of



Belur Math
30 August 2017

Swami Atmapriyananda
Vice Chancellor

# यास्ककृतनिरुक्तस्य भाषातात्त्विकं समीक्षणम्

उज्ज्वलकर्मकारः*

## भूमिका

भाषा हि नित्यगतियुक्ता, काले काले तस्याः स्वरूपं परिवर्तते। स्थानकालभेदाद् ध्वनिगतेन रूपगतेन अर्थगतेन वाक्यगतेन च परिवर्तनेन एका हि भाषा तद्भाषाभाषिभिः अपि प्रयत्नबोध्या भवति। तस्याः खलु प्रवहमानाया भाषायाः स्थानकालभेदाद् किंचिद् भाषान्तरम् उद्भवति। बह्वीनां सदृशीनां विसदृशीनां च भाषाणां ध्वन्यादितत्त्वस्य विश्लेषणेन तासां भाषाणां स्वरूपख्यापनं तथा उत्ससन्धानं हि भाषातत्त्वस्य चर्चितो विषयः। भाषासु वैदिकभाषा सुप्राचीना, काले काले सापि दुर्बोध्या अभवत्। जनानां कृते वैदिकभाषाया बोधसौकर्यार्थं तद्भाषाविदो यथा बहुप्रयत्नं कृतवन्तः तथा सहायकानि शास्त्राणि समुद्दिष्टवन्तः। अस्याः प्राचीनभाषाया अवबोधकेषु सहायकशास्त्रेषु शिक्षा निरुक्तं व्याकरणम् इत्यादीनि वेदाङ्गानि सुप्रसिद्धानि। षड्वेदाङ्गेषु निरुक्तव्याकरणे वेदार्थज्ञापके भवतः, व्याकरणं प्रकृति-प्रत्ययविश्लेषणेन शब्दान् व्युत्पादयति, तत्र सामान्येन शब्दानां व्युत्पत्त्यनन्तरमेव अर्थः अधिगम्यते। निरुक्तं तु अर्थं विशेषतया वर्णयन् अर्थवशेन शब्दानां प्रवृत्तिनिमित्तं निष्पादयति। लोके तु यादृशानि अर्थवैशिष्टानि उपजीव्य शब्दः प्रवर्तते तादृशेषु अर्थेषु शब्दस्य निष्पादनं हि प्रवृत्तिनिमित्तम्। अतः शब्दानुशासनपरकं शास्त्रं व्याकरणं, निरुक्तं तु अर्थानुशासनपरकं शास्त्रम्।[१] तत्र निरुक्ते वेदप्रयुक्तानां पदानाम् अर्थज्ञानकरं निर्वचनं लभ्यते। ते खलु नैरुक्ताः पदनिरुक्तिकाले सर्वेषां पदानां मूलभूतत्वेन एकामपि क्रियाम् आश्रयन्ति इति दृश्यते। रूढी योगरूढी चेति पदयोः आदिभूतस्य आख्यातस्य निर्देशनेन शब्दानां निर्वचनानां प्रदर्शनं हि निरुक्तशास्त्रस्य चर्चितो विषयः।

## निरुक्तशास्त्रस्य सामान्यमध्ययनम्

प्राचीनकाले वेदार्थबोधे साहाय्यार्थं बह्व्यः व्याख्यारीतयः प्रचलिता आसन्। तासु प्राचीनतमासु रीतिषु मन्त्रगतपदाश्रिता अर्थनिर्वचनरीतिः अन्यतमा।

---

*शोधच्छात्रः, संस्कृतविभागे, कलिकाताविश्वविद्यालयस्य

[१]अनिर्वाणः, वेदमीमांसा (वैदिकसाहित्यम्), पृ.३४७

इमां निर्वचनरीतिं समाश्रित्य अधुनापि उपलभ्यमानः प्राचीनः प्रामाणिको ग्रन्थः खलु यास्कपादैः विरचितः निरुक्तनामधेयः। द्वादशाध्यायात्मकस्य अस्य ग्रन्थस्य नैघण्टुकः, नैगमः, दैवतश्चेति काण्डत्रये निघण्टुः इत्याख्ये वैदिकशब्दकोषे पठितस्य गवादिदेवपत्न्यन्तशब्दसमाम्नायस्य निर्वचनं लभ्यते। निघण्टुकोषे अपठितानां बहूनां शब्दानामपि अर्थज्ञानकरं निर्वचनं निरुक्ते लभ्यते। वैदिकशब्दानां निर्वचनावसरे षट्-शत-ऋङ्मन्त्राणां व्याख्या क्रियते निरुक्तकृता इति वेदव्याख्यातृप्रवरः अनिर्वाणः विशदयति। तत्रभवता निरुक्तकारेण यास्कपादेन स्वकीये निरुक्तग्रन्थे औपमन्यवः, और्णवाभः, कात्थक्यः, गार्ग्यः, शाकपुणिः इत्येतेषां चतुर्दशपूर्वाचार्याणां नाम समुल्लिख्यते।[३] तेन स्थलेषु तेषां मतं निराक्रियते स्थलेषु च श्रद्धया समर्थ्यते। ब्राह्मणग्रन्थेष्वपि बहूनां मन्त्रगतानां पदानां निर्वचनं समाम्नायते।[४] अतो वेदव्याख्याया अस्या रीत्याः प्राचीनत्वं स्पष्टमेव अवबुध्यते। परन्तु यास्ककृतं निरुक्तम् ऋते अन्यस्य कस्यापि पूर्वाचार्यस्य निरुक्तशास्त्रम् अधुना नोपलभ्यते।

## यास्काचार्यस्य पदनिर्वचनशैली

नाम, आख्यातम्, उपसर्गः, निपातश्चेत्येतैः भेदैः पदानां चतुर्विधत्वं निरुक्तशास्त्रे प्रपञ्चितम्। एतेषां मध्ये नामपदानाम् आख्यातजत्वं नैरुक्तैः स्वीकृतम् इति पूर्वमेवोक्तम्। निर्वचनरीत्यां शब्दास्तु त्रिविधाः, ते यथा– प्रत्यक्षवृत्तिपरकाः, परोक्षवृत्तिपरकाः, अतिपरोक्षवृत्तिपरकाश्चेति। उच्चारणमात्रेणैव येषां पदानां मूलभूतस्य धातोः साक्षादुपलब्धिर्भवति तानि प्रत्यक्षवृत्तिपरकाणि पदानि। प्रत्यक्षवृत्तिपरकाणां पदानां स्वरसंस्कारादेव शब्दगतस्य आख्यातस्य ज्ञानं भवति। अतः निरुक्ते पाचको हारकः इत्येतेषां प्रत्यक्षवृत्तिपरकाणां पदानां निर्वचनं न क्रियते। येषां च पदानां स्वरसंस्काराद् एव तन्मूलगतस्य धातोः प्रतीतिर्न भवति परन्तु अर्थसाम्याद् यत्र तद्धातुः अनुमीयते, तानि खलु पदानि परोक्षवृत्तिपरकाणि। एतेषां परोक्षवृत्तिपरकाणां पदानाम् अर्थसामान्येन निर्वचनं कार्यम्। यथा दुग्धवाचकस्य पक्वम् इत्यस्य शब्दस्य व्याकरणानुसारं यस्य पाकः पूर्वम् एव अभवद् इत्येतादृशः अर्थः गृह्यते। अत्र पक्वपदेन साक्षाद् दुग्धस्य प्रतीतिर्न

---

[३] तदेव

[४] तदेव

भवति। अतः अत्र धातुगतेन अर्थसामान्येन शब्दस्यास्य निर्वचनं क्रियते– पक्वं दुग्धं तद्धि भुज्यते। तानि हि पदानि अतिपरोक्षवृत्तिपरकाणि येषां मूलभूतस्य धातोरुपलब्धिः साक्षाद् न भवति नापि तद् अनुमीयते। तर्हि तत्र कथं निर्वचनं सम्भवति? अत्रोच्यते– अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्नित्येव न निर्ब्रूयान्न संस्कारमाद्रियते[५] इति। धातुप्रत्ययगतां व्युत्पत्तिं नादृत्य स्वरव्यञ्जनयोः साम्यविधानेन अतिपरोक्षवृत्तिपरकाणां पदानां निर्वचनं कार्यम्। यथा उदरवाचको जठरशब्दो वर्णसामान्येन जग्धपदाद् निष्पाद्यते, जग्धं भक्षितम् अन्नम् अस्मिन् ध्रियते प्रक्षिप्यते इति शब्दस्यास्य प्रवृत्तिनिमित्तम्।

## वैयाकरणानां धात्वर्थाश्रयी हि यास्काचार्यस्य पदनिरुक्तिः

यद्यपि निरुक्तव्याकरणे स्वतन्त्रे द्वे वेदाङ्गे, परन्तु ते निरुक्तव्याकरणे परस्परे सम्पृक्ते भवतः। निरुक्तं हि सामान्येन व्याकरणानुसारि। तत्रभवतो यास्काचार्यस्य वैदिकपदानाम् अर्थज्ञानकरी निरुक्तिरपि वैयाकरणानां प्रसिद्धानां धात्वर्थानाम् अनुसारिणी। तथाहि एकस्यैव जातवेदा इत्येतस्य शब्दस्य विद्-धातोः अर्थवैचित्र्याद् बहुधा निर्वचनं क्रियते यास्कपादेन[६]–

| जातवेदस् | धात्वर्थः | तत्र प्रवृत्तिनिमित्तम् | व्युत्पत्तिः |
|---|---|---|---|
| जात + विद् | ज्ञानार्थकः विद्-धातुः | जातानि सर्वाणि भूतानि सः (अग्नेरभिमानी देवः) जानाति वेत्ति वा | जात– विद् + असि (कर्तरि) |
| जात + विद् | ज्ञानार्थकः विद्-धातुः | जातानि सर्वाणि भूतानि एनं (अग्नेरभिमानिनं देवं) विदन्ति। | जात– विद् + असि (कर्मणि) |
| जात + विद् | सत्तार्थकः विद्-धातुः | जातेषु भूतेषु स परमात्मरूपेण तिष्ठति। | जात– विद् + असि (कर्तरि) |

[५]नि. (२/१/१/४)

[६]जातानि वेद जातानि वैनं विदुः जाते जाते विद्यत इति वा जातवित्तो वा जातधनः जातविद्यो वा जातप्रज्ञानः। तत्रैव (७/१९/२) यत्तज्जातः पशून्विन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणं तस्मात् सर्व्वान् ऋतून् पशवोऽग्निमभिसर्पन्तीति च। तत्रैव (७/१९/४)

| | | | |
|---|---|---|---|
| जात + विद् | लाभार्थकः विद्-धातु | सः अग्निदेवः जातः सन् पशून् विन्दते तथाहि स जातवेदः | जात– विद् + असि (कर्तरि) |

इत्थं जातवेदा इत्यस्य पदस्य व्याकरणगतां व्युत्पत्तिं नादृत्य बह्वर्थकात् विद्-धातोः पदस्यास्य बहुधा निर्वचनं प्रदर्शितम्। व्याकरणप्रसिद्धः धात्वर्थो यद्यपि पदनिरुक्त्यां प्राधान्येन आश्रियते निरुक्तकृता, तथापि तस्य एव निरुक्तियोग्यस्य पदस्य लोके यादृशानि अर्थवैशिष्ट्यानि प्रसिद्धानि तानि एव वैशिष्ट्यान्यपि तेन आद्रियन्ते। वैयाकरणानां व्युत्पत्त्यनुसारेण एकस्मादेव दिव्-धातोः अचि प्रत्यये कृते देवः इति शब्दः सिध्यति। परन्तु लोकप्रसिद्धार्थानुरोधेन यास्काचार्यः तस्यैव देवशब्दस्य नानार्थकेभ्यो नानाधातुभ्यो निर्वचनं कृतवान्–

| धातुः | धातुः धात्वर्थश्च/शब्दार्थः | तत्र प्रवृत्तिनिमित्तम् |
|---|---|---|
| दा> | दानार्थको दाधातुः | देवा धनानि प्रयच्छन्ति ददति वा। |
| दीप/द्युत् | दीप्त्यर्थको दीप्-धातुः। समानार्थकः द्युत्-धातुः | तेजस्विनो देवा आत्मतेजसा वस्तूनि दीपयन्ति द्योतयन्ति वा। |
| दिव्> | स्वर्गवाचको हि दिव्-शब्दः | ते खलु देवा दिवि तिष्ठन्ति। |

एवं लोकप्रसिद्धार्थानुरोधेन एकस्यैव देवशब्दस्य बहुभ्यो धातुभ्यो निर्वचनं प्रदीयते, तत्र यद्यपि वैयाकरणा एकस्मादेव द्योतनार्थकाद् दिव्-धातोः देवशब्दस्य व्युत्पत्तिम् उपदिशन्ति। पदानां निर्वचनाय यास्काचार्यः शब्दगतस्य आख्यातस्य ग्रहणे विधिनिषेधौ न प्रत्यारोपितवान्। स लौकिकेभ्यो धातुभ्यो वैदिकानां पदानां तथा वैदिकेभ्यो धातुभ्यो लौकिकानां पदानां निर्वचनं स्वीकृतवान्।[७] लौकिकधातोः वैदिकशब्दस्य निर्वचनं यथा दम्-धातोः दमूनस् (दमूनाः), संसिद्ध्यर्थकात् साध्-धातोः क्षेत्रसाधस्>क्षेत्रसाधयितारम्। वैदिकधातोः लौकिकशब्दस्य निर्वचनं यथा–दाहार्थकाद् उष् धातोः उष्णं, क्षरणदीप्त्यर्थकात् घृ-धातोः घृतम्।

तत्र पाणिनीयधातुपाठे 'दमु उपशमे' तथा 'दम्भु दम्भने' इति धातुद्वयस्य पाठो दृश्यते। ऋग्वेदसंहितायां जुष्टो दमूना अथितिर्दूरोण[८] इत्यादेः मन्त्रगतस्य

[७]देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा,तत्रैव (७/१५/६)

[८]ऋक्संहिता ५/४/५

दमूना इत्यस्य पदस्य व्याख्यावसरे तत्रभवान् सायणाचार्यः उक्तवान्– दमूनाः दानमना दान्तमना वा इति। अत्रोच्यते दम्-धातोः दम्भनार्थः तु पाणिनीये धातुपाठे प्रसिद्धः परन्तु दानार्थो लौकिके न दृश्यते।

## निरुक्ते तौलनिकस्य भाषातत्त्वस्य निदर्शनम्

ध्वनिविज्ञानं (Phonology), रूपविज्ञानं (Morphology), अर्थविज्ञानं (Semantics) तथा वाक्यविज्ञानं (Syntax) चेति आधुनिकभाषाविज्ञानस्य मुख्यं शाखाचतुष्टयम्। ध्वनेः उत्पत्तिः विकाशः परिवर्तनं च ध्वनिविज्ञानस्य अध्ययनशास्त्रम्। रूपविज्ञाने तु पदानां भेदः, तेषां निष्पत्तिप्रक्रिया अधीयते, अर्थविज्ञानं तु पदानाम् अर्थज्ञापनपरकं शास्त्रं, पदविन्यासव्यवस्था हि वाक्यविज्ञानम्। वाक्यविज्ञानम् ऋते ध्वनिविज्ञानादिभिः त्रिभिः आधुनिकैः विषयैः सह प्राचीनानां शिक्षा, व्याकरणं, निरुक्तं, न्यायदर्शनं, मीमांसादर्शनम् इत्येतेषाम् एव वियषाणां सादृश्यं परिलक्ष्यते।

तुलनात्मके भाषाविज्ञाने बह्वीनां सदृशीनां विसदृशीनां वा भाषाणां सादृश्यं वैसादृश्यं च आलोच्यते। निरुक्तकारस्य नये तु केवलम् एकस्मादेव भाषावंशजातं भाषाद्वयम् अवर्त्तत। तत्र एका ग्रन्थबद्धा वैदिकभाषा एका तु लोकप्रचलिता लौकिकभाषा। तत्र काचित् भिन्नरूपगताः प्राकृतादयः उपभाषा अपि अवर्त्तन्त। एतासाम् एव भाषाणां रूपगतवैचित्र्यं (morphological variation) निरुक्तकृता परिदृष्टं पर्यालोचितं च। देशान्तरेण एकस्या एव भाषायाः कुत्रचित् धातोः प्रकृतिरूपम् अर्थात् तिङन्तम् आख्यातरूपं लोकप्रचलितम् आसीत् कुत्रचिद् वा तद्धातुजातं विकृतरूपं नामपदं प्रचलितमासीत् इति निरुक्तकारस्य अभिमतम्– अथापि प्रकृतयः एवैकेषु भाष्यन्ते विकृतय एकेषु शवतिर्गतिकर्मा कम्बोजष्वेव भाष्यते,[९] यथा गत्यर्थकात् शव्-धातोः निष्पन्नं शवति इति तिङन्तरूपं कम्बोजः[१०] इत्याख्ये देशविशेषे भाषाव्यवहारे प्रयुज्यते, आर्येषु शव्-धातुजातं शवः इति नामपदं प्रयुज्यते– विकारमस्यार्य्येषु भाषन्ते शव इति। तत्रोदाहरणान्तरं छेदनार्थकाद् दा-धातोः निष्पन्नम् आख्यातरूपं प्राच्येषु लोकव्यवहारे प्रयुज्यते। व्रीहीन् दाति, यवान् दाति इत्यादि रूपम्। परन्तु उदीच्येषु तद्धातोः समुद्भूतं

[९]नि.भा. २/१/२/८

[१०]कम्बोजा नाम उत्तरापथे क्वचिज्जनपदाख्या मद्रादिवत् इति स्कन्दस्वामी, नि.भा. (२/१/२/८)

नामपदं दात्रम् (येन छिद्यते) इति रूपं लोके व्यवहृयते। इत्थं स्थानभेदात् एकस्यैव शब्दस्य स्वरूपवैचित्र्यं निरुक्तकृता स्वीकृतम्। अपि च, विषयोऽयं तेनैव प्रथममेव आविष्कृतः। अत उच्यते यत् तुलनामूलकस्य भाषाविज्ञानस्य निदर्शनं हि निरुक्ते शास्त्रे लभ्यते।

## ध्वनिविज्ञानस्य निरुक्ते प्रसक्तिः

प्राचीने शिक्षाशास्त्रे प्रातिशाख्यशास्त्रे च वर्णानाम् उच्चारणस्थानं तथा सन्ध्यादौ तेषां विकारादयश्च पर्यालोचिताः। संस्कृतभाषायां परिमाणात्मकः (Quantitative) स्वरविकारः परिलक्ष्यते। उच्चारणस्थानसाम्यं हि एतादृशस्य स्वरविकारस्य भित्तिभूमिः। पाणिनिना सम्मतानि गुण-वृद्धि-सम्प्रसारणानि हि परिमाणात्मकः स्वरविकारः–

| | | | |
|---|---|---|---|
| प्रथमः क्रमः (reduced grade) > | इ > | उ > | ऋ > |
| द्वितीयः क्रमः (normal grade) (गुणः) | ए | ओ | अर् |
| तृतीयः क्रमः (lengthened grade) (वृद्धिः) | ऐ | औ | आर् |

| | | | | |
|---|---|---|---|---|
| प्रधानः क्रमः | य् > | व् > | र् > | ल् > |
| परिमाणात्मकः विकारः (संप्रसारणम्) | इ | उ | ऋ | ऌ |

निरुक्तकारो ध्वनिपरिवर्तनस्य एतैः नियमैः सह परिचितः आसीत्। परन्तु स केनापि नाम्ना तान् नियमान् विधिबद्धान् न कृतवान् इति तत्रभवतः सिद्धेश्वर-वर्माचार्यस्य अभिमतम्।[११] तत्र निरुक्ते एतेषां वर्णविकाराणां प्रयोगस्य निदर्शनम्–

| | | | |
|---|---|---|---|
| गुणः | इ >ए | उ >ओ | ऋ >अर् |
| | शिष्>शेवः (सुखनाम)[१२] | घुष्>घोषः (स्तुत्यर्थकः)[१३] | कृ>कर्मन् (क्रियावाचकः)[१४] |

[११]Yāska has not formally formulated the phonetic principles on which his etymologies based. Varma, Siddheshwar, *The Etymologies of Yāska*, p.10.

[१२]शेव इति शुखनाम शिष्यतेर्वकारो नामकरणोऽन्तस्थान्तरोपलिङ्गी, नि. (१०/१७/२)

[१३]घोषो घुष्यते, तत्रैव (९/९/४)

[१४]कर्म्म कस्मात् क्रियत इति सतः, तत्रैव (३/१/२)

| | | | |
|---|---|---|---|
| वृद्धिः | इ >ऐ | उ>औ | ऋ >आर् |
| | विश्वानर> वैश्वानर (विश्वनरस्य नेता)[१५] | उशिज्>औशिज (उशिजः पुत्रः)[१६] | ऋष्टिषेण>आर्ष्टिषेण (ऋष्टिषेणस्य पुत्रः)[१७] |
| सम्प्रसारणम् | य>इ | व >उ | र>ऋ |
| | | वश्>उशिक् (मेधावी)[१८] | म्रद>मृदु[१९] |

तत्र शिष्-धातोः शेव इत्यस्य शब्दस्य निर्वचने विकल्पेन गुणविधानं कृतवान् निरुक्तकारः। अतः गुणे कृते शेव इति पदं, गुणाभावे शिव इति पदं सिध्यति– विभाषितगुणः शिवमित्यप्यस्य भवति।[२०] सम्प्रसारणविषये निरुक्ते ध्वनितं– तद् यत्र स्वरादनन्तरान्तस्थान्तर्धातुर्भवति तद्विप्रकृतीनां स्थानमिति प्रदिशन्ति।[२१] स्वरवर्णे पूर्वस्मिन् परस्मिन् वा स्थिते अन्तःस्थावर्णानां सम्प्रसारणे तदभावे वा एकः एव धातुः द्विविधस्य शब्दस्य कारणं स्थानं वा भवति। तद्यथा–

| धातुः | सम्प्रसारणे कृते | सम्प्रसारणाभावे |
|---|---|---|
| यज् > | इष्टः | यष्टा |
| वप् > | उप्तः | वप्ता |

अतः स्वरविकारस्य पूर्वोक्ताः विषयाः निरुक्तकारेण अभिज्ञाताः।

निरुक्तस्य द्वितीयाध्याये यास्काचार्येण पदानां निर्वचनार्थं ध्वनिपरिवर्तनस्य बहवः नियमाः निर्दिष्टाः। आधुनिके भाषाविज्ञाने द्विविधं ध्वनिपरिवर्तनं स्वीक्रियते– स्वयमुत्पन्नं (unconditional) परोत्पन्नं (conditional) चेति

[१५]विश्वान् नरान्नयति विश्व एनं नरा नयन्तीति वा अपि वा विश्वनरा एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वनरा, तत्रैव (७/२१/२)

[१६]कक्षीवान् कक्ष्यावानौशिज उशिजः पुत्रः उशिग् वष्टेः कान्तिकर्म्मणः, तत्रैव (६/१०/३)

[१७]आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा, तत्रैव (२/१/११/२)

[१८]तत्रैव (६/१०/३)

[१९]तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारुमिति, तत्रैव (२/१/२/५)

[२०]तत्रैव (१०/१७/२)

[२१]तत्रैव (२/१/२/३)

ध्वनिपरिवर्तनम्। स्वयमुत्पन्नं ध्वनिपरिवर्तनं केनचिदपि नियमानुसारेण न भवति तत् खलु भाषायाः प्रवहमानत्वात् स्वत एव घटते। परन्तु परोत्पन्नं ध्वनिपरिवर्तनं शारीरवृत्तीयस्य (physiological) तथा श्रवणेन्द्रियस्य (acoustic) वैचित्र्यवशात्, सादृश्यवशात् (analogy), स्वरघातवशात् (accent), भौगलिकप्रभावाच्च सम्भवति। यास्काचार्यः वैदिकपदानां निर्वचनकाले एतयोः उभययोः ध्वनिपरिवर्तनयोः उदाहरणं प्रदत्तवान्। तत्र गुणवृद्धी सम्प्रसारणं च परिमाणात्मकं ध्वनिपरिवर्तनं परोत्पन्नम् (conditional)। परन्तु जगम् + अतुस् >जग्मतुः, जगम्+ उस् >जग्मुः इत्यादिषु स्थलेषु उपोधायाः लोपः स्वाभाविक एव (unconditional)।

आधुनिके भाषाविज्ञाने ध्वनिपरिवर्तनस्य बहूनां नियमानां रूपसम्पत्तिः निरुक्ते सङ्गच्छते। तदत्र संक्षेपेण प्रदर्श्यते–

१. आदिध्वनिलोपः (aphesis)– शब्दगतस्य कस्यचित् स्वरस्योपरि श्वासाघातप्राबल्येन आदिभूतस्य स्वरस्य लोपो जायते तत् खलु भाषातत्त्वे आदिस्वरलोपो आदिध्वनिलोपो वा इत्युच्यते। अस्यैव विषयस्य निरुक्ते दृष्टान्तः– अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति इति।[२२] अस्>स्तः, सन्ति। अत्र अस्-धातोः आदिभूतस्य स्वरस्य लोपो जातः।

२. अन्त्यध्वनिलोपः (apocope)– पूर्ववर्तिनः श्वासाघातस्य प्रभावेन पदान्तस्थितायाः ध्वनेः लोपः हि अन्त्यध्वनिलोपः। एतस्मिन् विषये निरुक्ते उक्तम्– अथाप्यन्तलोपो भवति गत्वा गतमिति इति।[२३] उदाहरणं यथा– गम् +त्वा >गत्वा, गम् + त >गत। उभयत्र अन्त्यस्थितस्य म्-कारस्य लोपः जायते।

३. मध्यस्वरलोपः (syncope)– आद्यक्षरे श्वासाघातवशाद् यदा शब्दमध्यवर्तिनः स्वरस्य लोपो भवति, तदा तं मध्यस्वरलोपो मध्यध्वनिलोप इत्यभिधीयते। निरुक्तकारो विषयोऽयम् अपि ग्रन्थबद्धं कृतवान्– अथाप्युधालोपो भवति जग्मतुर्जग्मुरिति।[२४] जगम्+अतुस् >जग्मतुः, जगम्+ उस् >जग्मुः इत्यादिषु स्थलेषु जगम् -इत्यस्य शब्दस्य उपधाभूतस्य अकारस्य लोपो जायते।

४. समीकरणम् (assimilation)– वर्णान्तरस्य प्रभावेन वर्णान्तरस्य विकारो

---

[२२]तत्रैव (२/१/१/८)

[२३]तत्रैव (२/१/९)

[२४]तत्रैव (२/१/१/१०)

हि समीकरणम्। तत्र प्रभावप्रभावितयोः द्वयोः एव वर्णयोः विकारः जायते। यास्काचार्य इममेव विषयम् आदिविपर्ययः इत्यादिरूपेण समुपन्यस्तवान्– अथाप्यादिविपर्ययो भवति ज्योतिर्घनो बिन्दुर्वाट्य इति।[२५] वर्णानन्तरस्य प्रभावेण एतत् खलु सम्भवति– अथाप्यादिव्यापत्तिर्भवति। व्यापत्तिर्विकारो वर्णान्तरेण इति स्कन्दस्वामी। उदाहरणं यथा– द्युत् >ज्योतिः, हन् >घनः, भिद् >बिन्दु, भट्>वाट्य इत्यत्र प्रत्येकं धातूनाम् आदिभूतस्य वर्णस्य विकारः जातः।

५. वर्णविपर्यासः (metathesis)– आधुनिके भाषातत्त्वे पदगतयोः ध्वन्योः पारम्पर्येण स्थानपरिवर्तनं तथा स्थितिपरिवृत्तिः हि वर्णविपर्यास इत्युच्यते। एतस्मिन् विषये निरुक्ते ध्वनितम्– अथाप्याद्यन्तविपर्य्ययो भवति स्तोका रज्जुः सिकतास्तर्क्विति।[२६] निरुक्तकारस्य मते स्तोकः, रज्जुः, सिकताः, तर्कुः इत्यादीनि पदानि वर्णविपर्यासेन सम्भवति। सृज् >स-र्-ज् >र्-स-ज् >र्-ज्-ज् +उ >रज्जु ( अत्र आद्यन्यवर्णविपर्यासेन रज्जुः इति पदं सम्भवति।)

६. मध्यस्वरागमः वा स्वरभक्तिः (anaptyxis)– संयुक्तानां वर्णानाम् उच्चारणस्य लाघवार्थं यदा स्वरक्षेपणेन संयुक्तवर्णः विभ्यज्यते तदा ताम् एव प्रक्रियां भाषाविज्ञाने स्वरभक्तिः इत्युच्यते। उल्लिख्यते अत्र व्यञ्जनानामपि आगमः भवितुमर्हति। प्रक्रिया इयं निरुक्ते वर्णोपजन इत्याख्यायते– अथापि वर्णोपजन आस्थद्द्वारो भरूजेति।[२७] अस् >आस्थत्, वृ >द्वारः, भ्रसज् >भरूजः। अत्र आस्थत् इत्यत्र थ-कारस्य, द्वारः इत्यत्र द-कारस्य, भरूजः इत्यत्र उ-कारस्य आगमः जातः।

७. अल्पप्राणीकरणम् (deaspiration)– शब्दगतस्य कस्यचिद् महाप्राणवर्णस्य अत्र अल्पप्राणवर्णरूपेण विपरिणामः भवति। तत्र निरुक्ते अल्पप्राणीकरणस्य उदाहरणम्– भृ/भिद् >बिल्व।बिल्वं भरणाद्वा भेदनाद्वा इति।[२८] अत्र वर्गीयः चतुर्थवर्णः (महाप्राणवर्णः) तृतीयवर्णरूपेण (अल्पप्राणरूपेण) विपरिणमते।

आधुनिकध्वनिविज्ञाने स्वीकृतानां बहूनामेव नियमानां लक्षणसंगतिः निरुक्ते एव जायते।

---

[२५]तत्रैव (२/१/१/१४)

[२६]तत्रैव (२/१/१/१५)

[२७]तत्रैव (२/१/२/२)

[२८]तत्रैव (१/३/३/११)

## रूपविज्ञानस्य निरुक्ते प्रसक्तिः

शब्दाश्रयिणी हि भाषा। लोके तु एकस्यैव शब्दस्य प्रचलितानि बहूनि रूपाणि सन्ति। रूपविज्ञानं खलु शब्दानां प्रचलितरूपाणां पर्यालोचनं करोति तथा तेषां रूपवैचित्र्याण्यपि निर्दिशति। तत्र व्याकरणशास्त्रे शब्दानां लोकव्यवहृतानि रूपाणि आश्रित्य प्रकृति-प्रत्यययोः वैचित्र्यविधानात् सिद्धानि रूपाणि उपदिश्यन्ते। निरुक्तकारो यास्काचार्यः स्वकीये निरुक्तग्रन्थे रूपविज्ञानस्यापि परिचयं दत्तवान्। नाम, आख्यातं, निपातः, उपसर्गश्चेत्यनेन अखिलपदजातानां तेन चतुर्विधत्वं स्वीकृतम्।[२९] तत्र निरुक्ते परिवर्तनशीलाः शब्दा द्रष्टव्या इत्यभिधीयते।[३०] एतेषाम् एव चतुर्विधानां पदानां नामाख्याते तु व्ययुक्ते निपातोपसर्गौ अव्ययौ। पदवाक्ययोः सम्बन्धवशात् (morpheme) तथा वाक्यार्थयोः सम्बन्धवशाद् (semanteme) व्ययुक्तानां पदानां रूपस्य परिवर्तनं भवति। निपातोपसर्गयोः संख्यायाः स्वल्पत्वाद् निरुक्तकृता प्रायशः तेषां सर्वेषां पाठः अर्थश्च समादिष्टः। बहुत्र मन्त्रगतानां नामपदानाम् अर्थनिगमनाय तत्पदगतानि लिङ्गविभक्तिवचनानि निर्दिश्यन्ते निरुक्तकारेण। तद्यथा दूतः निर्ऋत्या इदमाजगाम[३१] तथा परो निर्ऋत्या आचक्ष्व[३२] इत्यादिषु मन्त्रेषु निर्ऋति इति पदं लभ्यते। निरुक्तकारस्य मते अत्र प्रथमस्थले पदमिदं पञ्चम्यन्तं षष्ठ्यन्तं वा, यत एतयोः विभक्त्योः अर्थव्यतिरिक्तम् अन्यस्याः कस्या अपि विभक्त्या अर्थः अत्र न सङ्गच्छते। अतः अत्र स्वाभाविकं पदम् आसीद् निर्ऋत्याः इति। द्वितीयस्थले तु अर्थानुरोधेन मन्त्रगतम् उक्तं पदं चतुर्थीविभक्त्यन्तम् इति स्वीकार्यम्। अत्र स्वाभाविकं पदमिदं निर्ऋत्यै– दूतो निर्ऋत्या इदमाजगामेति पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षा वाकारान्तं परो निर्ऋत्या आचक्ष्वेति चतुर्थ्यर्थप्रेक्षैकारान्तम्[३३] इति। पदपाठे तु स्वाभाविकपदद्वयं पठ्यते। ऋचां त्रिविधत्वं विधानकाले निरुक्तशास्त्रे निरुक्तकृता आख्यातस्यापि कालपुरुषवचनानां विभेदाद् रूपवैचित्र्यं व्याख्यातम्।

---

[२९]तद् यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति। तत्रैव (१/१/१/८)

[३०]दृष्टव्ययं तु भवति, तत्कथम् अनुदात्तप्रकृति नाम स्याद् दृष्टव्ययं तु भवति। तत्रैव (१/२/४/१८), (५/२३/४)

[३१]ऋ.सं. (१०/१६५/१)

[३२]तत्रैव (१०/१६४/१)

[३३]नि. (१/३/६/३)

तत्र निरुक्ते अवयवरहितानि कृदन्तपदानि एकपदमित्युच्यते। एकपदानां निरुक्तिः वर्णाक्षरसामान्येन, वर्णव्यापत्त्या, वर्णागमेन विपर्ययेण वा, विभक्त्या विपरिणामेन खलु कार्या– एवमेकपदानि निर्ब्रूयात्[३४] इति प्रागेव विस्पष्टम्। बहुभ्य एव पदेभ्यः सञ्जातं तद्धितान्तं समासान्तं च पदम् अनेकपदम् इति कथ्यते। तत्र तद्धितान्तस्य समासान्तस्य वा एकपदस्य अनेकपदस्य च निर्वचनार्थं प्रागेव तद्धितार्थं समासार्थं वा विश्लिष्य अनन्तरं समग्रपदस्य घटकानां पदानां निर्वचनं कार्यम्– अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु पूर्वं पूर्वम् अपरमपरं प्रविभ्यज्य निर्ब्रूयात् इति।[३५] यथा दण्ड्यः। इदं खलु तद्धितान्तम् एकपर्वान्वितं पदम्। अत्र तद्धितांशः 'यः' खलु योग्यार्थकः संयुक्तार्थकः वा, अतःपरं दण्ड इति पदावयवं निरुच्यते– दण्डो ददतेर्धारयतिकर्मणः[३६] इति। धारणार्थकात् दद्-धातोः पदमिदं सञ्जायते। इत्थम् आर्ष्टिषेण[३७], कक्ष्या[३८] इत्यादीनां पदानां निर्वचने कृदन्तपर्व (primary), तद्धितान्तपर्व (secondary) चेति पर्वद्वयं स्वीकृत्य निरुक्तकारो यास्काचार्यो रूपविज्ञानस्य उद्घाटकः अभवत्।

## अर्थविज्ञानस्य निरुक्ते प्रसक्तिः

अर्था हि वाक्यस्य प्राणाः, निरुक्तम् अर्थज्ञापकं वेदाङ्गशास्त्रम्। तत्रभवान् निरुक्तकारः स्वकीये निरुक्तग्रन्थे मन्त्रार्थज्ञानस्य प्रयोजनम् उपमामुखेन समुद्दिष्टवान्।[३९] अर्थानुरोधेन निर्वचनशास्त्रस्य प्रयोगसम्प्राप्तिः भवति। पदनिरुक्तिविषये तेन विधीयते प्रकरणाद् विच्छिन्नानाम् अनवगतसंस्काराणां केषामपि पदानां निर्वचनं न कार्यम्– नैकपदानि निर्ब्रूयात्[४०] इति, प्रकरणवशात्

---

[३४]तत्रैव (२/१/२/१२)

[३५]तत्रैव (२/१/२/१४)

[३६]तत्रैव (२/१/२/१५)

[३७]आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा, तत्रैव (२/१/११/२)

[३८]कक्षो गाहतेः कस् इति नामकरणः, ख्यातेर्वानर्थकोऽभ्यासः किमस्मिन् ख्यानमिति,कषतेर्वा। तत्रैव (२/१/२/२०,२१,२२)

[३९]स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥ यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥ तत्रैव (१/३/७/१)

[४०]तत्रैव (२/१/३/११)

प्रसङ्गवशाद् वा शब्दानामत्र निरुक्तिः क्रियते। अर्थविज्ञाने एकस्य एव शब्दस्य नियतोपस्थितिकार्थस्य तथा तस्य अर्थस्य परिवर्तनस्य अध्ययनं भवति। निर्दिष्टार्थस्य वाचकः कश्चिद् शब्दः कथं तस्यैव निर्दिष्टार्थस्य वाचको भवति इत्येतद्विषये शब्दस्यास्य निर्वचनं प्रमाणम्। तद्यथा पृथिव्याः पर्यायवाचकस्य 'गो' इत्यस्य शब्दस्य निर्वचनावसरे यास्काचार्यः उक्तवान् यत्– गौरिति पृथिव्या नामधेयं, यत् दूरं गता भवति यच्चास्यां भूतानि गच्छन्ति इति।[४१] सा पृथिवी दूरात् दूरं विस्तृता, तस्या विस्तृतिः लौकिकबुद्ध्या अस्माभिः न परिमीयते। अपि च अस्यां पृथिव्यां प्राणिनः यथेच्छं गमनागमनं कुर्वन्ति। अत्र 'गो' इत्यस्य शब्दस्य प्रवृत्तिनिमित्तं स्पष्टम्। एतदतिरिच्य शब्दगतं मूलभूताख्यातमत्र निर्णितमभवत्। अतः संज्ञाशब्दे (नामपदे) क्रियावाचकस्य धातोः प्रत्यक्षत्वेन तथा लाक्षणिकत्वेन उपस्थितिः नैरुक्तैः स्वीक्रियते।

आधुनिके अर्थविज्ञाने अर्थस्य त्रिविधो विकारः स्वीक्रियते, ते यथा– (क) अर्थस्य सङ्कोचः (Specialization) यथा 'मृगः' इति शब्दः वेदे सर्वेषामेव पशूनां वाचकः आसीत् परन्तु लौकिके अस्य वाच्यार्थः अधुना हरिणः इति। (ख) अर्थस्य विस्तारः (Generalisation) (ग) अर्थस्य परिवर्तनम् (Transference) यथा 'वार्ता' इति शब्दः प्राचीने तु कृषि-बाणिज्य-पशुपालनादीनां वृत्तीनां बोधक आसीद् अधुना तु वार्ता-शब्देन वृतान्तः एव बुध्यते। यास्काचार्यो निरुक्ते आधुनिकस्य अर्थविज्ञानस्य एतान् एव विषयान् आश्रित्य किमपि नोक्तवान्। वस्तुसादृश्यज्ञापकानाम् उपमादीनां प्रयोगेण तथा विशेषार्थस्य वाचकानां तद्धितादीनां प्रयोगेण एक एव शब्दः अर्थान्तरं भजते इति यास्कपादाः परोक्षेण स्वीकृतवन्तः। यथा– 'गो' इत्यस्य शब्दस्य प्रसिद्धार्थः पृथिवी तथा प्राणिविशेषः। परन्तु तद्धितार्थसमन्वितो गो इति शब्दो वेदे तु दुग्धार्थकोऽपि भवति– अथाप्यस्यां तद्धितेन कृत्स्नवन्निगमा भवन्ति गोभिः श्रीणीत मत्सरमिति पयसः।[४२] गोभिः श्रीणीत मत्सरम्[४३] इत्यादिमन्त्रांशः। गोभिः गोभ्यः अभिनिष्पन्नेन क्षीरेण मत्सरं मादयितारं सोमं श्रीणीत मिश्रयत इत्यर्थः सायणानुररेण मन्त्रांशस्यास्य। अत्र मन्त्रगतो गोशब्दः पशोस्तथा पृथिव्या न वाचकः, परन्तु गोः विकारः इत्यर्थे

[४१]तत्रैव (२/१/५/२)
[४२]तत्रैव (२/१/५/५)
[४३]ऋ.सं. (९/४६/४)

यद् इति तद्धितप्रत्ययान्तस्य गव्य इति शब्दस्य अनुरूपार्थस्य वाचकः।[४४] अतः निरुक्तग्रन्थे अर्थविज्ञानस्यापि बहुलं पर्यालोचनम् अभवत्।

तत्रभवान् यास्काचार्यः वैदिकमन्त्राणाम् अर्थवत्तां प्रतिपादनकाले वैदिकलौकिकभेदेन प्राचीनभारतीयार्यभाषायाः द्वैविध्यं स्वीकृतवान्– अर्थवन्तः शब्दसामान्यात्[४५] इति। अर्थाद् ये शब्दा मन्त्रगताः ते लोकप्रयुक्ता अपि, अतः शब्दसामान्याद् मन्त्रा अर्थयुक्ताः।

## अथोपसंहारः

पूर्वोक्तानां विषयाणां पर्यालोचनेन अन्ते वक्तुम् अलं यद् आधुनिकैः भाषावैज्ञानिकैः इन्दो-इराणीयभाषावंशगता या भाषा प्राचीनभारतीयार्यभाषा इति संज्ञिता, तस्या एव भाषाया विकाशस्य धारा निरुक्तकारेण यास्काचार्येण सम्यगेव विदिता। तेन खलु आचार्येण वैदिकलौकिकभेदेन अस्याः प्राचीनतमाया भाषाया द्वैविध्यं स्वीकृतम् अभवत्। एक एव वैदिकः शब्दः वेदे तु यादृशस्य अर्थस्य वाचक आसीद् लौकिके खलु तस्य शब्दार्थस्य विकाशो जातः। तथाहि यास्काचार्यः एकस्यैव वैदिकशब्दस्य लौकिकार्थानुरोधेन एकाधिकं निर्वचनं प्रदत्तवान्। अपि च वैदिकलौकिकभेदेन धातूनामपि द्वैविध्यं तेन स्वीकृतम्। तत्र निघण्टौ केषाञ्चित् शब्दानां यादृशार्थे पाठः लभ्यते तेषां पदानां निरुक्ते तादृशार्थे निर्वचनं न दृश्यते। अतः अत्र वक्तुं शक्यते यत् शब्दानाम् अर्थस्य विकाशः यास्काचार्येण संलक्षितः निर्देशितश्च। दृश्यते च स शाब्दिकशिरोमणिः शब्दानां वेदप्रचलितार्थेन सह परिवर्तितस्य अर्थस्यापि ग्रहणं कृतवान् निरुक्ते ग्रन्थे। स खलु आचार्यः वैदिकलौकिक्योः भाषयोः आभ्यन्तरिणस्य सम्बन्धस्य सार्थकः साक्षात्कार आसीद् इति निरुक्तशास्त्रे निष्णातः पण्डितप्रवरः तत्रभवान् लक्षणस्वरूप आमन्यते।[४६]

निर्वचनशास्त्रमपि भाषाविज्ञानस्य शाखा एका। परन्तु तस्य खलु स्वातन्त्र्यं नास्ति, शब्दानां निरुक्तिकाले निरुक्तकारेण ध्वनिविज्ञानम्, अर्थविज्ञानं तथा रूपविज्ञानम् इत्येतेषां सहायता नीयते। अतः ध्वन्यादिविज्ञानस्य सहायेन

---

[४४]तद्धितेन तद्धितस्यायं तद्धितोऽर्थः विकारावयवलक्षणस्तेन। इत्थम्भूतलक्षणे तृतीया, तद्धितार्थेन विकारावयवलक्षणेन संयुक्ता इति स्कन्दस्वामी। नि.भा. (२/१/५/५)

[४५]नि. (१/३/५/१)

[४६]He could not have failed to observed the close affinity of the Vedic and classical Sanskrit. Sarup,Lakshman. *The Nighaṇṭu and the Nirukta*, p.223.

एव अस्य निर्वचनशास्त्रस्य सम्पूर्तिः जायते। शोधपत्रेऽत्र साध्यानुसारेण ध्वन्यादिविज्ञानस्य निरुक्ते प्रयोगसम्पत्तिः दर्शिता, वस्तुतस्तु विषयोऽयं विस्तृतं पर्यालोचनम् अपेक्ष्यते। परन्तु पूर्वकृतं सन्दर्भम् आश्रित्य परिशेषे कथ्यते यद् निरुक्ते शास्त्रे आधुनिकभाषातत्त्वस्य बहव एव वियषाः चर्चिता अभवन्।

# भगवद्गीतोक्तसामानाधिकरण्यविमर्शः

## उमेशनेपालः*

लोके बहुविधेषु दर्शनेषु प्रथमानेषु अपि औपनिषदं दर्शनं किमपि विलक्षणं महिमानं धत्ते। अत्र कारणम्– इतराणि दर्शनानि प्रायः तत्तद्व्यक्त्यनुभवमूलकानि भवन्ति, परन्तु औपनिषदस्य दर्शनस्य आधारः ऋतम्भराप्रज्ञासाक्षात्कृततत्त्वयाथात्म्यानामृषीणां वचांसि एव। सर्वासां विद्यानां ब्रह्मविद्यायामेव पर्यवसानम् इति अध्यवस्यन्त्यः भारतीयाः विद्याः वेदान्तविद्यां परितो भ्रमन्ति। अतः भारतीयानां विद्यानां सारः निस्यन्दः लक्ष्यं ब्रह्मविद्या=वेदान्तविद्यैव। स्वयमुपनिषद् इदं सत्यमुद्घुषति “अथ परा यया तदक्षरमधिगम्यते”[२] इति।

परन्तु भारतीयमहादार्शनिकानामपि वेदान्तव्याख्याने न एकविधः पन्थाः। वेदान्तमाधारीकृत्यैव द्वैताद्वैतविशिष्टाद्वैतशुद्धाद्वैतादयोऽनेके भेदाः प्रस्थानानां प्रवृत्ताः। सत्सु अपि अनेकेषु भेदेषु भेदवादिमतम् अभेदवादिमतम् इति द्वेधा वेदान्तप्रस्थानविभागः कर्तुं शक्यः। भेदवादिमतेषु विशिष्टाद्वैतमतम् अन्यतमम्। विशिष्टाद्वैतिनः यथा भेदवादिवाक्यानां तथैव अभेदवादिवाक्यानामपि लक्षणाद्याश्रयणं विना अक्षरस्वारस्यमनुपमृद्यैव अर्थं कुर्वन्ति। यथा श्रुतौ तथा गीतास्वपि जीवब्रह्मभेदबोधकानि इव तदभेदबोधकवाक्यान्यपि उपलभ्यन्ते। इत्थं परस्परविरुद्धार्थप्रतिपादकत्वेन भासमानयोः वाक्ययोः समन्वयप्रकारमपि विशिष्टाद्वैतिनः श्रुत्युक्तमेव अनुसरन्ति। श्रुतिर्हि भेदाभेदव्यवहारसमर्थनाय जडेश्वरयोः जीवेश्वरयोश्च शरीरात्मभावं समुपदिशति– “य आत्मनि तिष्ठन्...”[३] इत्यादिभिर्वाक्यैः। यथा चैत्रो जानाति इति व्यवहारे चैत्रशब्दः चैत्रशरीरमभिधत्ते, नात्मानम्। आत्मनः स्थौल्याश्रयत्वायोगात्। इत्थं शरीरवाचकानां पदानां सति तात्पर्ये आत्मपर्यन्तबोधकत्वं सिद्धमेव। तथा च जडजीवयोः ईश्वरशरीरत्वात् जडवाचकानि जीववाचकानि च पदानि सति तात्पर्ये तदात्मभूतं परमात्मानं प्रतिपादयन्त्येव। जडजीवयोः ईश्वरशरीरत्वं च “यस्यात्मा शरीरम्..., यस्य पृथिवी

---

*सहायकाचार्यः, साहित्यविभागे, जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य

[२]मुण्डकोपनिषद्– १/५

[३]बृहदारण्यकोपनिषद्– ३/७

शरीरम्”[४] इत्यादि श्रुतिसिद्धम्। इयं च विशिष्टाद्वैतिनां वेदान्तार्थप्रतिपादनप्रक्रिया सामान्यत उक्ता। इदानीं गीताशास्त्रे श्रीरामानुजाचार्यैः व्याख्यानाय आदृतः पन्थाः परिशील्यते। भगवद्गीतासु “वासुदेवः सर्वम्”[५], “ज्ञानी त्वात्मैव मे मतम्”[६] इत्यादीनि वाक्यानि अभेदप्रतिपादकानीव प्रतीयन्ते, परन्तु “मम सर्वमपि वासुदेवः” इत्यर्थकरणे स्वारस्यातिशयात् अभेदबोधकत्वाभावात् च तथैव अर्थ उच्यते। एवं ज्ञानी त्वात्मैव मे मतम् इत्यत्रापि आत्मशब्दस्य परमप्रियेषु लक्षणाया लोकप्रसिद्धेः तत्रापि नाभेदो बोध्यते इत्युक्तावपि त्रयोदशाध्याये “क्षेत्रज्ञं चापि मां विद्धि”[७] इत्यादिशब्दतः अभेद एव अनन्यथासिद्धः प्रतीयते। एतादृशस्थलीयव्याख्याप्रक्रिया परिशील्यते।

अध्यात्मतत्त्वप्रकाशनकुशलं गीताशास्त्रं भगवद्गीतमेव तत्त्वहितपुरुषार्थ-प्रतिपादनेन यथा मुमुक्षुजनानामुपचर्कर्ति तथा नेतरे ग्रन्था इति समस्तास्तिक-समाजसम्प्रतिपन्नम्। इदं हि शास्त्रम् अष्टादशाध्यायात्मकं षट्कत्रयविभागेन आचार्यैः विरचितार्थं विलसति। तत्र प्रथमषट्के शास्त्रोपोद्घातरूपे शास्त्रावतरण-हेतुभूतस्य पार्थगतशोकस्य निवर्तकम् आत्मदर्शनं प्रतिपादितम् आदौ अध्यायद्वये, तत उपरि अध्यायचतुष्केण उक्तस्य आत्मदर्शनस्य साधनं प्रपञ्चितम्– “न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते”[८] इत्यादिभिः। ततः द्वितीये षट्के भागद्वयात्मके प्रथमे भागे त्रिभिरध्यायैः साधन-अधिकारि-फलादिभेद-परिकरितभक्तियोगः उपदिष्टः।

ततः परं द्वितीये षट्के त्रिभिरेवाध्यायैः भक्ति-उत्पत्तिविवृद्धि-साधनं प्रपञ्चितम्। ततश्च त्रिकद्वयात्मके अन्तिमषट्के अपि प्रथमेन त्रिकेण प्रधान-पुरुष-सर्वेश्वरस्वरूपम् उपदिश्यते। उत्तरेण च त्रिकेण विविच्य कर्तव्यादि उपदिश्यते। अस्मिन् च तृतीये षट्के आत्रयोदशाष्टादशाध्यायं पूर्वषट्कद्वयोदिताः प्रकृतिपुरुषतत्संसर्गरूपसंसार-परमात्मतद्याथात्म्यादयः विशोध्यन्ते। तदुक्तं गीतार्थसङ्ग्रहे यामुनाचार्यैः–

प्रधानपुरुषव्यक्तसर्वेश्वरविवेचनम्।

---

[४]बृहदारण्यकोपनिषद्– ३/७

[५]भगवद्गीता– ७/१९

[६]भगवद्गीता– ७/१८

[७]भगवद्गीता– १३/२

[८]भगवद्गीता– ३/४

कर्मधीभक्तिरित्यादिः पूर्वशेषोऽन्तिमोदितः॥[९] इति।

त्रयोदशाध्याये देहात्मनोः स्वरूपं, देहयाथात्म्यशोधनं, देहवियुक्तात्मप्राप्त्युपायः, विविक्तात्मस्वरूपसंशोधनं, तथाविधस्य चात्मनः अचित्सम्बन्धहेतुः, ततो विवेकानुसन्धानप्रकारश्च उच्यते। अनुगृहीतं च तथा गीतार्थसङ्ग्रहे–

देहस्वरूपमात्माप्तिहेतुरात्मविशोधनम्।
बन्धहेतुर्विवेकश्च त्रयोदश उदीर्यते॥[१०] इति।

अथ त्रयोदशारम्भे क्षेत्रं क्षेत्रज्ञतत्त्वं चोपदिशति भगवान्। "इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते"[११] इत्यादिना।

अस्मिन् हि षट्के पूर्वोक्ता एव अर्था शोध्यन्ते इत्युक्तम्। पूर्वं भगवता एव "गतासून् अगतासूंश्च" इति उपक्षिप्तक्रमेण, तथा सप्तमारम्भे–

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ इति।
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥ [भगवद्गीता– ७/४-५]

इति च स्वीयप्रकृतिद्वयनिर्देशक्रमेण अत्र प्रथमतः क्षेत्रतत्त्वं ततः क्षेत्रज्ञतत्त्वं च परिशोधयितुं प्रक्रान्तम्– इदं शरीरमित्यादिग्रन्थेन।

देवोऽहं, मनुष्योऽहं, स्थूलोऽहं, कृशोऽहम् इत्यात्मना भोक्त्रा सह सामानधिकरण्येन प्रतीयमानं भोक्तुरात्मनः अर्थान्तरभूतं शरीरं तस्य भोगक्षेत्रमिति देहात्मस्वरूपयाथात्म्यविद्भिः उच्यते। एतत् शरीरमेव मम शिरः मम पाणिः इति अवयवशः, मम शरीरमिति सङ्घातरूपेण तथा इदम् अहं वेद्मि इति प्रत्यक्त्वपराक्त्वाभ्यां स्वस्माद्वेदितुः भिन्नत्वेन वेत्ति, तं वेद्यवस्तुनः अर्थान्तरभूतं वेदितारं क्षेत्रज्ञ इति आत्मयाथात्म्यविदः प्राहुः।

देहव्यतिरिक्तघटाद्यनुभववेलायां "देवोऽहं घटं जानामि", "मनुष्योऽहं पटं वेद्मि" इति देहसामानाधिकरण्येनैव ज्ञातृभूत आत्मा अनुसन्धीयते चेद् अपि देहानुभववेलायां घटादिरिव देहोऽपि "इमं देहमहं वेद्मि" इति वेदितुः अर्थान्तरतया वेद्यत्वेन अनुभूयते। तथा घटादेरिव वेद्यभूतात् शरीरात् वेदिता क्षेत्रज्ञः अर्थान्तरभूतः। यद्येवं देहात्मनोः भेदः वास्तवः, कथं तर्हि तयोः सामानाधिकरण्येन

---

[९]गीतार्थसङ्ग्रहः।

[१०]गीतार्थसङ्ग्रहः।

[११]भगवद्गीता– १३/१

प्रतीतिः उपपद्यतां, यत् यतो भिद्यते न तत् तत्सामानाधिकरण्येन प्रतीयते यथा घटः पटाद्भिन्नः न तत्सामानाधिकरण्येन प्रतीयते, इति चेत्– अत्रेदं भाष्योक्तं समाधानम्– "सामानाधिकरण्येन प्रतीतिस्तु वस्तुतः शरीरस्य गोत्वादिवत् आत्मविशेषणतैकस्वभावतया तदपृथक्सिद्धेरुपपन्ना"[१२] इति। अयमभिप्रायः– न तावत् सामानाधिकरण्यमात्रेण प्रतीतानाम् अभेदः इति नियमोऽस्ति, जातिगुणादिषु तदभावात्। न च जातिगुणादय एव न सन्तीति सौगती गतिरास्थातुं युक्ता। द्रव्येण जात्यादीनां भेदाभेदः, व्याघातात्। अतः जातिगुणक्रियादिषु द्रव्यापृथक्सिद्धिरूपसम्बन्धविशेषं निमित्तीकृत्यैव सामानाधिकरण्यप्रतीतिः निर्वोढव्या। तथैव देहात्मनोः सत्यपि भेदे देहस्य अपृथक्सिद्धिसम्बन्धेन आत्मनि विशेषणत्वात् तयोः सामानाधिकरण्यनिर्वाहः सम्भवति।

अत्र पुनराशङ्का स्यात् यत् अपृथक्सिद्धविशेषणानां विशेष्यधर्मतया प्रतीतिर्विश्वजनीना, यथा गौः शुक्लः इत्यत्र गोत्वशुक्लत्वादिविशिष्ट इति प्रतीतिः। परन्तु देवोऽहम् इत्यादिषु देवत्वविशिष्टोऽहमित्येव प्रतीतिः, न तु देवशरीरविशिष्टोऽहम् इति। अतः घट इत्यत्र घटत्वविशिष्टपिण्डमात्रप्रतीतिवत् देवोऽहम् इत्यादिष्वपि देवत्वादिजातिविशिष्टपिण्डमात्रप्रतीतेः देहस्य किञ्चित् प्रत्यपि विशेषणत्वस्य अदर्शनात् कथम् अपृथक्सिद्धिनिबन्धनं सामानाधिकरण्यम् इति। अत्रायं समाधिः– यथा गृह्यमाणयोरेव नीरक्षीरद्रव्ययोः न्यूनाधिकसमभावेन संसर्गविशेषेषु क्षीरत्वेन नीरत्वेन वा उपलम्भः, तथैवात्रापि गृह्यमाणयोरेव देहात्मनोः सन्निधिविशेषवशेन रजस्तमोवृद्धिहेतुकर्मवशेन च भेदाग्रहात् ऐक्याध्यासः सम्भवति, तथा च देवत्वादिविशिष्टतयाऽहमर्थप्रतीतिः निर्णीतदोषा इत्यतः तादृशप्रतीतिबलेन विरोधो दुर्वचः। गीतं च भगवता एव–

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः॥ [भगवद्गीता– १५/१०]

तदित्थम् अन्योन्यव्यावर्तकाकारवत्तया ज्ञातयोः क्षेत्रक्षेत्रज्ञयोः = देवात्मनोः परमात्मशेषत्वसिद्धये उभयानुवृत्तं परमात्मनियाम्यत्वतदपृथक्सिद्धविशेषणत्वादि चोपदिश्य परमात्मशरीरतया यथावस्थितक्षेत्रक्षेत्रज्ञज्ञानमेव मोहनिवृत्तिनिमित्तं तज्ज्ञानं प्रशंसता भगवता जगे–

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मत्तं मम॥ [भगवद्गीता– ११/२]

---

[१२] गीतारामानुजभाष्यम्।

देवमनुष्यादिसर्वक्षेत्रेषु वेदितृत्वाकारं क्षेत्रज्ञं = क्षेत्रज्ञान्तर्यामिणं मां विद्धि। एवं क्षेत्रमपि = तदन्तर्यामिणमपि मां विद्धि। क्षेत्रज्ञं चापि– इत्यत्र अपिशब्देन क्षेत्रम् अनुक्तमपि समुच्चीयते। इदं क्षेत्रक्षेत्रज्ञयोः विवेकविषयकं तयोः भगवदात्मविषयकं च यत् ज्ञानं तत् उपादेयं ज्ञानमिति मम मतम् इति पद्यार्थः।

अत्र पुनः सन्देहः अवसरं लभते। तथाहि,

क्षेत्राणि च शरीराणि बीजं चापि शुभाशुभम्।
तैनि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते॥[१३]

"योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते"[१४] इति मानवे च शास्त्रे परमात्मैव क्षेत्रज्ञ उक्तः। तथा चात्रापि क्षेत्रज्ञशब्देन परमात्मैव परामृश्यताम्। ततश्च क्षेत्रज्ञं मां विद्धि इत्यस्य क्षेत्रज्ञान्तर्यामिणं मां विद्धि इति अन्तर्यामिपर्यन्तानुधावनक्लेशोऽपि रिच्यते। गीतास्वेव इतः परम्–

तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्।
स च यो यत्प्रभावश्च तत् समासेन मे शृणु॥ [भगवद्गीता– १३/४]

इति क्षेत्रज्ञतत्त्वनिरूपणं प्रतिज्ञाय– "ज्ञेयं यत्तत् प्रवक्ष्यामि" इत्यारभ्य,

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥ [भगवद्गीता– १३/१४]

इति तस्य परमात्मासाधारणं व्यापकत्वादिकमुक्तम्। अतः भारतमानवादिप्रयोगानुरोधेन पौर्वापर्यपर्यालोचनेन च क्षेत्रज्ञशब्देन परस्यैव आत्मनः ग्रहणं युक्तं प्रतीयते। तत्कथं क्षेत्रज्ञशब्दार्थः जीवो भाषितः इति।

अत्रेत्थं प्रतिविधिः–

क्षेत्राणि च शरीराणि बीजं वापि शुभाशुभम्।
तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते॥[१५]

इति भारते योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते। इति मानवे च क्षेत्रज्ञशब्दस्य परमात्मनि प्रयोगे सत्यपि 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इत्यादिश्रुतौ क्षेत्रज्ञशब्देन प्रत्यगात्मैव अभिहितः। अतः भारतादिप्रयोगानुरोधेन क्षेत्रज्ञशब्दः परमात्मनि असाधारणः इति वक्तुं न शक्यते, श्रुतौ तस्य जीवात्मनि प्रयोगात्। एवं पूर्वोक्तः पौर्वापर्यविरोधोऽपि नास्ति क्षेत्रज्ञशब्दस्य जीवपरत्वे। सर्वतः

[१३]महाभारतं, मोक्षधर्मः
[१४]मनुस्मृतिः।
[१५]महाभारतम्

पाणिपादमित्यादिभिः श्लोकैः क्षेत्रज्ञतत्त्वस्य व्यापकत्वम् उपदिष्टम्। क्षेत्रज्ञपदस्य जीवपरत्वेऽपि इदम् अविरुद्धम्। सिद्धान्ते जीवस्य स्वरूपतो व्याप्तेरनङ्गीकारेऽपि ज्ञानतो व्याप्तिस्तु अङ्गीक्रियते एव। ज्ञानव्याप्तिपरत्वस्वीकारेण सर्वतः पाणिपादम् इत्याद्युक्तव्यापकत्वं जीवेऽपि घटते।

किञ्च, "क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम" इत्युपक्रान्तं देहात्मनोः याथात्म्यशोधनम् उपसंहरन् आह भगवान्–

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः।
मद्भक्त एतद्विज्ञाय मद्भावायोपकल्पते॥ [भगवद्गीता– १३/१८]

अत्र मद्भक्त इतिपदं परमात्मयाथात्म्यज्ञानसम्पन्नपरम्। नात्र मद्भक्तपदेन भक्तिसाधनतत्पर एव उच्यते इति मन्तव्यं, मद्भावायोपकल्पते इति मोक्षफलश्रवणात् मोक्षोपायभूतभक्तिमान् एव तत्पदार्थ आस्थेयः। मोक्षोपायभूतभक्तिश्च परमात्मयाथात्म्यज्ञानघटिता। एवं स्थिते यदि क्षेत्रज्ञशब्दः परमात्मपर एव इति उच्यते तदा मद्भक्तः = मम यथावद्वेत्ता एतद्विज्ञाय = क्षेत्रज्ञं मां विज्ञाय इत्यर्थः स्यात्, तथा चात्र मम ज्ञाता मां विज्ञाय इत्यत्र पौनरुक्त्यं स्यात्। अतः जडजीवेशतत्त्वत्रयज्ञाता एवात्राभिप्रेत इति अर्थवर्णनं स्वरसमित्यभिसन्धाय भाष्यकारैः क्षेत्रज्ञपदेन प्रत्यगात्मैवोक्तः।

पुनश्चात्र क्षेत्रज्ञं चापि मां विद्धि इत्यनेन जीवपरमात्मनोरभेद एव कुतो नोपदिष्ट इति शङ्का स्यात्, तथार्थस्वीकारे सर्वश्रुतिसामरस्यं भज्येत इत्येव समाधानम्। अतः सर्वश्रुतिसमन्वयानुकूल एवार्थः भाष्यकारैः भाषितः। तथाहि काश्चन श्रुतयः, "क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः"[१६], "प्रधानक्षेत्रज्ञपतिर्गुणेशः"[१७], "पतिं विश्वस्य"[१८], "ज्ञाज्ञौ द्वावजावीशनीशौ"[१९], "पृथगात्मानं प्रेरितारं च मत्वा"[२०] इत्याद्याः जीवब्रह्मणोर्भेदं बोधयन्ति। अत्रापि गीताशास्त्रे "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च...उत्तमः पुरुषस्त्वन्यः"[२१], "प्रकृतिं पुरुषं चापि विद्ध्यनादी उभावपि"[२२] इत्यादिषु स्थलेषु भेदः उपदिदिशे। पुनश्च शास्त्रेषु अभेदोऽप्युपदिष्टः

---

[१६]श्वेताश्वतरोपनिषद्– १/१०
[१७]श्वेताश्वतरोपनिषद्– ६/१३
[१८]नारायणोपनिषद्
[१९]श्वेताश्वतरोपनिषद्– १/९
[२०]श्वेताश्वतरोपनिषद्– १/१६
[२१]भगवद्गीता - १५
[२२]भगवद्गीता - १५

“ऐतदात्म्यमिदं सर्वम्”[२३], “तत्त्वमसि”[२४], “सदेव सोम्येदमग्र आसीत्”[२५], “अहं ब्रह्मास्मि”[२६] “क्षेत्रज्ञं चापि मां विद्धि”[२७] इत्यादिषु। इत्थं भेदाभेदयोः शास्त्रेषु आपाततः प्रतीतेः तादृशवाक्यानां परस्पराविरोधी अर्थः वक्तव्यः। तमर्थं च शास्त्रमेव शिक्षयति “यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यमयति यं पृथिवी न वेद यस्य पृथिवी शरीरम्”[२८] इत्यादि। भोक्तृभोग्यरूपेण अवस्थितयोः चिदचितोः परमपुरुषशरीरतया तन्नियाम्यत्वेन तदपृथक्स्थितिं परमस्य पुंसः आत्मत्वं च प्रतिपाद्य चिदचिच्छरीरकः परमात्मा एव जगद्रूपेण स्थित इति इममर्थं बोधयितुं कार्यावस्थं कारणावस्थं च जगत् स एव इति काश्चित् श्रुतयः प्रतिपादयन्ति “सत्यं चानृतं च सत्यमभवत्, तत्सृष्ट्वा तदनुप्रविश्य…”[२९] इति।

तदेवं सर्वेषां शब्दानां विशेषणवाचकानां विशेष्यपर्यवसायित्वस्य लोकत एव व्युत्पन्नत्वात् चिदचिन्मिश्रप्रपञ्चवाचकाः सर्वे अपि शब्दा ब्रह्मणः अपृथक्सिद्धविशेषवाचकाः, अतः विशेष्यभूतब्रह्मपर्यान्ताभिधायिनः असति अन्यथातात्पर्ये इत्यतः सर्वेषां शब्दानां ब्रह्मवाचकत्वं सिद्धम्। अत एव यदा यदा शेषत्वनियाम्यत्वधार्यत्वपरतन्त्रत्वादिलक्षणान् अपृथक्सिद्धविशेषणीभूतवस्तुधर्मान् चिदचिद्गतान् प्रमाणान्तरासिद्धान् श्रुतिः प्रतिपिपादयिषति तदा तदा विशेषणी-भूतचिदचिद्वाचकानां शब्दानां विशेष्यब्रह्मपर्यन्ताभिधायित्वं मनसिकृत्य जीववाचकैः शब्दैरेव परं ब्रह्माभिधत्ते।

इमामेव श्रुतिसीमन्तिनीसीमन्तसिन्दूरायितां परिपाटीम् अनुरुन्धानो भगवान् क्षेत्रक्षेत्रज्ञस्वरूपयाथात्म्यसंशुशोधयिषुरगासीत्– क्षेत्रज्ञं चापि मां विद्धि इत्यादीनि सामानाधिकरण्यघटितानि वाक्यानि। इति शम्।

---

[२३] छान्दोग्योपनिषद्– ६.८.७
[२४] छान्दोग्योपनिषद्– ६.९.४
[२५] छान्दोग्योपनिषद्– ६.२.१
[२६] बृहदारण्यकोपनिषद्– १.४.१०
[२७] भगवद्गीता– १३.२
[२८] बृहदारण्यकोपनिषद्– ३.७
[२९] तैत्तिरीयोपनिषद्

# मण्डनमिश्राभिमताख्यातार्थविमर्शः

## नीरजकुमारभार्गवः*

मदीयशोधपत्रस्य विषयस्तावत् आख्यातार्थविमर्शः। अत्र आख्यातस्यार्थस्य विचारो वर्तते। तत्राख्यातार्थः कः इति विवेचनात्पूर्वं किं नाम आख्यातमिति प्रश्नः समुदेति। कारणं हि बहुषु अर्थेषु आख्यातशब्दस्य प्रयोगो लभ्यते। तथाहि- "आख्यातमाख्यातेन क्रियासातत्ये" इति वार्तिके आख्यातशब्देन तिङन्तस्य ग्रहणं वर्तते। अत एव "तिङन्तं तिङन्तेन सह समस्यते क्रियासातत्ये गम्यमाने" इति तस्यार्थो भवति। तेन च खादतमोदता पचतभृज्जता इत्यादीनामुदाहरणानां सिद्धिः भवति। क्रियाप्रधानमाख्यातम् इत्यादौ यास्कवचनादौ आख्यातशब्देन धातोर्ग्रहणं भवति। अत एव प्रोक्तं नागेशभट्टेन तद्वाक्यस्यार्थो मञ्जूषायाम्- "तत्र ह्याख्यातशब्देनाख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेति व्युत्पत्त्या धातुरूपमुच्यते। नामाख्यातोपसर्गनिपाताः इति प्रकृतीनामेव तत्रोद्देशात् अग्रेऽपि तत्र नामान्याख्यातजानि इति शाकटायनो नैरुक्तसमयश्चेति उक्तत्वात्"[२]। क्वचिदाख्यातेन तिङ्प्रत्ययानां ग्रहणं भवति। तथाहि वदति जगदीशः शब्दशक्तिप्रकाशिकायाम्–

धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने।
समर्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते॥९७॥

अत एव अग्रे प्रोक्तं तेन "तिङाख्यातयोः पर्यायत्वात्"[३]। कुत्रचिच्च आख्यातशब्दस्यार्थो भवति उपदेशः यथा सकृदाख्यातनिर्ग्राह्या इति जातिलक्षणे आख्यातशब्दस्यार्थ उपदेशः इति। अतः वदति शेखरकारः "आख्यातम् आख्यानम् उपदेशः"[४] एवं च आख्यातपदेन क्वचित् तिङन्तस्य क्वचित् धातोः ग्रहणं क्वचित् तिङ्प्रत्ययस्य ग्रहणं वर्तते। एवं च सति अत्र किं ग्राह्यमिति चेत्तिङ्प्रत्ययस्यैव ग्रहणमतोऽत्र तिङ्प्रत्ययानामर्थस्य निरूपणं क्रियते।

---

*सहायकाचार्यः, संस्कृताध्ययनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य

[२]वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या ८४

[३]सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या ३११

[४]दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या ४०७

## अथ मण्डनमिश्राभिमततिङर्थविमर्शः

आख्यातार्थविषये मण्डनमतं बहुषु ग्रन्थेषु प्रतिपादितं वर्तते अतोऽत्र तत्तद्ग्रन्थानुसारं मण्डनमिश्राभिमताख्यातार्थः प्रस्तूयते। तथाहि आख्यातवाददीधितौ वदति दीधितिकारः– मण्डनमतम् "धातोरर्थः फलम्। अनुकूलो व्यापारो व्यापारमात्रं वा आख्यातस्य जन्यजनकभावः संसर्गमर्यादालभ्यः",[५] इति। अस्य ग्रन्थस्य तात्पर्यं वर्तते चैत्रः पचति, इत्यादौ मण्डनमते पच्धात्वर्थः विक्लित्यादिफलं, व्यापारः आख्यातार्थो वर्तते। तत्र व्यापारे फलं जन्यजनकभावसम्बन्धेन विशेषणं भवति, अतः जन्यजनकभावसम्बन्धः आकाङ्क्षाभास्यो वर्तते। किञ्च द्वितीयार्थः फलनिष्ठं वृत्तित्वं वर्तते। एवं तृतीयार्थो व्यापारनिष्ठं वृत्तित्वं वर्तते। प्रथमान्तार्थमुख्यविशेष्यकश्च शाब्दबोधो भवति। एवं च चैत्रो तण्डुलं पचतीत्यतः तण्डुलवृत्तिविक्लित्तिजनकव्यापाराश्रय एकत्वविशिष्टश्चैत्रः। चैत्रेण तण्डुलः पच्यते, इत्यतश्च चैत्रवृत्तिव्यापारजन्यविक्लित्तिरूपफलाश्रय एकत्वविशिष्टतण्डुल इति। एवमन्यत्रापि बोध्यम्। तथा चोक्तं दीधितिकारेण मण्डनमतम्– "एवं च तण्डुलं पचति चैत्रः, इत्यस्य तण्डुलवृत्तिफलविशेषजनकव्यापारवान् चैत्रः। मैत्रेण पच्यते तण्डुलः, इत्यस्य च मैत्रनिष्ठव्यापारजन्यफलविशेषशाली तण्डुलः इत्यर्थः। ग्रामं गच्छति चैत्रः, इत्यादौ ग्रामवृत्तिसंयोगजनकग्रामभिन्नसमवेतव्यापारवांश्च चैत्रः। चैत्रेण ग्रामो गम्यते, इत्यत्र चैत्रवृत्तिग्रामभिन्नसमवेतव्यापारजन्यसंयोगशाली ग्रामः"[६]। एवं चानेन ग्रन्थेनेदं समागतं भवति यन्मण्डनमिश्रमते आख्यातमात्रस्यार्थो भवति व्यापार इति।

गदाधरभट्टेनापि मीमांसकमतम् एवमेव प्रतिपादितम्। तत्र हि वदति सः– "मीमांसकास्तु व्यापारत्वेनैव शक्तिः पचति इत्यादावपि तेनैव रूपेण बोधोपगमात्। एवं चाचेतनेऽपि प्रयोगो मुख्य एव"[७]। एतस्य ग्रन्थस्य तात्पर्यं वर्तते यन्मीमांसकमते लकारस्य व्यापारत्वावच्छिन्ने एव शक्तिः वर्तते न तु यत्नत्वावच्छिन्ने यत्ने। तेन च चैत्रः गच्छति, इत्यादाविव रथो गच्छति, इत्यादौ अचेतनेऽपि मुख्य एव प्रयोगो न तु नैयायिकवल्लाक्षणिकः।

---

[५]आख्यातवाददीधितिपत्रसंख्या vii

[६]आख्यातवाददीधितिपत्रसंख्या vii

[७]विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसंख्या २२८

अथ यदि आख्यातस्य व्यापारे शक्तिः स्वीक्रियते चेत् शक्यतावच्छेदकं व्यापारत्वं भविष्यति। व्यापारत्वं च नाम तज्जन्यत्वे सति तज्जन्यजनकत्वम्, इति तच्च जनकघटितं वर्तते तस्मात्तद्गुरुभूतम्। यदि च यत्ने शक्तिः स्वीक्रियते चेत् यत्नत्वं शक्यतावच्छेदकं भविष्यति तच्च जातिरूपम् एकमेव वर्तते, तस्मात् यत्ने शक्तिः स्वीकारे लाघवं वर्तते, अतो लाघवात् यत्ने एव शक्तिः स्वीकर्तव्या न तु व्यापारे शक्तिः स्वीकर्तव्या गौरवात्। अत एव प्रोक्तमपि नैयायिकैः "एवं व्यापारेऽपि न शक्तिर्गौरवात्"[८] एवं च किमर्थं मीमांसकैः आख्यातस्य व्यापारे शक्तिः स्वीकृता इति त्वत्र नैव शङ्कनीयम्। यतोहि- यत्र लघुधर्मगुरुधर्माभ्यां बोधो निर्विवादः तत्रैव लघुधर्मावच्छिन्ने शक्तिः स्वीक्रियते। यथा गोशब्दात् जात्याकृतिविशिष्टव्यक्तेर्बोधो जायते। तत्र जात्या गोत्वेन आकृत्या अवयवसंयोगेन च व्यक्तेर्बोधो निर्विवाद इति अवयवसंयोगरूपाकृत्यपेक्षया लघोः जातेः गोत्वस्य शक्यतावच्छेदकत्वं स्वीक्रियते। प्रकृते च आख्यातात् कृतित्वेन व्यापारबोधः सविवाद इति कृत्वा लाघवमत्र कृतौ शक्तिस्वीकारे अकिञ्चित्करम्। अतः मीमांसकैः व्यापारत्वावच्छिन्ने व्यापारे एव आख्यातस्य शक्तिः स्वीकृतेति भावः। किञ्च कृतौ शक्तिः स्वीकारेऽपि रथो गच्छति इत्यादावाख्यातस्य व्यापारोऽर्थः इति वक्तव्यं भविष्यति, तदर्थं च आख्यातस्य व्यापारे अनादितात्पर्यं कल्पनीयं भविष्यतीति कृत्वा कृतौ शक्तिस्वीकारेऽपि गौरवं वर्तते एवेति कृत्वापि मीमांसकैः व्यापारे शक्तिः स्वीकृतेति भावः। तथा चोक्तं गदाधरेण– "यत्र लघुगुरुरूपाभ्यां बोधो निर्विवादस्तत्रैव लघुरूपावच्छिन्ने शक्त्युपगमात्। प्रकृते च कृतित्वेन बोधस्य सविवादत्वात्। तथापि तदवच्छिन्ने शक्त्युपगमे तत्रामुख्यार्थे अनादितात्पर्यकल्पनायां गौरवात्"[९]।

अथ आख्यातस्य व्यापारे शक्तिरित्यत्र किं प्रमाणमिति चेदुच्यते विवरणमेव प्रमाणम्। तथाहि तत्तत्पदानां तत्तदर्थे विवरणादपि शक्तिग्रहो भवति। यतोहि विवरणमपि शक्तिग्राहकेषु मध्ये अन्यतमम्। तथा चोक्तमपि वर्तते–

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

तत्र विवरणं नाम तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद्घटस्य कलशे शक्तिग्रहो भवति। एवमन्यत्रापि बोध्यम्। एवं च पचति, पचते इत्यादीनां पाकं करोति, इति

---

[८]किरणावलीयुतन्यायसिद्धान्तमुक्तावलीपत्रसंख्या ३०१

[९]विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसंख्या २२८

विवरणं भवति, तत्र पच्धातोर्विवरणं पाकमिति तीत्यस्य ते इत्यस्य वा विवरणं करोतीति। एवमेव अन्येषां तसादितिङ्प्रत्ययानां विवरणमपि कृधातुना क्रियते। एवं च सिद्धमिदं यत् तिङो विवरणं कृधातुना भवति, कृधातोश्चार्थः कृतिः वर्तते। तस्मात्तिङोऽपि कृत्यर्थकत्वं स्वीकरणीयमिति भावः। अत एव दीधितिकारो रघुनाथः प्राह– "पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात्, व्यवहारादिवद्बाधकं विना विवरणादपि व्युत्पत्तेः"[१०]। तथा चोक्तं मुक्तावल्याम्– "एवं विवरणादपि शक्तिग्रहः। विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद्घटपदस्य कलशे शक्तिग्रहः। एवं पचतीत्यस्य पाकं करोतीत्यनेन विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते"[११]। एवं च यदि तिङः व्यापारे शक्तिः स्वीक्रियते चेद्विवरणविरोधापत्तिरित्यपि नैवात्र शङ्कनीयम्। यतोहि बीजेन अङ्कुरः कृतः, स्रगादिना सुखं कृतं, बीजम् अङ्कुरं करोति इत्यादिप्रयोगेषु कृञो यत्नार्थकत्वं नैव वर्तते किन्तु व्यापारसामान्यार्थकत्वमेव वर्तते, अतः पचति इत्यस्य पाकं करोति इति विवरणेनापि तिङो व्यापारार्थकत्वमेव सिध्यति न तु कृत्यर्थकत्वम्, अतो नास्ति विवरणविरोध इति भावः। अत एव गदाधरो वदति– "एवं बीजादिनाङ्कुरः कृतः इत्यादौ विनापि यत्नं कृञः प्रयोगात् तस्यापि व्यापारसामान्यार्थकता। अतः करोति विवरणीयार्थकत्वेऽपि नाख्यातस्य यत्नत्वावच्छिन्नवाचकता"[१२]।

अथ यदि आख्यातमात्रस्य व्यापारे शक्तिः स्वीक्रियते चेत् पचति इत्यत्र कर्तृप्रत्ययः, पच्यते इत्यत्र कर्मप्रत्ययः, इति व्यवहारः कथं भविष्यति। उभयत्रापि प्रत्ययेन कर्तृकर्मणोरबोधात् व्यापारस्य च बोधाद् इति चेदुच्यते ग्रन्थकारेण "फलव्यापारयोः विशेष्यविशेषणभावभेदादेव कर्तृकर्मप्रत्ययव्यवहारः"[१३]। एतस्य तात्पर्यं वर्तते यत्र फलं विशेषणं व्यापारश्च विशेष्यः, तत्र कर्तृप्रत्ययः इति व्यवहारो भवति। यत्र च फलस्य विशेष्यत्वं व्यापारस्य च विशेषणत्वं तत्र कर्मप्रत्ययः इति व्यवहारः, इति भावः। एवं च आख्यातसामान्यस्य व्यापारे शक्तिः, कर्माख्यातप्रत्ययानां च आश्रयत्वे शक्तिः, भावाख्यातप्रत्ययानां च व्यापारे शक्तिः, इति मण्डनमिश्रस्य सिद्धान्तो वर्तते।

---

[१०] आख्यातवाददीधितिपत्रसंख्या V

[११] किरणावलीयुतन्यायसिद्धान्तमुक्तावलीपत्रसंख्या ३०९

[१२] विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसंख्या २२८

[१३] आख्यातवाददीधितिपत्रसंख्या vii

## १. पाणिनीयस्मृतिविरोधापत्तिः

मण्डनमिश्रमते लः कर्मणि च भावे चाकर्मकेभ्यः [३-४-६९] इति सूत्रविरोधापत्तिरूपो दोषः समागच्छति। तथाहि लः कर्मणि च भावे चाकर्मकेभ्यः, इति सूत्रस्यार्थस्तावत् भवति लकाराः सकर्मकेभ्यो धातुभ्यः कर्तरि कर्मणि च भवन्ति, अकर्मकेभ्यो धातुभ्यः कर्तरि भावे च भवन्ति। एवं च कर्त्राख्यातप्रत्ययानां कर्ता कर्माख्यातप्रत्ययानां कर्म भावप्रत्ययानां च भावः= धात्वर्थः, व्यापार इत्येते आख्यातप्रत्यायानां वाच्या इति सूत्रानुसारं समायाति, मण्डनमिश्रमतानुसारं तु कर्त्राख्यातप्रत्ययानां व्यापारः, कर्माख्यातप्रत्ययानाम् आश्रयत्वं, भावप्रत्ययानां च व्यापारः, इत्येते वाच्याः लकाराणामिति, तथा च सूत्रेण साकं विरोधः स्पष्ट एवेति भावः। एवं चायं दोषो भवति।

### अत्र समाधानम्

मण्डनमिश्रनये स्मृतिविरोधो नास्ति। यतोहि- तन्नये सूत्रस्यार्थो भिन्नो वर्तते। तथाहि तन्नये लः कर्मणि च भावे चाकर्मकेभ्यः[३-४-६९] इति सूत्रे लः इति षष्ठ्यन्तं पदं वर्तते। सूत्रस्यास्य द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनम् इति सूत्राभ्यां सहैकवाक्यता भवति। तथा च सूत्रार्थो जायते– सकर्मकेभ्यः धातुभ्यः कर्तृकर्मगतैकत्वविवक्षायां लकारस्य स्थाने एकवचनं भवति, तद्गतद्वित्वविवक्षायां द्विवचनं भवति, तद्गतबहुत्वविवक्षायां बहुवचनं भवति। एवम् अकर्मकेभ्यः धातुभ्यः कर्तृगतैकत्वविवक्षायां लकारस्य स्थाने एकवचनं भवति, तद्गतद्वित्वविवक्षायां द्विवचनं भवति, तद्गतबहुत्वविवक्षायां बहुवचनं भवति। एवं चानया स्मृत्या एकत्वे द्वित्त्वे बहुत्त्वे च एकवचनस्य द्विवचनस्य बहुवचनस्य प्रत्ययस्य च विधानं भवति, न तु कर्तृकर्मभावेषु अर्थेषु लकाराणां विधानम् अनया क्रियते इति। तस्मान्नास्ति स्मृतिविरोध इति भावः। तथा चाह गागाभट्टः– "लः कर्मणि च भावे चाकर्मकेभ्यः इति स्मृतिरपि लः इति षष्ठ्यन्तमाश्रित्य द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यनुशासनैकवाक्यतया लादेशतिबादीनां कर्तृकर्मगतैकत्वादिविवक्षायाम् एकवचनादिविधानपरा व्याख्येया"[१४]।

अथवा लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रं नहि शक्तिग्राहकं किन्तु लक्षणाग्राहकं वर्तते। मीमांसकैश्च लक्षणया कर्त्रादीनां बोधः स्वीकृत एवेति कृत्वा न

[१४] समयूखभाट्टचिन्तामणिपत्रसंख्या ९८

दोषः। अत एव वदति नागेशः– "संख्यान्वयानुपपत्त्या सामानाधिकरण्यानुपपत्त्या लः कर्मणि इत्यादौ धर्मिनिर्देशेन च कर्त्रादौ लक्षणावसीयते। लक्षितकर्तारमादायैव च देवदत्तः पचति इत्यादौ सामानाधिकरण्योपपत्तिः। लः कर्मणि इत्याद्यनुशासनं तु लाक्षणिकाद्यनुशासनमिति।"[१५] तस्मादयमपि दोषो नास्ति मतेऽस्मिन्निति भावः।

## २. अभिहितानभिहितव्यवस्थोच्छेदापत्तिः

मण्डनमिश्रनयानुसारमयमपि दोषो वर्तते। तथाहि– चैत्रः तण्डुलं पचति, चैत्रेण तण्डुलः पच्यते, इत्यादौ यदा कर्तरि तिबादयः प्रत्ययाः भवन्ति, तदा कर्ता अभिहितो भवति, कर्मादयश्चानभिहिताः भवन्ति, एवं च अभिहिते कर्तरि प्रथमा, अनभिहितकर्मादिषु च द्वितीयादिविभक्तयो भवन्ति, एवं च चैत्रः तण्डुलं पचति, इत्यादिवाक्यानां सिद्धिर्भवति। यदा च कर्मणि तिङादिप्रत्ययाः भवन्ति, तदा कर्म अभिहितं भवति, कर्त्रादयश्चानभिहिताः भवन्ति, एवं च अभिहिते कर्मणि प्रथमा भवति, अनभिहितकर्त्रादिषु च तृतीयादिविभक्तयो भवन्ति, तथा सति चैत्रेण तण्डुलः पच्यते, इत्यादिप्रयोगाणां सिद्धिर्भवति। परन्तु मण्डनमिश्रमते तु तिबादिप्रत्यया व्यापारादिष्वर्थेषु समागच्छन्ति, एवं तैः व्यापारादीनामर्थानामभिधानं भवति नतु कर्त्रादीनामर्थानाम्, एवं च कथं मण्डनमिश्रनये अभिहितस्य अनभिहितस्य च व्यवस्था भविष्यति, कथं च चैत्रः तण्डुलं पचति, चैत्रेण तण्डुलः पच्यते, इत्यादीनां वाक्यानां सिद्धिर्भविष्यति, तस्माद् अस्ति मण्डनमिश्रनये अभिहितानभिहितव्यवस्थोच्छेदापत्तिरूपो दोष इति भावः।

## अत्र समाधानम्

अयमपि दोषो नास्ति मण्डनमिश्रमते कथमिति चेदुच्यते– मीमांसकमते अनभिहिते इत्यस्य अबोधिते इत्यर्थो वर्तते। तथा च कर्मणि द्वितीया इति सूत्रस्य तन्नये अर्थो भवति अबोधिते कर्मणि द्वितीया विभक्तिः भवति। कर्तृकरणयोस्तृतीया इति सूत्रस्यार्थो भवति। अबोधिते कर्तरि करणे च तृतीया विभक्तिः भवति। बोधश्च क्वचित् कस्यचित् शक्त्या भवति, कस्यचित् लक्षणया भवति, कस्यचित् आक्षेपात् बोधो भवति। यथा चैत्रः पाचकः इत्यत्र कृदन्तस्थले कर्तुः शक्त्यैव बोधो भवति। पक्वः तण्डुलः, इत्यत्र कर्मणः क्तप्रत्ययेन शक्त्यैव बोधो भवति। पचति इत्यत्र तिङन्तस्थले च कर्तुः लक्षणया आक्षेपाद् वा बोधो भवति। पच्यते इत्यत्र कर्मणः

[१५] वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या ८४

लक्षणया आक्षेपात् वा बोधो भवतीति कृत्वा चैत्रः तण्डुलं पचति, इत्यादौ कर्ता अबोधितो नास्ति किन्तु लक्षणया बोधित एवास्तीति कृत्वा न तत्र तृतीया। एवं चैत्रेण तण्डुलः पच्यते इत्यादौ कर्म अबोधितं नास्तीति कृत्वा अत्रापि न कर्मणि द्वितीयेति भावः। तस्मान्नास्ति अभिहितानभिहितव्यवस्थोच्छेदापत्तिरूपो दोषः। अत एव प्रोक्तं नागेशभट्टेन– "अनभिहिते इत्यस्याबोधिते कर्त्रादावित्यर्थः, बोधश्च शक्त्या, आक्षेपाद् वा, लक्षणया वा। तत्र कृति शक्त्या, तिङि भावनयाक्षेपेण लक्षणया वा"[१६]। कौण्डभट्टो वदति– "मीमांसकास्तु अनभिहिते इत्यस्य अबोधिते इत्यर्थः। बोधश्च शक्त्या आक्षेपाद् वा। स च आख्याते आक्षेपात्, कृति तु शक्त्या। अत एव कर्त्रधिकरणे भट्टैरुक्तम् यादृशस्तु गुणभूत कर्ताऽत्र अवगम्यते, न तादृशेन विना भावना उपपद्यते इति अर्थापत्त्या अनुमानेन वा शक्त्या अनुगमयितुम् इत्यादिना"[१७]। तस्मान्नास्ति दोषोऽयमिति भावः।

## ३. पुरुषव्यवस्थोच्छेदापत्तिः

मण्डनमिश्रनये पुरुषव्यवस्थोच्छेदापत्तिरूपोऽपि दोषो वर्तते। तथाहि युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः [१-४-१०५] इत्यनेन सूत्रेण मध्यमपुरुषस्य व्यवस्था भवति। सूत्रेऽस्मिन् सामानाधिकरण्यं नाम तिङ्वाच्यकारकवाचित्वरूपं, एवं च सूत्रस्यास्यार्थस्तावत् तिङ्वाच्यकारकवाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमपुरुषो भवतीति, यथा त्वं गच्छसि, इत्यादौ, वैयाकरणमतानुसारं तिङ्प्रत्ययसिप्वाच्यकर्तृकारकवाचियुष्मदि प्रयुज्यमाने सति मध्यमपुरुषो भवति। एवं मया त्वं दृश्यसे इत्यादौ तिङ्प्रत्ययसेवाच्यकर्मकारकवाचियुष्मदि प्रयुज्यमाने सति मध्यमपुरुषो भवति, एवमन्यत्रापि बोध्यम्। किन्तु मण्डनमिश्रनये तु तिङ्वाच्यं कारकमस्त्येव नहि तन्नये तु तिङो व्यापारोऽर्थः, व्यापारस्य च नहि युष्मदर्थेन साकं सामानाधिकरण्यं सम्भवति, तस्मात्कथं मध्यमपुरुषस्य व्यवस्था स्यात्। एवम् अस्मद्युत्तमः [१-४-१०६] इति सूत्रमुत्तमपुरुषस्य व्यवस्थापकं, सूत्रस्यास्यार्थस्थावत् तिङ्वाच्यकारकवाचिनि अस्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च उत्तमपुरुषो भवतीति, यथा अहं गच्छामि, त्वया अहं दृश्ये इत्यादौ, किन्तु अत्रापि तिङ्वाच्यस्य

---

[१६]वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या ८३

[१७]बृहद्वैयाकारणभूषणपत्रसंख्या ९

कारकस्याभावादस्यापि सूत्रस्य प्रवृत्तिर्नैव भविष्यति तस्मात्कथं मण्डनमिश्रनये उत्तमपुरुषस्य व्यवस्था भविष्यति। शेषे प्रथमः [१-४-१०८] इत्यनेन प्रथमपुरुषस्य व्यवस्था भवति, अस्यापि सूत्रस्य प्रवृत्तिः कारकवाचकत्वाभावे नैव सम्भवति, तस्मात्कथं प्रथमपुरुषस्य व्यवस्था भविष्यति। एवं च पुरुषव्यवस्थोच्छेदापत्तिरूपो दोषो वर्तते मण्डनमिश्रनय इति भावः।

## अत्र समाधानम्

मण्डनमिश्रमते पुरुषव्यवस्थोच्छेदापत्तिरूपोऽपि दोषो नास्ति। यतो हि– वैयाकरणैः पचति पचसि पचामि इत्यादौ लः कर्मणि चेत्यादिशास्त्रबलात् तिबादेः कर्तरि शक्तिः स्वीक्रियते। एवं पच्यते पच्यसे पच्ये इत्यादौ कर्मणि शक्तिः स्वीक्रियते। एवं च तिङ्वाच्यकारकवाचकस्वरूपसामानाधिकरण्यमादाय पुरुषव्यवस्था क्रियते। किन्तु मण्डनमिश्रमते लः कर्मणि च भावे चाकर्मकेभ्यः, इति सूत्रं नहि शक्तिग्राहकं किन्तु लक्षणाग्राहकम्, एवं च वैयाकरणैः तिबादेः यत्र शक्तिः स्वीक्रियते मण्डनमिश्रैः तत्र लक्षणा स्वीक्रियते, एवं च तिङ्लक्ष्यकारकवाचकत्वरूपसामानाधिकरण्यमादाय पुरुषव्यवस्था भविष्यति। अत एव प्रोक्तमपि नागेशभट्टेन-"संख्यान्वयानुपपत्त्या सामानाधिकरण्यानुपपत्त्या लः कर्मणि इत्यादौ धर्मिनिर्देशेन च कर्त्रादौ लक्षणावसीयते। लक्षितकर्तारमादायैव च देवदत्तः पचति इत्यादौ सामानाधिकरण्योपपत्तिः। लः कर्मणि इत्याद्यनुशासनं तु लाक्षणिकाद्यनुशासनमिति वदन्ति"[१८]। एवं मीमांसकनये युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः [१-४-१०५] इत्यस्मिन् सूत्रे सामानाधिकरण्यं नाम तिङ्लक्ष्यकारकवाचित्वरूपं, एवं च सूत्रस्यास्यार्थस्तावत् तिङ्लक्ष्यकारकवाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमपुरुषो भवतीति। यथा त्वं गच्छसि, इत्यादौ तिङ्लक्ष्यकारकं कर्तृकारकं तद्वाचियुष्मदि प्रयुज्यमाने सति मध्यमपुरुषो भवति। एवमन्यत्रापि। अस्मद्युत्तमः [१-४-१०७] इति उत्तमपुरुषस्य व्यवस्थापकस्य सूत्रस्यास्यार्थस्तावत् तिङ्लक्ष्यकारकवाचिनि अस्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च उत्तमपुरुषो भवतीति। यथा अहं गच्छामि गमिष्यामि इत्यादौ बोध्यम्। एवमन्यत्रापि। एवम् उभयोः सूत्रयोः अविषये शेषे प्रथमः [१-४-१०८] इति सूत्रेण प्रथमपुरुषस्य व्यवस्था भविष्यतीति भावः। तस्मान्नास्ति दोषः।

---

[१८] वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या ८३

## अत्र शाब्दबोधः

शाब्दबोधविषये मुख्यप्राधान्यविषये मण्डनमिश्रमतं द्विविधं समुपलभ्यते। रघुनाथशिरोमणिना यथा प्रतिपादितं तदनुसारं प्रथमान्तार्थमुख्यविशेष्यको बोधः, तैः स्वीक्रियते। द्वितीयं वैयाकरणैः यथा प्रतिपादितं तदनुसारं च तिङर्थभावनामुख्यविशेष्यको बोधः, तैः स्वीक्रियते।

चैत्रः ग्रामं गच्छतीत्यस्यार्थविचारः-इत्यत्र गम्धात्वर्थः संयोगः, द्वितीयार्थो वृत्तित्वम्, आख्यातार्थः भावना, तत्र ग्रामस्य वृत्तित्वे निरूपितत्वसम्बन्धेनान्वयः, वृत्तित्वस्य संयोगे आश्रयतासम्बन्धेनान्वयः, संयोगस्य भावनायाम् अनुकूलत्वसम्बन्धेनान्वयः, भावनायाश्च चैत्रे आश्रयतासम्बन्धेनान्वयः, भवति तथा च ग्रामनिरूपितवृत्तित्ववत्संयोगानुकूलभावनाश्रयः चैत्रः। अर्थात् ग्रामवृत्तिसंयोगानुकूलभावनाश्रयः चैत्रः, इति बोधो भवति प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारे। एवमन्यत्रापि बोध्यम्। यदा च प्रत्ययार्थभावनामुख्यविशेष्यको बोधः स्वीक्रियते तदा चैत्रस्य भावनाक्षिप्ते आश्रये अभेदेनान्वयः, आश्रयस्य च भावनायां स्वनिष्ठकर्तृत्वनिरूपकत्वसम्बन्धेनान्वयः, अन्यत्सर्वं पूर्ववद्बोध्यम्। ततश्चास्मिन् पक्षे ग्रामवृत्तिसंयोगजनिका चैत्राभिन्नाश्रयनिष्ठकर्तृतानिरूपिका भावनेति बोधः। एवमन्यत्रापि बोध्यम्।

[] इति चिह्नयोर्मध्ये स्थापिता सङ्ख्या अष्टाध्याय्याः सूत्रस्य क्रमसूचिका वर्तते।

# नित्यकर्मविषये अद्वैतिनां सिद्धान्तः

सुदीप्तदे*

## उपोद्घातः

अद्वैतवेदान्ताचार्यैः श्रीमत्सदानन्दयोगीन्द्रैः वेदान्तसारनामके ग्रन्थे अधिकारिणः लक्षणमुक्तं यत् "अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्य-नैमित्तिक-प्रायश्चित्तो-पासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मल-स्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता।"[२] इति। चित्तशुद्धये कर्तव्यतया उपदिष्टेषु साधनेषु नित्यान्यन्यतमानि। किञ्च येषां कर्मणामनुष्ठाने कृते पुण्यं न जायते, परन्तु अनुष्ठाने अकृते सति पापं जायते, तानि भवन्ति नित्यकर्माणि। नित्यं प्रत्यहमवश्यकर्तव्यतया शास्त्रविहितम्, अग्निहोत्रादिकर्म नित्यमिति कथ्यते। सदानन्दयोगीन्द्राः नित्यकर्मलक्षणमाहुः "नित्यानि अकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि।"[३] इति। अकरणे अननुष्ठाने प्रत्यवायसाधनानि पापोत्पादकानि सन्ध्यावन्दनादीनि कर्माणि नित्यानीत्यर्थः।

## नित्यकर्मविषये पूर्वमीमांसकानां मतम्

पूर्वमीमांसकानां मते नित्यकर्मणां फलं नास्ति। तस्मात् नित्यं कर्म एव मुक्तये साधनम्। यः पुरुषः काम्यं कर्म न करोति। किञ्च निषिद्धं कर्म सर्वथा त्यजति, अपि च नित्यनैमित्तिककर्मानुष्ठानं विधिपूर्वकं करोति सः स्वरूपावस्थितिरूपं मोक्षं प्राप्नोति। तथाहि उक्तम्–

अकुर्वतः क्रियाः काम्या निषिद्धास्त्यजतस्तथा।
नित्यं नैमित्तिकं कर्म विधिवच्चानुतिष्ठतः॥[४] इति।

नित्यकर्मानुष्ठानेन अधिकारिणः पुरुषस्य पापं न भवति। तस्मात् मोक्षप्राप्तये आत्मज्ञानस्य आदरमकृत्वा कर्माणि करणीयानि। तथा हि उक्तम्–

---

*शोधच्छात्रः, अद्वैतवेदान्तविभागे तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य

[२]वेदान्तसारः,पृ. सं. २५

[३]तत्रैव, पृ. सं. २९

[४]नैष्कर्मसिद्धौ (श्लो.स १०)

नित्यानुष्ठानतश्चैनं प्रत्यवायो न संस्पृशेत्।
अनादृत्यात्मविज्ञानमतः कर्माणि संश्रयेत्॥[५] इति।

पूर्वमीमांसकाः "अग्निहोत्रं जुहोति",[६] इत्यादिश्रुतीः आश्रित्य आजीवनं नित्यकर्मानुष्ठानं कार्यमिति वदन्ति। सर्वैः आजीवनम् अग्निहोत्रादिकार्यं कर्तव्यमिति अनया श्रुत्या अवगम्यते। नित्यकर्मणां स्वकीयं फलं किमपि न विद्यते। किन्तु नित्यकर्मणाम् अननुष्ठाने तु प्रत्यवायदोषोत्पत्तिः। एवञ्च कर्मसन्न्यास इति वेदान्तिभिरुच्यमानं वस्तु नोपपद्यते इति। केचन मीमांसकैकदेशिनो भर्तृप्रपञ्चादयस्तु एवं वदन्ति– नित्यकर्माणि सञ्चितदुरितानां क्षयं कुर्वन्ति। एवञ्च नित्यकर्मानुष्ठानेन क्रमशः सर्वसञ्चितकर्मक्षयात् मोक्षो जायते इति।

## नित्यकर्मविषये सिद्धान्तः

नित्यकर्माणि सर्वैः यावज्जीवमनुष्ठेयानि इति पूर्वमीमांसकस्य मतं विरुध्य वेदान्ती एवमाह– फलेच्छयैव कर्मसु प्रवर्तते पुमान्, अतः कारणात् नित्यकर्मणां फलमिच्छता अविदुषा तदनुष्ठानं, सर्वफलेच्छारहितस्य विदुषस्तु नित्यकर्मणां संन्यास एव सिद्धः। अत्र पूर्वमीमांसकाः प्राहुः– नेदं युक्तं, नित्यकर्मणां फलाभावात्। अत्रोच्यते सिद्धान्तिना नित्यकर्मणां फलं सुतरां वर्तते। तदुक्तं श्रीशङ्करभगवत्पूज्यपादैः–

"तस्मात् साभिसन्धीनां नित्यानां कर्मणां सर्वमेधाश्वमेधादीनाञ्च ब्रह्मत्वादीनि फलानि, येषां पुनः नित्यानि निरभिसन्धीनि आत्मसंस्कारार्थानि तेषां ज्ञानोत्पत्त्यार्थानि तानि, "ब्राह्मीयं क्रियते तनुः" इति स्मरणात्, तेषाम् आरादुपकारकत्वाद् मोक्षसाधनान्यपि कर्माणि भवन्तीति न विरुध्यते।"[७] इति। तदुक्तं भगवद्गीतायां "नित्यानामपि कर्मणाम् इह फलवत्त्वस्य उपपादितत्वात् यज्ञो दानं तपश्चैव पावनानि"[८] इत्यादिना वचनेन।"[९]

---

[५]तत्रैव, (श्लो.स १३)

[६]अर्थसंग्रहः, पृ. सं. ५६

[७]बृहदारण्यकोपनिषद्भाष्यं (३/३/१३), पृष्ठाङ्कः– ६८६

[८]गीतायाम्(१८.०५)

[९]एतान्यपि तु कर्माणि सङ्ग त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ [भगवद्गीता– १८.६६] इत्यत्र भाष्ये

पुनः तत्रैव उक्तं– तस्माच्च न नित्यानां कर्मणाम् अदृष्टफलाभावः कदाचिदप्युपपद्यते।"[१०] इति

एवञ्च, नित्यकर्मणां फलवत्त्वात् सर्वफलेच्छारहितस्य विदुषो जीवन्मुक्तस्य नित्यकर्मसंन्यासः उपपन्नः। अविदुषश्च फलेच्छोः नित्यकर्मसु प्रवृत्तिरुपपन्ना।

नित्यकर्मणाम् अननुष्ठाने प्रत्यवायदोषोत्पत्तिरिति मतमपि न स्वीक्रियते वेदान्तिना, तथा स्वीक्रियमाणे सर्वकर्मपरित्यागिनः विदुषः प्रत्यवायप्रसङ्गः स्यात्। तर्हि नित्यकर्माकरणे दोषः कोऽपि मास्तु इति चेत्तदपि न, यतो हि अविदुषान्तु नित्यकर्माननुष्ठाने दोषप्रसक्तिरस्ति इति वेदान्तिभिः स्वीक्रियते। एवञ्चेद् अविदुषां विषये नित्यकर्माकरणं प्रत्यवायदोषोत्पादकम् अस्तु इति चेत्तदपि न, वेदान्तशास्त्रेऽभावाद्भावोत्पत्तेः अनङ्गीकारात्। यतो हि अकरणमिति कर्माभावः। कर्मण अभावः कर्माभावः। तस्मात् अभावात् भावोत्पत्तिः वेदान्तिभिः न स्वीक्रियते।

तदुक्तं स्मृतिकारेण मनुमहर्षिणा–

अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।
प्रसज्ञन् चेन्द्रियार्थेषु नरः पतनमृच्छति॥
मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहीसया॥ [मनुस्मृतिः– ११।४४]

पूर्वोक्तश्लोके विहतकर्माकरणं पतनरूपप्रत्यवायं कथं सूचयतीति चेदुच्यते "अकुर्वन्" इत्यत्र यः शतृप्रत्ययान्तशब्दः वर्तते सः लक्ष्यार्थकः न तु हेत्वर्थकः। तत्प्रति पाणिनीयसूत्रमेव प्रमाणत्वेनाह "लक्षणहेत्वोः क्रियायाः" [पाणिनीयसूत्रम्– ०३.०२.१२६] इति।

एवञ्च, "अभावाद्भावोत्पत्तिर्न भवति" इति वेदान्तनयेन अविरुद्धं सिद्धम्। अविदुषां नित्यकर्मपरित्यागः आरब्धदुरितरूपदोषस्य लक्षकः स्यादित्यपि सिद्धम्। किञ्च नित्यकर्माकरणं यस्मात् प्रत्यवायकारणं न भवति तस्मात् नित्यकर्मसंन्यासी विद्वान् प्रत्यवायदोषभागपि न भवतीति सङ्गच्छते।

नित्यकर्मानुष्ठानम् अनारब्धकर्मणामथवा सञ्चितकर्मणां क्षयं कुर्वत् क्रमेण सर्वसञ्चितकर्मनाशद्वारा मुक्तिफलं ददाति इति यन्मतं मीमांसकानां तदपि न युक्तं,

---

[१०]"सर्वधर्मान् परित्यज्य मामेकं शरणं भज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ (१८.६६) इति श्लोकस्य भाष्ये।

नित्यकर्माणि आरब्धदुरितक्षयार्थानि, न तु सञ्चितदुरितक्षयार्थानीति सिद्धत्वात्। तदुक्तं भाष्यकारभगवत्पूज्यपादैः–

"नित्यान्यधिगतानि कर्माणि उपात्तदुरितक्षयार्थानि।"[११] इति।

पुनस्तत्रैवोक्तम्– "नित्याकरणनिमित्तस्य प्रत्यवायस्य दुःखरूपस्य आगामिनः परिहारार्थानि नित्यानीत्यभ्युपगमात् न अनारब्धफलकर्मक्षयार्थानि।"[१२] इति।

अस्याशयस्तावत् अनारब्धकर्मणां क्षयमेव न नित्यकर्मणामुद्देश्यम्। यतो हि नित्यकर्माकरणे प्रत्यवायः श्रुतो वर्तते। नित्यं कर्म न विधीयते चेदनिष्टं भवतीत्यतः प्रत्यवायस्य अनिष्टार्थबोधकत्वात्, नित्यकर्माकरणनिमित्तस्य भाविनः दुःखस्यापि अनिष्टत्वात् नित्यकर्मणा च तस्य विनाशत्वात् नित्यकर्माणि अवश्यं विधेयानि भवन्तीति।

## उपसंहारः

तस्माद् आरब्धफलानि कर्माणि पूर्वोपात्तानि प्रत्यवायाख्यानि। तेषां क्षयो नित्यकर्मफलम्। नित्यकर्मानुष्ठानं प्रत्यवायस्य न कारणं, प्रत्यवायस्य पूर्वमेव आरब्धकर्मत्वात्। किञ्च नित्याकरणम् आरब्धदुरितानां लक्षकं, न तु कारणमथवा हेतुः। अपि च विदुषां यावज्जीवश्रुतिविषयत्वं नास्ति चेदपि अविदुषां तदस्तीति यावज्जीवश्रुतेः अविषयत्वापत्तिशङ्का अपि निवारिता। नित्यकर्मानुष्ठानस्य मुक्तिफलकत्वमिति एकदेशिमतमपि निरस्तम्। एवञ्च वेदान्ते श्रुतिविहितनित्यकर्मानुष्ठानसिद्धिर्जाता, अद्वैतसिद्धान्तविरोधश्च परिहृत इति शिवम्।

---

[११] तैत्तिरीयोपनिषदः सम्बन्धभाष्ये, पृ. सं. ८७३

[१२] तत्रैव, पृ. सं. ८७५

# शाङ्कराद्वैते समाधिविमर्शः

त्रिदिवरायमण्डलः*

## भूमिका

समाधि-शम-दमो-परम-तितिक्षा-समाधान-श्रद्धाचरण-निष्ठब्रह्मविद्वरिष्ठ-भगवच्छङ्कराचार्य-प्रणीतो-पनिषद्भाष्यादिषु वेदान्तसार-पञ्चदश्यादि-प्रकरणग्रन्थेषु च सर्वानर्थहेतुभूताविद्यायाः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये च समाधेः साधनोत्कृष्टत्वं यद्यपि स्पष्टं तथापि समाधेः साधनोत्तमत्वविषये विप्रतिपत्तयः विद्यन्ते। उपनिषत्सु साक्षात्समाधिशब्दस्य अविद्यमानात् केवलमुपनिषदाधारेण ज्ञानसाधनत्वेन समाधिः स्वीकर्तुं न शक्यते इति केषाञ्चिन्मतं स्यात्। निदिध्यासनस्य परिपक्वरूपः समाधिरतः निदिध्यासनमङ्गीकृत्य पुनः पृथक्तया समाधिस्वीकारः भगवच्छाङ्कराद्वैतेऽनर्थक इत्यपि एके वदेयुः। वेदान्तपरिभाषादिप्रकरणग्रन्थेषु समाधेरनुल्लेखात् श्रवणमनननिदिध्यासनानाञ्च ज्ञानसाधनत्वेन उल्लेखात् समाधेरावश्यकता नास्तीति केचन भणेयुः। अतः भगवच्छाङ्कराद्वैते समाधेः निष्प्रयोजनं वदतां स्पष्टज्ञानाय गुरूणाञ्च सकाशे स्वबोधपरिशुद्ध्यर्थं प्रसिद्धोपनिषदाधारेण भगवच्छङ्कराचार्यप्रणीतभाष्यग्रन्थाद्यवलोकनेन च सप्रमाणं भगवच्छाङ्कराद्वैते समाधिविज्ञानप्रयोजनं विमृश्यते।

## प्रसिद्धोपनिषत्सु समाधिः

अद्वैतवेदान्ते समाधिः द्विविधः। सविकल्पकः निर्विकल्पकश्चेति। चित्तस्य ज्ञेयात्मना निश्चलावस्थानमेव समाधिः। सविकल्पसमाधौ ध्याता ध्यानं ध्येयं चेति त्रितयं भासते। किन्तु निर्विकल्पसमाधौ परमे ब्रह्मणि अविलीनं, निगृहीतं, ध्येयैकात्म्यापन्नम् अन्तःकरणं तिष्ठति।

उपनिषदि साक्षात्समाधिशब्दस्य अभावेऽपि समाध्यर्थे समाहित-समाधान-योगादि-शब्दानां प्रयोगात् समाधिप्रयोजनं स्पष्टमेव। माण्डूक्योपनिषद्गता-द्वैतप्रकरणे श्रूयते–

> सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः।
> सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः॥ [माण्डूक्यकारिका ३/३७]

---

*शोधच्छात्रः, संस्कृताध्ययनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य

ब्रह्मप्रतिपत्तिं प्रति अतीवान्तरङ्ग-साधनत्वात् समाधिर्ब्रह्म इत्येवमत्रोक्तम्। भगवच्छङ्कराचार्यैः भण्यते "यस्मात्सर्वविषयवर्जितोऽतः सुप्रशान्तः, सकृज्ज्योतिः सदैव ज्योतिरात्मचैतन्यस्वरूपेण, समाधिः, समाधिनिमित्तप्रज्ञावगम्यत्वात्, समाधीयतेऽस्मिन् इति वा समाधिः, अचलोऽविक्रियः, अत एवाभयो विक्रियाभावात्"[२] इति। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [२/४/५] इति बृहदारण्यकोपनिषन्मन्त्रे द्रष्टव्यपदेन समाधौ एव ब्रह्मसाक्षात्कारत्वं दर्शितमिति स्पष्टं प्रतिभाति। निर्विकल्पसमाधिना अविद्याग्रन्थिं विनाश्य तस्मिन् समाधौ एव स्थितानां ब्रह्मानन्दरसानुभवात्मकाद्वैतात्मदर्शनमिति भगवच्छङ्कराचार्याणां राद्धान्तः। अत एव विवेकचूडामणौ उच्यते–

अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा।
समाधिनाऽविकल्पेन यदद्वैतात्मदर्शनम्॥
निरन्तराभ्यासवशात्तदित्थं
पक्वं मनो ब्रह्मणि लीयते यदा।
तदा समाधिः सविकल्पवर्जितः
स्वतोऽद्वयानन्दरसानुभावकः॥ [३५३, ३६२] इति।

एवञ्च निर्विकल्पसमाधौ एव निर्विशेषं ब्रह्माधिगम्यते इत्येतद्दर्शयितुं भगवच्छङ्कराचार्यैः विवेकचूडामणौ कथ्यते यत्–

किमपि सततबोधं केवलानन्दरूपं
निरुपममतिवेलं नित्यमुक्तं निरीहम्।
निरधिगगनाभं निष्कलं निर्विकल्पं
हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ॥ [४०८] इति।

अतः समाधौ एवात्मसाक्षात्कार इत्यत्र भगवच्छङ्कराचार्याणामपि मतं विद्यते। "शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तः समाहितो भूत्वात्मन्येवात्मानं पश्येत्" [४/४/२३] इति बृहदारण्यकोपनिषन्मन्त्रस्थस्य समाहितशब्दस्य समाध्यर्थः भगवच्छङ्कराचार्यैरङ्गीकृतः। एतदेव विवेकचूडामणौ गद्यते यत्–

सर्वमात्मसिद्धये भिक्षोः कृतश्रवणकर्मणः।
समाधिं विदधात्येषा शान्तो दान्त इति श्रुतिः॥ [३४१] इति।

एवञ्च श्रवणमनननिदिध्यासनेभ्यः भिन्ना निर्विकल्पसमाध्यस्थेत्येतद्दर्शयितुं

---

[२] ईशादि-नौ-उपनिषद्, पृष्ठाङ्कः– ६८६

भगवच्छङ्कराचार्यैः विवेकचूडामणौ उच्यते यत्–

श्रुतेः शतगुणं विद्यान्मननं मननादपि।
निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्॥ [३६४] इति।

अत एव निदिध्यासनसमाधयोर्भेदः समाधेश्च प्रयोजनं भगवच्छाङ्कराद्वैते स्पष्टमेवेति मन्तव्यम्। निदिध्यासने ब्रह्मसाक्षात्कारश्चेत् निदिध्यासितव्यपदेन ब्रह्मसाक्षात्कारस्योपदिष्टत्वात् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [२/४/५] इत्यस्यां बृहदारण्यकोपनिषद्गतायां ऋचि द्रष्टव्यपदप्रयोगास्वारस्यम्। भामतीकारोऽत्र कथयति "अत्र श्रोतव्यो मन्तव्य इति धारणोपदेशः। निदिध्यासितव्य इति ध्यानोपदेशः। द्रष्टव्य इति समाधेरुपदेशः"[३] इति। एतेन स्पष्टं यत् भामतीकारमतेऽपि निदिध्यासनसमाधयोः भेदो विद्यते इति। पुनश्च पातञ्जलयोगदर्शने समाधियोगस्य भूमिनिरूपणप्रसङ्गे निदिध्यासननिर्विकल्पसमाधयोः प्रकारान्तरेण भेदः भणितः। श्रीमद्धनुमान्विरचितस्य पैशाचभाष्यस्य ब्रह्मानन्दगिर्याख्यव्याख्याने श्रीवेङ्कटनाथेन उच्यते "समाधियोगस्य सप्त भूमयः– तत्र नित्यानित्यवस्तुविवेकादिपूर्विका मोक्षेच्छा प्रथमा भूमिः, ततो गुरुमुपसृत्य श्रवणमननादिरूपो वेदान्तविचारः द्विताया भूमिः, ततो निदिध्यासनाभ्यासान्मनस एकाग्रतया सूक्ष्मवस्तुग्रहणयोग्यत्वं तृतीया भूमिः, ततो वेदान्तवाक्यादपरोक्षब्रह्मसाक्षात्कारश्चतुर्थी भूमिः, ततः सविकल्पसमाध्यभ्यासेन निरुद्धे मनसि निर्विकल्पसमाध्यवस्था पञ्चमी भूमिः, ततस्तदभ्यासातिरेकेण चिरकालावस्थायिनी सैव षष्ठी भूमिः, ततः तस्या अपि परिपाकेन सर्वदापि स्वप्रकाशचिदानन्दैकरसे ब्रह्मणि मग्नतया समुद्रमध्यार्पितकुम्भवदन्तर्बहिःपूर्णत्वं सप्तमी भूमिः"[४] इति। यदि निदिध्यासननिर्विकल्पसमाधयोः भेदः न स्यात्तर्हि पञ्चम्याः भूमेरनावश्यकत्वप्रसङ्गो भवेत्। अतः निदिध्यासननिर्विकल्पसमाधयोः शर्करारसगोलकस्वादयोरिव अवाच्यभेदो वर्तते इति अवश्यम् अङ्गीकार्यम्। विद्यारण्यस्वामिभिरपि निदिध्यासनसमाधयोर्भिन्नं लक्षणमुक्तम्। पञ्चदश्यामुच्यते यत्–

ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्।
एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥

[३]ब्रह्मसूत्रशाङ्करभाष्यं, पृष्ठाङ्कः– ६१५

[४]श्रीमद्भगवद्गीता (एकादशटीकोपेता), पृष्ठाङ्कः– २१६

ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम्।
निवातदीपवच्चित्तं समाधिरभिधीयते॥ [१/५४-५५] इति।

ध्यानस्य फलमेव समाधिरतः ध्यानमेव न समाधिः। अभिनवनारायणानन्देन्द्रसरस्वतीटीकाकारैरुच्यते "ध्यानफलं समाधिः। स च सम्प्रज्ञातोऽसम्प्रज्ञातश्च। तस्मिन् सति योगी निश्चलो विक्षेपरहितो भवतीत्यर्थः"[५] इति। विषयेभ्यः विमुखीकृतान्तःकरणानां विशुद्धे च ब्रह्मणि संहतान्तःकरणानां योगिनां सकाशे ब्रह्म प्रकाशमानं भवति। तैत्तिरीयोपनिषदि समाध्यर्थे योगशब्दस्य प्रयोगः कृतः। ब्रह्मानन्दवल्ल्यामुच्यते "अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति" [४/१] इति। अस्य मन्त्रस्य भाष्ये भगवच्छङ्कराचार्याः भणन्ति "योगः युक्तिः समाधानं, असौ आत्मा"[६] इति। समाधानसम्पन्नानां सकाशे शमदमाद्यर्थाः प्रकाश्यन्ते। अत्रापि समाधानशब्दस्य समाधिरित्यर्थः। वनमालाटीकायामुच्यते "समाधानं समाधिः, स च तस्य आत्मा मध्यकायः। तत्र दृष्टान्तः– आत्मवतेति। प्रसिद्धदेहमध्यकाय इवेति"[७] इति। देहावयवानां मध्ये मध्यकायस्य यथा प्राधान्यं तथैव ब्रह्मप्रतिपत्तिसाधनश्रद्धादीनां मध्ये समाधेरुत्तमं साधनत्वं ज्ञेयम्। अत एव उपनिषत्सु योगः नाम समाधिरेव। "प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्" [२/२/४] इति मुण्डकोपनिषन्मन्त्रेणापि आत्मज्ञानप्राप्तौ योगस्य साधनोत्कृष्टत्वं निगदितम्। तृतीयमुण्डकगतप्रथमखण्डभाष्यारम्भे भगवच्छङ्कराचार्यैः कथ्यते "परा विद्योक्ता यया तदक्षरं पुरुषाख्यं सत्यमधिगम्यते। यदधिगमे हृदयग्रन्थ्यादिसंसारकारणस्यात्यन्तिकविनाशः स्यात्। तद्दर्शनोपायश्च योगो धनुराद्युपादानकल्पनयोक्तः"[८] इति। "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति" [१/२/१२] इति कठोपनिषन्मन्त्रभाष्यव्याख्यानावसरे भूतेशानन्दस्वामिभिरपि उच्यते "आत्मस्वरूपप्राप्त्युपाय अध्यात्मयोगः। अर्थादात्मस्वरूपे स्थितिरूपः

---

[५]उपनिषद्भाष्यं (प्रथमः खण्डः), पृष्ठाङ्कः– ३११
[६]ईशादि-नौ-उपनिषत्, पृष्ठाङ्कः– ९८२
[७]उपनिषद्भाष्यं, पृष्ठाङ्कः– ५०३
[८]ईशादि-नौ-उपनिषत्, पृष्ठाङ्कः– ५०१

योगः। अनेनैव योगेन आत्मानं जानाति"[९] इति। अस्य मन्त्रस्य भाष्ये भगवच्छङ्कराचार्यैः समाध्यर्थे समाधानशब्दस्य प्रयोगः विहितः। तथा हि भाष्यं "तं पुरातनम् अध्यात्मयोगाधिगमेन विषयेभ्यः प्रतिसंहृत्य चेतसि आत्मनि समाधानमध्यात्मयोगस्तस्याधिगमः तेन मत्वा देवमात्मानं धीरो हर्षशोकौ आत्मन उत्कर्षापकर्षयोरभावात् जहाति"[१०] इति। अस्यैव मन्त्रस्य वङ्गव्याख्याने डः सीतानाथगोस्वामिन आत्मसाक्षात्कारसाधनत्वेन समाधिप्रयोजनं स्पष्टं कथयति यत् "अध्यात्मयोगाधिगमेन इत्यनेन पदेन आत्मसाक्षात्कारोपायः निर्दिष्टः। आत्मनि मनसः योग अध्यात्मयोगः। आत्मविषयकश्रुतिवाक्यानि आचार्यसकाशात् श्रुत्वा तदनुगुणयुक्तिभिः मननं कर्तव्यम्। आत्मविषये अनवरतमनुचिन्तनम् अथवा समाध्यवलम्बनं कुर्यात्। तदा एव आत्मसाक्षात्कारः सम्भवति"[११] इति।

छान्दोग्योपनिषदि योगार्थे उपनिषच्छब्दस्य प्रयोगः विहितः। अस्यामुच्यते "यदेव विद्यया करोति श्रद्धया उपनिषदा, तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्य उपव्याख्यानं भवति" [१/१/१०] इति। अत्रैव भाष्ये भगवच्छङ्कराचार्याः भणन्ति "तस्मात् यदेव विद्यया विज्ञानेन युक्तः सन् करोति कर्म, श्रद्धया श्रद्दधानश्च सन् उपनिषदा योगेन युक्तश्चेत्यर्थः"[१२] इति। अत्र योगशब्दस्य समाध्यर्थः भगवच्छङ्कराचार्यैरभिप्रेतः। यतो हि भगवच्छङ्कराचार्याः श्रीमद्भगवद्गीताभाष्यादिषु बहुत्र योगशब्दस्य समाध्यर्थं वदन्ति। "समाधावचला बुद्धिस्तदा योगमवाप्स्यसि" [२/५३] इति श्रीमद्भगवद्गीतोक्तश्लोकस्य भाष्ये भगवद्भिरुच्यते "तदा तस्मिन् काले योगमवाप्स्यसि विवेकप्रज्ञां समाधिं प्राप्स्यसि"[१३] इति। कठोपनिषन्मन्त्रेऽपि समाध्यर्थे योगशब्दस्य प्रयोगः विद्यते। कठोपनिषदि आम्नायते "तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्। अप्रमत्तस्तदा भवति योगो हि प्रभावाप्ययौ" [२/३/११] इति। अत्र 'इन्द्रियधारणाम्' इत्यनेन शब्देन इन्द्रियबुद्धिमनसां निश्चलावस्था निगदिता। सा निश्चलावस्था समाधौ एव सम्भवति। अत एव भगवच्छाङ्कराद्वैते योगसमाधयोरभेद एवेति मन्मतम्। एवञ्च भगवच्छङ्कराचार्यैः श्रीमद्भगवद्गीताभाष्यादिषु योगार्थे

[९] कठोपनिषत् (वङ्गपुस्तकम्), पृष्ठाङ्कः– ६०

[१०] ईशादि-नौ-उपनिषत्, पृष्ठाङ्कः– २२०

[११] कठोपनिषत् (वङ्गपुस्तकम्), पृष्ठाङ्कः– १६८

[१२] छान्दोग्योपनिषत् (वङ्गपुस्तकं, शाङ्करभाष्यसमेता), पृष्ठाङ्क- २५

[१३] श्रीमद्भगवद्गीता (अष्टटीकोपेता), पृष्ठाङ्कः– ११३

समाधिशब्दप्रयोगो विहितो वर्तते इत्येतदधः वर्ण्यते। अत एव उपनिषदि समाध्यर्थे योगसमाधानसमाहितादिशब्दानां प्रयोगात् केवलमुपनिषदाधारेणापि ज्ञानसाधनत्वेन समाधेरङ्गीकारोऽस्तीति ज्ञायत एव।

## ब्रह्मसूत्रश्रीमद्भगवद्गीताभाष्ययोः समाधिः

ब्रह्मसूत्रभाष्ये चतुष्कृत्वः समाधिशब्दः प्रयुक्तो विद्यते। तत्र समन्वयाधिकरणभाष्ये [१/१/४] अधिकारितारतम्यालोचनाप्रसङ्गे ब्रह्मलोकगमनं प्रति साधनत्वेन समाधिर्निगदितः। तथा हि भाष्यं "तथा च यागाद्यनुष्ठायिनां विद्यासमाधिविशेषात् उत्तरेण पथा गमनं, केवलैरिष्टापूर्त्तदत्तसाधनैः धूमादिक्रमेण दक्षिणेन पथा गमनम्"[१४] इति। अत्र क्रममुक्त्यर्थं समाधिवतोऽपि उत्तरेण पथा गमनमिति ज्ञेयम्।

समाधिना उत्कृष्टसाधनेन आत्मा विज्ञेय इत्येवं सुनिश्चतोऽर्थः येषां ते समाधिविज्ञानसुनिश्चितार्थाः। अशेषधर्माधर्माख्यकर्मसन्न्यासात् शुद्धसत्त्वास्ते देहपरित्यागकाले ब्रह्मभूताः सन्तः परिमुच्यन्ति। भगवच्छङ्कराचार्याः ईक्षत्यधिकरणभाष्ये योगिनां विषये भणन्ति "यत्तु ज्ञानं मन्यसे स सत्त्वधर्मः 'सत्त्वात् सञ्जायते ज्ञानम्' [भ.गी.१४/१७] इति स्मृतेः। तेन च सत्त्वधर्मेण ज्ञानेन कार्यकारणवन्तः पुरुषाः सर्वज्ञाः योगिनः प्रसिद्धाः"[१५] इति। पुनश्च योगेन साधनेन प्रज्ञावगम्यत्वात् योगस्य माहात्म्यं दर्शयितुं भगवच्छङ्कराचार्यैः "अस्मिन्नस्य च तद्योगं शास्ति" [१/१/१९] इत्यस्य ब्रह्मसूत्रस्य भाष्ये उच्यते "तदात्मना योगः तद्योगः, तद्भावापत्तिः, मुक्तिरित्यर्थः"[१६] इति। भगवच्छङ्कराचार्यैः "समाध्यभावाच्च" [२/३/३९] इति ब्रह्मसूत्रालोचनावसरे ब्रह्मप्राप्तिसाधनत्वेन समाधिः निगदितः। तथा हि भाष्यं "योऽयमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदान्तेषु..."[१७] इति। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [बृहदारण्यकोपनिषदि २/४/५] इत्यत्र निदिध्यासनसमाधयोर्भेदकथनकर्तुः भामतीकारस्य प्रदर्शितं मतं दूषयित्वा केचन वदेयुः यद्यदि निदिध्यासनस्य परिपक्वरूपः समाधिः स्यात्तर्हि निदिध्यासनात्परमेव

[१४] ब्रह्मसूत्रशाङ्करभाष्यं, पृष्ठाङ्कः– ११६

[१५] तत्रैव, पृष्ठाङ्कः– १६४

[१६] तत्रैव, पृष्ठाङ्कः– १८४

[१७] तत्रैव, पृष्ठाङ्कः– ६१५

समाधिरुपदिष्टः स्यात्। परन्तु श्रुतौ तथा नास्ति खल्विति चेदत्र ब्रूमः शब्दक्रमादर्थक्रमः बलवान् इति कारणात् द्रष्टव्यपदेनादौ समाधिरुपदिष्टः। निदिध्यासनस्य परिपक्वरूपः समाधिरित्यत्र वयं वेदान्तकल्पतरुकारस्य मतं स्मरामः "तस्मिन् देशे ध्येयालम्बनस्य प्रत्ययस्य एकरूपस्रोतःकरणं ध्यानमिति। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव भवति इति समाधिः। ध्यानमेव ध्येयाकारनिर्भासं ध्येयस्वभावावेशात् प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति तदा समाधिरित्युच्यते"[१८] इति। ध्याने प्रयत्नपरा प्रत्ययैकतानता भवति। समाधौ तु प्रयत्नरहिता प्रत्ययैकतानता तिष्ठति। अतः ध्यानं न साक्षात्समाध्यवस्था, समाधिरिव इत्यर्थः। केचन तर्केण निदिध्यासनसमाधयोरभेदप्रतिपादनेच्छया कथयेयुः यद्यथा एकस्याम्रफलस्य परिपक्वरूपतायां सत्यां तदाम्रफलमेव तिष्ठति तथैव ध्यानस्य परिपक्वरूपतायां सत्यां तद्ध्यानमेव भवति, न तु समाधिरित्यतः ध्यानमङ्गीकृत्य पुनः समाधिस्वीकारोऽनर्थक इति चेन्न, एकेन दृष्टान्तरूपोदाहरणेन दार्ष्टान्तिकस्य सर्वांशेन साकं तुलना न विधेया। एकदेशप्रसिद्ध्या अशेषप्रसिद्ध्यर्थं यदुदाह्रियते तदुदाहरणम् इत्येतदेव भगवच्छाङ्कराद्वैते उदाहरणम्। यथा एकस्याम्रफलस्य परिपक्वापरिपक्वभेदेन अवस्थाद्वयं तथैव निदिध्यासनावस्थाया अवस्थान्तरः समाधिः।

एवमपि श्रीमद्भगवद्गीतायां तद्भाष्ये च पौनःपुन्येन समाध्यर्थे योगशब्दप्रयोगः तत्प्रयोजनञ्च निगदितम्।

> भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम्।
> व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ [२/४४]

इत्यस्मिन् श्रीमद्भगवद्गीतोक्ते श्लोके समाध्यनुष्ठानार्थं निश्चयात्मिका बुद्धिः भवेदिति दर्शितम्। सैव बुद्धिः यदा आत्मनि स्थिरीभूता भविष्यति तदा तत्त्वज्ञानं भवति। अत्रोच्यते–

> श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
> समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥ [२/५३]

अत्र समाधिशब्दस्यात्मा इत्यर्थः, अन्तःकरणस्यात्मनि समाहितत्वात्। अर्थात् निर्विकल्पसमाधिना जीवब्रह्मैक्यं योगं प्राप्स्यसीति निगदितम्। ननु समाधिना समाधिं प्राप्स्यसीति अयुक्तं खल्विति चेन्न, अग्निहोत्रादिना श्रुत्युक्तकर्मणा

[१८] तत्रैव, पृष्ठाङ्कः– ६१५

चित्तशुद्धिः, ततः ज्ञानात्मकनिर्विकल्पसमाधिलाभः। ननु निर्विकल्पसमाधौ ब्रह्मसाक्षात्कारश्चेत्तयोरभेद इति चेन्नेयमाशङ्का युक्तियुक्ता। कारणं हि निर्विकल्प-समाधौ आत्मानमनुभवन्तोऽपि ब्रह्माभिन्नत्वेन न जानन्ति। भाष्यार्कप्रकाशकारः पादटिप्पण्यां स्पष्टं कथयति यत् "निर्विकल्पसमाधेः ब्रह्मसाक्षात्कारस्य च एकविषयत्वेऽपि प्रमाणजन्यत्वेन ब्रह्मसाक्षात्कारस्याविद्यानिवर्तकत्वं विशेषः ब्रह्मानन्दीयादौ निरूपितः"[१९] इति। "मयि चानन्ययोगेन भक्तिरव्यभिचारिणी" [१३/१०] इत्यस्य श्रीमद्भगवद्गीतोक्तश्लोकस्य भाष्ये भगवच्छङ्कराचार्यैरुच्यते "मयि च ईश्वरे अनन्ययोगेन अपृथक्समाधिना न अन्यो भगवतो वासुदेवात् परोऽस्ति अतः स एव नो गतिरित्येवं निश्चिता अव्यभिचारिणी बुद्धिरनन्ययोगः, तेन भजनं भक्तिः, न व्यभिचरणशीला अव्यभिचारिणी। सा च ज्ञानम्"[२०] इति। तेनैव अपृथक्समाधिना अभिव्यक्ता भक्तिः ज्ञानमित्युच्यते, अतीवान्तरङ्गसाधनत्वात्। एतदेव भाष्योत्कर्षदीपिकायां गद्यते यत् "सा च ज्ञानान्तरङ्गसाधनत्वात् ज्ञानम्। 'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते।' 'वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम्' इत्युक्तेः"[२१] इति। अत्रैव ज्ञानसाधनत्वेन समाधेः महत्प्रयोजनमवगम्यते। एवं समाधिपरिशुद्धेन अन्तःकरणेन आत्मना आत्मनं पश्यति। एतदेव श्रीमद्भगवद्गीताभाष्ये भगवच्छङ्कराचार्यैरुच्यते यत् "यत्र चैव यस्मिंश्च काले आत्मना समाधिपरिशुद्धेन अन्तःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन् उपलभमानः स्वे एव आत्मनि तुष्यति तुष्टिं भजते"[२२] इति।

## उपसंहारः

अत एव भगवच्छाङ्कराद्वैते ब्रह्मैकत्वविद्याप्रतिपत्तये निदिध्यासनेन विनापि समाधेर्महत्प्रयोजनं विद्यते। भगवच्छङ्कराचार्यैः सर्वानर्थहेतुभूताविद्याया अशेषतया नाशाय आत्मज्ञानावाप्तौ च उत्कृष्टसाधनत्वेन समाधिः स्वीक्रियते इति तेषां ग्रन्थावलोकनेन स्पष्टं ज्ञायते। एवमुपनिषत्सु भगवच्छाङ्करभाष्यादिषु च समाधिप्रयोजनं प्रमाणपुरःसरमालोचितमिति शिवम्।

---

[१९]श्रीमद्भगवद्गीताभाष्यं, पृष्ठाङ्कः– १२०

[२०]श्रीमद्भगवद्गीता (अष्टटीकोपेता), पृष्ठाङ्कः– ५४८

[२१]तत्रैव), पृष्ठाङ्कः– ५४८

[२२]तत्रैव, पृष्ठाङ्कः– ३०६

# साङ्ख्यदृष्ट्या प्रकृतिविमर्शः

## अनिलप्रतापगिरिः*

सम्प्रति उपलभ्यमानेषु ग्रन्थेषु श्रीमदीश्वरकृष्णविरचिता सांख्यकारिका प्राचीनतमा विद्यते। सांख्यशास्त्रस्याधारभूतोऽयं ग्रन्थः अस्यां कारिकायां कियद्भिः गभीरैः प्रकृतिस्वरूपचिन्तनं कृतमाचार्यैः तदेव द्वाभ्यामेव कारिकाभ्यामुपस्थाप्यते। पञ्चविशंत्या तत्त्वैरेव जगद् व्याप्तं न न्यूनैर्नाधिकैः। प्रकृतेः प्रवृत्तौ केचन संदिहानास्तिष्ठन्ति यत् अचेतनायाः प्रकृतेः कथं प्रवृत्तिः?

सांख्यमते प्रकृतिप्रवृतौ द्वयमेवात्र बीजं प्रथमं वंशवृद्धिनिमितं द्वितीयं पुरुषविमोक्षनिमित्तमिति।

एवम्भूतस्य कर्तुः पुरुषस्य संयोगत्वात् अचेतनायां प्रकृतिः चेतनावती भूत्वा प्रवर्तते।[१] गुणानां कर्तृत्वे सति उदासीनोऽपि पुरुषः कर्तेव भवति न कर्ता। अत्र दृष्टान्तो भवति यथाऽचौरश्चौरैः सह गृहीतश्चौर इत्यवगम्यते, एवं त्रयो गुणाः कर्तारः तैः संयुक्तः पुरुषोऽकर्ताऽपि कर्ता भवति कर्तृसंयोगात्।[२] पुरुषस्य प्रधानेन सह संयोगो दर्शनार्थं प्रकृति महदादिकार्यं भूतपर्यन्तं पुरुषः पश्यति एतदर्थं, प्रधानस्यापि पुरुषेण संयोगः कैवल्यार्थं, स च संयोग पङ्ग्वन्धवदुभयोरपि द्रष्टव्यः।

भेदानां परिमाणात् लोके यत्र कर्तास्ति तस्य परिमाणं दृष्टं यथा कुलालः परिमितैर्मृत्पिण्डैः परिमितानेव घटान् करोति एवं महदपि महदादिलिङ्गं परिमितं भेदतः प्रधानकार्यमेका बुद्धिरेकोऽहङ्कारः पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्चमहाभूतानीत्येवं भेदानां परिमाणादस्ति प्रधानं कारणं यद् व्यक्तं परिमितमुत्पादयति। यदि प्रधानं न स्यात् तदा निष्परिमाणमिदं व्यक्तमपि न स्यात्,परिमाणाच्च भेदानामस्ति प्रधानं, यस्माद् व्यक्तमुत्पन्नम्। तथा समन्वयात् इह लोके प्रसिद्धिर्दृष्टा, यथा व्रतधारिणं बटुं दृष्ट्वा नूनमस्य पितरौ ब्राह्मणाविति एवमिदं त्रिगुणं महदादिलिङ्गं दृष्ट्वा साधायमोऽस्य यत् कारणं भविष्यतीति। अतः समन्वयादस्ति प्रधानम्। तथा शक्तितः प्रवृत्तेश्च इह यो यस्मिन् शक्तः स तस्मिन्नेवार्थे प्रवर्तते यथा कुलालो घटस्य करणे समर्थो घटमेव करोति न पटं रथं

---

*सहायकाचार्यः, संस्कृतविभागे, पण्डिचेरीकेन्द्रीयविश्वविद्यालयस्य

[१]सां.का. २०

[२]सां.का. २१

वा। तथा अस्ति प्रधानं कारणं कुतः? कारणकार्यविभागात्– करोतीति कारणम् क्रियत इति कार्यम् कारणस्य च विभागो यथा– घटे दधिमधूदकपयसां धारणे समर्थौ, न तथा तत्कारणं मृत्पिण्डः मृत्पिण्डो वा घटं निष्पादयति न चैवं घटो मृत्पिण्डम् एवं महदादिलिङ्गं दृष्ट्वावनुमीयते– अस्ति विभक्तं तत्कारणं यस्य विभाग इदं व्यक्तमिति। इतश्च अविभागाद् वैश्वरूपस्य विश्वं जगत् तस्य रूपं व्यक्तिः, विश्वरूपस्य भावो वैश्वरूप्यं, तस्याविभागादस्ति प्रधानं, यस्मात् त्रैलोक्यस्य पञ्चानां पृथिव्यादीनां महाभूतानां परस्परं विभागो नास्ति महाभूतेष्वन्तर्भूतास्त्रयो लोका इति। प्रलयकाले सृष्टिक्रमेणैवाविभागं यान्ति तन्मात्रेषु परिणामिषु तन्मात्राण्येकादशेन्द्रियाणि चाहङ्कारे अहङ्कारो बुद्धौः बुद्धिः प्रधाने, एवं त्रयो लोकाः प्रलयकाले प्रकृतावविभागं गच्छन्ति।

अतश्च अव्यक्तं प्रख्यातं कारणमस्ति यस्मान्महदादिलिङ्गं प्रवर्तते। त्रिगुणतः त्रिगुणात् सत्वरजस्तमांसि गुणा यस्मिन् तत् त्रिगुणम्। तत् किमुक्तं भवति? सत्वरजस्तमसां साम्यावस्था प्रधानम्। तथा समुदयात् यथा गङ्गास्त्रोतांसि त्रीणि रूद्रमूर्धनि पतितानि एकं स्त्रोतो जनयन्ति एवं त्रिगुणमव्यक्तमेकं व्यक्तं जनयति, यथा वा तन्तवः समुदिताः पटं जनयन्ति एवमव्यक्तं गुणसमुदयान्महदादि जनयतीति त्रिगुणतः समुदयाच्च व्यक्तं जगत् प्रवर्तते। यस्मादेकस्मात् प्रधानाद् व्यक्तं तस्मादेकरूपेण भवितव्यं, नैष दोषः। परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रय विशेषात्। एकस्मात् प्रधानात् त्रयो लोकाः समुत्पन्नास्तुल्यभावा न भवन्ति देवाः सुखेन युक्ताः मनुष्या दुखेन तिर्यञ्चो मोहेन, एकस्मात् प्रधानात् प्रवृत्तं व्यक्तं प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः सलिलवद् भवति। एवमेकस्मात् प्रधानात् प्रवृत्तास्त्रयो लोका नैकस्वभावा भवन्ति, देवेषु सत्वमत्कटं रजस्तमसी उदासीनं तेन तेऽत्यन्तसुखिनः मनुष्येषु रज उत्कटं भवति सत्वतमसी उदासीने तेन तेऽत्यन्तदुःखिनः तिर्यक्षु तम उत्कटं भवति सत्वरजसी उदासीने तेन तेऽत्यन्तमूढाः। एवं लोकदृष्टान्तेनावगमयति उभयविधां प्रवत्तिर्निवृत्तिश्च।

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्॥
रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथाऽत्मानं प्रकाशस्य विनिवर्तते प्रकृतिः॥ [सां.का. ५८-५९]

श्रृङ्गारादिरसैः समन्विता काचित् नर्तकी यथा नृत्यगीतादिभिरात्मनः स्वरूपं

दर्शकजनेभ्यः प्रदर्श्यकृतार्था सती नृत्यात् निवर्तते तथैव प्रकृतिरपि पुरुषस्य स्वीयं तत्त्वज्ञानसमन्वितं वास्तविकं स्वरूपं प्रदर्श्य कृतार्था सती सृष्टिकार्यान्निवृत्ता भवति।

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः॥ [सां.का. ५६]

किमर्थमयं सर्गः प्रकृत्या क्रियते? क्रियते चेत्, प्रवृत्तिशलायास्तस्याः प्रकृते अनुपरमात् सर्वदैवं सर्गः स्यादिति न कोऽपि पुरुषमुच्येत्? इत्यत आह– "प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः" अर्थात् यथा ओदनकामनावान् काश्चित् पुरुष ओदनसम्पनाय ओदनपाके प्रवर्तते सिद्धौ च निवर्तते– एवमेव सर्वान् पुरुषान् मोचयितुं प्रवृत्ता प्रकृतिः यं पुरुषं मोचयति तं पुरुषं पुनर्न प्रवर्तत इति।

"सत्वादीनामतधर्मत्वं तद्रूपत्वादिति"[३] सत्वादिगुणवती सत्वाद्यतिरिक्ता प्रकृतिरिति न शङ्कनीयं कथमित्यत्र सत्वादिगुणानां प्रकृतिधर्मत्वं नास्ति प्रकृतिस्वरूपत्वादिति यद्यपि श्रुतिस्मृतिषूभयमेव श्रूयते, तथापि तर्कतः स्वरूपत्वमेवावधार्यते न तु धर्मत्वम्।

"गुणादीनां न नात्यन्तबाधः"[४] गुणादीनां सत्वादीनां तत् धर्माणां च सुखादीनां तत्कार्याणामपि महदादीनां स्वरूपतो नास्ति बाधः। किन्तु संसर्गतः एव चेतने बाधो भवति– बाधोऽयस्यौण्ण बाधवत्। गुणानां न बाधन असम्भवात् कदापि कथमपि कोऽपि न मुच्येत, अतो गुणानां बाधो भवत्येव।

श्रुतिस्मृत्योर्गीयमानं विवेकज्ञानस्यैव प्राधान्यं सर्वदर्शनेषु मन्तव्यम्। सांख्यमते प्रधानपुरुषौ विभू तथापि प्रकृतिरेव लिङ्गव्यवस्थां करोति, लिङ्गं सूक्ष्मैः परमाणुभिस्तन्मात्रैरुपचितं मानुषादिषु व्यवतिष्ठते नटवत्। यथा सर्वं कार्यं त्रिगुणात्मकमपि उद्रिक्तगुणापेक्षया सात्विकादि शब्दव्यपदेशभाक् चेतनपुरुषः नानायोनिषु जराणमरणकृतं दुःखं प्राप्नोति। यावत् तत्त्वज्ञानेन लिङ्गं शरीरं न निवर्तते, तावत् स्थूलं शरीरं प्रति जन्म नूतनं जायते नश्यति च। स्वप्रयोजनाभावेऽपि प्रत्युपकारं निरपेक्षसुमित्रवत् प्रधानमहदादि विषयपर्यन्तं कार्यं पुरुषस्य भोगाय मोक्षाय चारभते। प्रकृतिपुरुषयोः भेदेन बुध्यहङ्कारादि दर्शयित्वा

---

[३]सांख्यप्रवचनभाष्यम्, अध्यायः ६

[४]सांख्यसूत्रम् २६

निवर्तते पूर्ववत्।

किञ्च अगुणस्य पुंसः जगद्योनिभावेन सुखदुःखमोहात्मकेन शब्दादिविषयभावेन वेत्येवं विधैरुपकारैरनुपकारिणः पुरुषस्योपकुर्वती पश्चादात्मानं प्रकाश्य अहमन्या त्वमन्य इति निवर्तते सुमित्रवत् आत्मनः प्रत्युपकारं नेच्छति।

सांख्यदर्शने प्रकृतिविषये विभिन्नानि मतानि अनेकेषां आचार्याणां विद्यन्ते। यथा केचित् वदन्ति "अष्टौ प्रकृतयः" केचिच्च "एकैवमूल प्रकृतिः" अथापरे "जडाजडात्मिकामुभयविधां" निरूपयन्ति। श्रीमद्भगवद्गीतायां श्रीमन्नारायणोऽपि वदति–

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥ [गीता ७/४-५]

गीतोक्तवचनात् ज्ञायते भगवता श्रीकृष्णेन प्रकृतेः द्वौ प्रकारौ निरूपितौ, एका परा द्वितीयाऽपरा। गीताभाष्ये प्रतिपादयति भगवान् शङ्कराचार्यः– अहङ्कार एव सर्वस्य प्रवृत्तेः बीजं दृष्टं लोके। इतीयं यथोक्ता प्रकृतिर्मे ममैश्वरी माया शक्तिरष्टधा भिन्नभेदमागता, अपरा न परा निकृष्टा अशुद्धा अनर्थकारी संसारबन्धनात्मिकेयं, हे महाबाहो यया प्रकृत्येदं धार्यते जगदन्तः प्रविष्टया॥

प्रकृतिः पुरुषश्चैव सदसद्योनिजन्मसु॥

प्रकृतिमिति! प्रकृतिं पुरुषं चैव ईश्वरस्य प्रकृती तौ प्रकृतिपुरुषौ उभावपि अनादी। न विद्यते आदिर्ययोस्तौ अनादी। नित्येश्वरत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम्। प्रकृतिद्वयवत्वमेव हीश्वरस्येश्वरत्वम्। यभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिप्रलयहेतुः, ते द्वे अनादी सत्यौ संसारस्य कारणम्। न आदि अनादि इति तत्पुरुष समासं केचिद्वर्णयन्ति। तेन हि किल ईश्वरस्य कारणत्वं सिद्ध्यति। यदि पुनः प्रकृति पुरुषावेव नित्यौस्यातां तत्कृतमेव जगत् नेश्वरस्य जगतः कर्तृत्वम्। तदसत् प्राक् प्रकृति पुरुषयोरुत्पत्तेरीशितव्याभावादीश्वरस्यानीश्वरत्व प्रसंगात्, संसारस्य निर्मितत्वे अनिर्मोक्षप्रसंगात् बन्धमोक्षभाव प्रसङ्गाच्च। नित्यत्वे पुनरीश्वरस्य प्रकृतेः सर्वमेतदुपपन्न भवेत्।

# पातञ्जले चित्तभूमेरुपयोगः

ध्रुवज्योतिभट्टाचार्यः*

भारतीयं दर्शनशास्त्रं सदा तत्त्वान्वेषि। अयं समाचार आस्तिके तथा नास्तिके समचर एव। आस्तिककोटौ विद्यमानानि षट् दर्शनानि स्वस्वमार्गेण जगत उत्पत्तिविलयादिकं चिख्यापयिषन्ति, पदार्थानुसारतः प्रमाणादिकं व्यवस्थापयन्ति चरमोत्कर्षं विदधते। एतेषां दार्शनिकानां पुनस्तत्त्वविचारणायां प्रेक्षमाणायां समानतन्त्रन्यायत्वेन यथा न्यायवैशेषिकशास्त्रे चर्चिते, तथैव सांख्ययोगौ तन्त्र्येते। सांख्ययोगयोः समानतन्त्रत्वं प्रायशस्तत्त्वस्वीकारं प्रमाणव्यवस्थां कार्यकारणवादं तथा मोक्षव्यवस्थां यावत् सकलेषु पर्यायेषु ईरितम्। वस्तुतस्तु सांख्यशास्त्रं तत्त्वानि निपुणतया विचारयति, योगशास्त्रं पुनस्तत्त्वविचारणायै किमपि गौरवमप्रदाय तेषाञ्चोपलब्धेरुद्देश्यं कैबल्यं तत्साधनोपायो योग इति विस्तरशो निरूपयितुं युङ्क्ते। पातञ्जले मुख्यतया चर्चितो योगः प्रायशो नास्तिकास्तिकमध्ये प्रशस्यते श्रेयःसाधनपरत्वेन।

योगशब्दो युज्धातोर्घञा निष्पन्नः। पाणिनीये धातुपाठे भिन्नार्थपरतया युज्धातुर्द्विधा भज्यते, रुधादिगणे दिवादिगणे च पठितत्वात्। तथा च रुधादिगणे संयोगार्थको युज्धातुः "युजिर् योगे" इति, अपरत्र दिवादिगणे समाध्यर्थपरः युज्धातुः "युज समाधौ" इति व्यवहारद्वयम्। योगियाज्ञवल्क्यसंज्ञके योगग्रन्थे "संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः"[१] इति योगशब्देन संयोगार्थपरतया युजेरङ्गीकारो दृष्टः। पातञ्जलदर्शनदिशा न संयोगार्थः प्रसज्यते, कैवल्यलाभे विवेकज्ञानस्य प्रसक्तेः चित्तवृत्तिनिरोधः प्रयुज्यते। एतेन समाध्यर्थको दिवादिगणीयो "युज समाधौ" इति सार्थकः। समीरितं भाष्ये व्यासदेवेन "योगः समाधिः"[२]।

त्रिगुणात्मकेषु चतुर्विंशतितत्वेषु करणं त्रयोदशविधम्। त्रयोदशविधकरणे पुनरवान्तरविभागः क्रियते सांख्यकारिकाकृता– "अन्तःकरणं त्रिविधं दशधा

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विद्यामन्दिरस्य

[१]योगियाज्ञवल्क्यम्– १/४३

[२]योगसूत्रं, व्यासभाष्यम्– १/१

बाह्यं त्रयस्य विषयाख्यम्”[३] इति। एतेन अन्तर्बाह्यतया करणस्य समुदायेन त्रयोदशविधत्वं स्पष्टम्। अन्तःकरणे बुद्धिः अहङ्कारः मनश्च, बाह्ये च करणं दशविधम्– पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि च। अन्तःकरणेषु बुद्धिः चित्तरूपेण परिगण्यते। “योगश्चित्तवृत्तिनिरोधः” [योगसूत्रम्– १/२] इति चित्तगतवृत्तीनां बुद्धिगतवृत्तीनामिति बोध्यम्। पुनः व्यासभाष्ये “चित्तस्य धर्मः”[४] इत्यत्र तथैवाभासः, यस्य विश्लेषणं तत्त्ववैशारद्यां वाचस्पतिमिश्रेण कलितम्– चित्तस्य धर्मः इति। चित्तशब्देनान्तःकरणं बुद्धिमुपलक्षयति।”[५] इति। योगवार्त्तिककृता विज्ञानभिक्षुणा चित्तशब्देन कार्यचित्तं कारणचित्तञ्चेत्युभयमेव ग्रहीतव्यमिति मन्त्रितम्। प्रलयदशायां यदा कार्यचित्तं लीनं भवति, तदा अमुक्तानां जीवानां संस्कारादृष्टादि कारणचित्तमाश्रित्य वर्तते। सृष्टिदशायां पुनः तत्तच्चित्तमाश्रित्य यथानुसारं स्थीयते। प्रकृत्या साकमभेदप्राप्तं कारणरूपं चित्तं नित्यं विभु च। कार्यरूपं चित्तं महत्तत्वरूपेण प्रकृतेः जायते।

चित्तं यद्यपि प्रकृतेः सात्त्विकपरिणामप्राधान्यं धत्ते, तत्र रजस्तमश्च क्षीणे स्तः। “कारणगुणाः कार्यगुणान् आरभन्ते”– इति न्यायेन कारणगुणः कार्ये सततं सञ्चरते। चित्तं बुद्धिर्वा त्रिगुणात्मिकायाः प्रकृतेः आद्यं परिणामरूपम्। अतस्त्रिगुणात्मकं चित्तम्। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः किल प्रधानमित्यनर्थान्तरम्। सृष्टिकर्मणि प्रधानकारणरूपेणाभिमन्यमानत्वात् प्रकृतेः प्रधानत्वसंज्ञा। अथवा राज्ञो भोगसुखादिसाधनाय व्यक्तिप्रधानो मन्त्री यथा विद्यते, तथैव पुरुषस्य भोगापवर्गसाधनाय प्रकृतिः प्रधानत्वेन व्यवस्थितेति। प्रकृतिः भिन्नस्वभावविशिष्टगुणत्रयशोभिता। गुणाः किल सत्त्वगुणः लघुः प्रकाशशीलः, रजोगुणः उद्दीपकस्तथा क्रियाशीलः, तमोगुणश्च गुरुः आवरणशीलः। धृतं सांख्यकारिकायाम्–

सत्त्वं लघु प्रकाशकमुपष्टम्भकं चलञ्च रजः।
गुरु वरणकमेव तमः,प्रदीपवच्चाऽर्थतो वृत्तिः॥ [सांख्यकारिका– १३]

सांख्ययोगयोः सत्कार्यवादित्वेन कार्यमाविर्भावात् प्राक् स्वीयकारणे सूक्ष्मरूपेणावतिष्ठते। कारणव्यापारादनन्तरं प्रकटितम् आविर्भूतं जायते। तथाहि

[३]सांख्यकारिका– ३३

[४]योगसूत्रं, व्यासभाष्यम्– १/१

[५]योगसूत्रं, तत्त्ववैशारदी– १/१

करणे व्यापारीभूते कारणं कार्यरूपेण परिणमते। तेन कारणं पूर्वावस्थां परिहाय विलक्षणं धर्मान्तरं प्राप्य कार्यं भवति। परिणामशब्देन अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिरिति सिद्धान्तितत्वात्। दुग्धस्य दधिरूपेण परिणामे दुग्धे विद्यमानमधुरताद्रवतादिपूर्वावस्थापरित्यागपूर्वकतया अम्लताकठिनतादि-विलक्षणधर्मोपेतरूपदधिसंज्ञकस्वीकारात् प्रकृतेस्तथैव चित्तसत्त्वरूपपरिणामः स्थितः। एवं चित्तसत्त्वं बुद्धिसत्त्वं, बुद्धिः महान् इत्यनर्थान्तरम्। एतस्मात् बुद्धिसंज्ञकात् चित्तात् क्रमेणाहङ्कारादेः परिणामः।

व्यासभाष्ये चित्तस्य त्रैगुण्यं भणितमेवम्– "चित्तं हि प्रख्याप्रवृत्तिस्थिति-शीलत्वात् त्रिगुणम्"[६] इति। तथा च प्रख्याशब्देन ज्ञानशीलता प्रकाशशीलता वा, प्रवृत्तिशब्देन आरम्भकता चलता वा, स्थितिपदेन किङ्कर्तव्यविमूढता इति व्यक्ततया सत्त्वरजस्तमसां समारब्धतया त्रैगुण्यं स्वीकृतम्। भाष्ये प्रख्याग्रहणमुपलक्षकम्। चित्तं प्रख्याशीलं भवतीति न, किन्तु सत्त्वगुणे विद्यमाना अन्ये प्रसाद-लाघव-प्रसन्नतादिधर्माः भजन्ते इति बोध्यम्। प्रवृत्तिग्रहणमुपलक्षकम्। अनेन बुध्यते, रजोगुणे परितापशोकादिधर्माः गृह्यन्त इति। अनुरूपतया स्थितिपदमुपलक्षकम्। तमोगुणे विद्यमानाः गुरुताऽऽवरणदैन्यादिधर्माः सूच्यन्ते। अत्राभिप्रायः, यद्यपि चित्तमेकमेव, तथापि तस्य त्रैगुण्यात् अनेकावस्थात्मकत्वं स्फुटितं भवति। एतेन गुणविषयिणी स्थितिर्नैकरूपतां भजते। गुणानां वैषम्यदशायां वैचित्र्यं प्रापयत् चित्तं बह्ववस्थासम्पन्नं भवति। एषा अवस्था भूमिशब्देन व्यज्यते। एवं चित्तस्यावस्था चित्तभूमिरिति। सूत्रकारेण "तस्य भूमिषु विनियोगः"[७] इति विभूतिपादे समीरितम्।

**क्षिप्तभूमिः**– अत्र रजोगुणप्राबल्याच्चित्तमतीवास्थिरतां धत्ते। शब्दादिसांसारिक-विषयनिरन्तरसंलग्नं भवति चित्तं, का कथाऽतीन्द्रियविषयाणां चिन्तने? अनुभूयते अतीन्द्रियविषयचिन्तने धैर्यं धीशक्तिः प्रयोजनरूपे, किन्तु एतयोस्तावदभावात् तत्त्वसकलसत्ता अचिन्त्या मन्यत इति। एतादृशे क्षिप्ते चित्ते प्रबलहिंसादिप्रवृत्तिवशात् समाधेः कादाचित्कत्वदर्शनं जायते। दैत्य-दानव-द्रव्यमदोद्भ्रान्तविषयिणोऽत्र दृष्टान्तत्वेन उदाह्रियन्ते। महाभारते पाण्डवानां सविधे पराभूतो जयद्रथः प्रबलद्वेषवशेन चन्द्रशेखरे समाहितचित्त आसीदिति दृष्टान्तः।

---

[६]योगसूत्रं, व्यासभाष्यम्– १/२

[७]योगसूत्रम्– ३/६

**मूढभूमिः**– चित्तस्य द्वितीया भूमिः तमोगुणस्य प्राबल्येन कर्तव्याकर्तव्यरहिततया उत्कटक्रोधादिसमुद्भूतवृत्तिसाहचर्यं निद्रातन्द्रादिवृत्तिसाहित्यं धत्ते। क्षिप्तात् मोहकरे विषये अत्याकर्षणेन समाहितं सत् चित्तं मूढभूमिकं प्राप्नोति। दारा-द्रविणाद्यनुरागेण लोके तत्तद्विषये ध्यानशीलत्वेन दृश्यते। एतादृशं चित्तं सदा राक्षसपिशाचादीन् तथा मादकादिसेवनेन प्रमत्तजनान् वृणुते। कामिनीकाञ्चनादावनुरागातिशयात् मग्नचित्ताः जनाः प्रायशः प्रत्यक्षीभूताः जायन्ते। पुराणादौ एतादृशो व्यवहारो लक्ष्यतेतराम्।

**विक्षिप्तभूमिः**– चित्तस्य तृतीयायां भूम्यामस्यां क्षिप्ताद्विशिष्टायां रजोगुणप्रधानायां कदाचित् सत्त्वगुणस्य उद्रेकेन सद्भूतविषये चित्तस्य स्थेमा। अत्र सामयिकस्थैर्यवशेन विक्षिप्तभूमिकं चित्तं तत्त्वानां श्रवणमननादिपूर्वकं स्वरूपावधारणे सामर्थ्यम् अर्जयति। प्रायशः साधकानां चित्तं विक्षिप्तभूमिम् आस्ते। मेधायास्तथा सद्वृत्तीनां न्यूनाधिक्यप्रयुक्तविक्षिप्तचित्तयुक्तमनुष्या बहुधा भजन्ते। न केवलं साधकाः, देवा अपि तथात्वमासादयन्ति। अत्र चित्ते यः समाधिर्घटते स क्षणस्थायी भूत्वा योगपक्षे न वर्तते। विक्षिप्तभूमिकस्य समाधानं सोपप्लवं, ततश्च तादृशः साधको यदा विक्षेपाभिभूतो भवति तदा प्रमत्तस्तत्त्वज्ञानहीनः पृथग्जन इवाचरति। एतत् समाहृत्य योगभाष्ये समीरितम्– "तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते "[८] इति।

**एकाग्रभूमिः**– चतुर्थभूमिश्चित्तस्य। एकमीशमासमन्तात् गच्छद्रमते निश्चलीभवति, एकतत्त्वाभ्यासाख्यम् इति यावत्। अथवा एकाग्रमेकतानं नाम अत्र चित्तभूमौ सत्त्वगुणप्राधान्यं रजस्तमसोः न्यूनतया स्थितिः। इतरसकलविषयवृत्तिनिवृत्तौ केवलध्येयमात्रस्थितिपरा चित्तभूमिरेकाग्रतां भजते। वायुशून्यप्रदेशे रक्षितो दीपो यथा स्थिरतां भजते, तथैव चित्तं योगसाधनेन एकाग्रावस्थां सूचयति। अत्र बाह्यवृत्तिनिरोधो जायते। विभूतिपादे सूत्रकारेण मन्त्रितं– "ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः" [योगसूत्रम्– ३/१२] इति। तथाहि सर्वार्थतायाः निःशेषतः क्षये सति अतीतोत्पद्यमानौ एकाकारप्रत्ययौ चित्तस्य ऐकाग्रताकालीनः पुनः परिणामो भवति। एवं सजातीय एकैकः प्रत्ययो नश्यति अन्योऽन्य उत्पद्यते इति परिणामो

---

[८] योगसूत्रं, व्यासभाष्यम्– १/१

घटते। एकाग्रताचित्तस्वभावस्तथा घटते यदाऽहोरात्रं प्रायशः चित्तमेकाग्रं तिष्ठति। जाग्रदवस्थायामेकतानता स्वप्नावस्थायामपि तथैव एकाग्रस्वप्नं वा समस्ति। जाग्रद्संस्कारात् स्वप्नो जायते। जाग्रद्दशायामत्यधिककालव्यापि चित्तमेकाग्रं वर्तमानं सत् स्वप्नेऽपि तथात्वं भजते। एकाग्रतायां ध्रुवा स्मृतिर्वर्तते। आत्मस्मृतिसंस्कारे स्वप्नदशायाम् आत्मविस्मरणं न जायते, केवलं शारीरिकस्वभावेन इन्द्रियाणि जडानि राजन्ते। एकाग्रतापरिणामो भाषितो व्यासदेवेन– "समाहितचित्तस्य पूर्वप्रत्ययः शान्तः उत्तरस्तद्सदृश उदितः। समाधिचित्तमुभयोरनुगतं पुनस्तथैव आ समाधिभ्रेषादिति। स खल्वयं धर्मिणश्चित्तस्यैकाग्रतापरिणामः"[९] इति।

एकाग्रतायाः परिपक्वावस्थायां धर्ममेघसमाधेः सिद्धिर्जायते। सम्प्रज्ञातयोगस्य चरमः परिणामः असौ किल। एतादृशचित्ते यथार्थतत्त्वज्ञानेन प्रारब्धकर्मफलभोगे क्षीणे जाते कैवल्यहेतुपरता आयाति। सम्प्रज्ञातश्चतुर्धा भजते वितर्कविचारानन्दास्मितारूपानुगमेन– "वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः" [योगसूत्रम्– १/१७] इति।

एषा भूमिर्योगपदवाच्या कथं भवतीत्यवस्थां व्याचक्षाणेन व्यासदेवेन पुनर्व्याख्यातं प्रथमसूत्रभाष्ये– "यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति च क्लेशान्, कर्मबन्धनानि श्लथयति, निरोधमभिमुखं करोति, स सम्प्रज्ञातयोग इत्याख्यायते"[१०] इति। तत्त्ववैशारदीकृता वाचस्पतिना प्रोक्तं– "यस्त्वेकाग्रे चेतसि" इति। भूतमिति समारोपितमर्थं निवर्तयति। निद्रावृत्तिरपि स्वावलम्बने तमसि भूते भवत्येकाग्रेत्यत उक्तं स्यादिति, शोभनं नितान्ताविर्भूतसत्वं,तमःसमुद्रेकस्त्वशोभनस्तस्य क्लेशहेतुत्वादिति, द्योतनं हि तत्त्वज्ञानम् आगमाद्वानुमानाद्वा भवदपि परोक्षरूपतया न साक्षात्कारवतीम् अविद्यामुच्छिनत्ति, द्विचन्द्रदिङ्मोहादिष्वनुच्छेदकत्वादत आह– 'प्रेति', प्रशब्दो हि प्रकर्षं द्योतयन् साक्षात्कारं सूचयति, अविद्यामूलत्वादस्मिताऽऽदीनां क्लेशानां, विद्यायाश्चाविद्योच्छेदरूपत्वादविद्योदये चाविद्याऽऽदिक्लेशलमुच्छेदो विरोधित्वात् कारणविनाशाच्चेत्याह– "क्षिणोति च" इति, अत एव कर्मरूपाणि बन्धनानि श्लथयति, कर्म चात्रापूर्वमभिमतं, कार्ये कारणोपचारात्, श्लथयति=

---

[९]तत्रैव– ३/१२

[१०]तत्रैव– १/१

स्वकार्यादवसादयति। वक्ष्यति हि– सति मूले तद्विपाक इति, किंच निरोधमभिमुखं करोति= अभिमुखीकरोति"[११] इति। अयमाशयः। एकाग्रभूमौ समाधिः परमार्थभूतं ध्येयं वस्तु साक्षात्कारयति, ततश्च क्लेशानविद्यादीन् पञ्च क्षिणोति, ततोऽपि च कारणोच्छेदाद्धर्माधर्मरूपाणि बन्धनानि बुद्धिपुरुषयोर्बन्धकारणानि अदृष्टोत्पादनाक्षमाणि करोति तथा निरोधमसम्प्रज्ञातयोगमभिमुखीकरोति परवैराग्यजननद्वारा। ध्येयस्य साक्षात्करणात् निरोधविशेषरूपस्याकलनात् सम्प्रज्ञातयोगपदवीमाश्रयति एकाग्रभूमिः।

एकाग्रभूमौ लब्धस्थितिकस्य चित्तस्य किंस्वरूपा किंविषया वा समापत्तिः, सैव सूत्रिता– "क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" [योगसूत्रम्– १/४१] इति। अत्र ग्रहीतृग्रहणग्राह्याणि समापत्तेर्विषयाः। ग्राह्ये स्थूलसूक्ष्मभेदेन चतस्रः समापत्तयः– स्थूले सवितर्को निर्वितर्कः, सूक्ष्मे सविचारो निर्विचार इति। तथैव ग्रहीतृग्रहणगोचरायामपि समापत्तौ विकल्पाविकल्पभेदेन अनिषिद्धा सबीजता व्यवतिष्ठत इति चतस्रः। एवं सबीजसमाधौ समुदायेन अष्टौ सिद्धा भवन्ति इति तत्त्ववैशारदीकारः[१२]। भिक्षुनये तु समापत्तिः षोढा इति।

वितर्कानुगते सवितर्कसमापत्तिः सूत्रितैवं– "तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः" [योगसूत्रम्– १/४२] इति; किञ्च निर्वितर्कसमापत्तिः सूत्रितेत्थं– "स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का" [योगसूत्रम्– १/४३] इति। उभयत्र स्थूलतया ग्राह्यग्रहणे व्यवस्थिते। पुनः विचारानुगते सविचारनिर्विचारसमापत्तिद्वयं व्यवस्थितम्। एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता" [योगसूत्रम्– १/४४] इति। एवं सूक्ष्म्यभूतोपलब्धिका समापत्तिः घटते विचारानुगतद्वैविध्ये। पुनः चतुर्विंशतितत्त्वात्मके सुखरूपपुरुषार्थे सुखाकारा समापत्तिः यथा– आनन्दानुगता, ग्रहीतृविषये यथा अस्मितानुगता समापत्तिः तत्रापि सूक्षेन्द्रियादिलब्धा समापत्तिर्निर्विचारादिवद् घटते।

सोदाहरणं वितर्कादीनां व्यवहार उल्लिख्यते। सवितर्कसमापत्तौ सूर्य एकं स्थूलमालम्बनम्। तत्र कृते समाधौ सूर्यमात्रनिर्भासा चित्तवृत्तिरुदेति। सूर्यसम्बन्धीयमाकारदूरत्वोपादानादिकं सम्यग् ज्ञानं भासते। एतज्ज्ञानं शब्दाद्

---

[११]सांख्यसूत्रं, तत्त्ववैशारदी– १

[१२]तत्रैव– १/४६

असङ्कीर्णं भवति। यथा सूर्यो वृत्ताकारः, सूर्य एतावद्दूरस्थ इत्यादिः। इत्थं शब्दार्थज्ञानविकल्पसङ्कीर्णः प्रत्ययो घटते। स्थूलविषयकप्रज्ञया चित्तं यदा पूरितं भवति। तादृशज्ञाने चित्तं सदोपरञ्जितं सद्वर्तते तदा घटते सवितर्का समापत्तिः। निर्वितर्कसमापत्तौ तावत् सूर्ये समाहिते सूर्यस्य रूपमात्रनिर्भासो जातः। तादृशे रूपमात्रज्ञानगोचरे सति सूर्यसम्बन्धीयविषयान्तरनामादीनां विस्मरणं स्यात्। तादृशशब्दार्थज्ञानविकल्पसंकीर्णतारहिते सूर्यरूपमात्रके स्वरूपशून्यवत् ध्याने जाते यो भावः समुदेति स एव निर्वितर्कसमापत्तिशब्देन संज्ञितो भवति। यावन्तः स्थूलविषयाः योगिना तादृशभावेनानुभूताः केवलरूपरसगन्धस्पर्शशब्दगुणयुक्तत्वेन विलोकितास्ते। वाङ्मयचिन्ताजन्यव्यवहारिकगुणान् बाह्यपदार्थे आरोप्य लोकतो व्यवहारसिद्धिर्या भवति तस्या भ्रान्तिर्योगिनाऽनुभूयते। स्थूलद्रव्यविषयेषु केवलशब्दादिगुणपञ्चकं विकल्पशून्यतया तदा प्रज्ञारूढं भविष्यति। तादृशं प्रज्ञामयं चित्तं निर्वितर्कां समापत्तिं धत्ते। एषः स्थूलभूतस्य चरमः साक्षात्कारः। एतेन जाया-पुत्र-काञ्चनादिसम्बन्धलोकिकमोहकरदृष्टिरपसृता जायते, तेषां सततं रूपादिगुणपञ्चकसमुदायरूपेणोपलब्धेः। स्थूलविषयगतवाक्यहीनचिन्तया निर्वितर्कध्यानत्वेन तेन च पूरितं चित्तं निर्वितर्कसमापत्तिं भजते।

निर्वितर्कसमापत्तौ विकल्पविहीनेन ध्यानेन सूर्यरूपसाक्षात्कारद्वारा पुनस्तत् सूक्ष्मावस्थोपलब्धौ प्रक्रियाविशेषेण चित्तस्य स्थिरतरात् स्थिरतमत्वापादनेन रूपतन्मात्रसाक्षात्कारपरत्वम्। प्राथम्येन श्रुतानुमानेन "भूतकारणं तन्मात्रम्" इति विनिश्चित्य विचारपूर्वकतया चित्तं स्थिरीकुर्वन् सूक्ष्मभूतोपलब्धौ यदा प्रवर्तयति योगी तदा सविचारा समापत्तिर्जायते। एषा समापत्तिः शब्दार्थज्ञानविकल्पसङ्कीर्णा, देशकालनिमित्तव्यवच्छिन्ना च। एतेन सूर्यस्य स्थितिदेशेन, व्यक्तरूपेण अर्थात् अतीतानागतकालभिन्नत्वे सति वर्तमानकालावच्छिन्नत्वेन रूपवत्त्वेन, ज्योतिः धर्मनिमित्तत्वेनावच्छिन्ना भवति सा प्रज्ञा।

तत्र रूपतन्मात्रे साक्षात्कृते नीलपीताद्यसंख्यरूपेषु केवलैकाकाररूपपरमाणुः योगिना प्रत्यक्षीभूतः। शब्दादितन्मात्रेषु तद्रूपतया नेयः। बाह्यविषयेभ्यो जायमानाः सुखदुःखमोहाः स्थूलविषयम् अवलम्ब्योत्पद्यन्ते। स्थूलविषयेषु नानाभेददर्शनात् तादृशभेदेभ्यः सुखकरत्वादिसंघटनोपलब्धिः। अतः एकाकारसूक्ष्मविषयोपलब्धौ वैषयिकसुखादेरपगतिः लभ्यतेतराम्। "सुखादिशून्यमेतत्तन्मात्रम्", "एवम् उपलब्धव्यम्" इत्यादिशब्दादिविकल्पसङ्कीर्णप्रज्ञया पूरितं चित्तं सूक्ष्मभूतविषयक-

सविचारसमापत्तिसंज्ञां भजते। सविचारसमापत्तिविषयाः तन्मात्रेण साकमहङ्कार-महदव्यक्तानामपि ग्रहणीयाः– "सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम्" [योगसूत्रम्–१/४५] इति सूत्रितत्वात्।"

सविचारायां समापत्तौ कुशलतायां प्राप्तायां शब्दादिसङ्कीर्णा स्मृतिर्यदा समुच्छिद्यते तदा केवलसूक्ष्मविषयमात्रस्य निर्भासकः समाधिः जायते। तादृशविकल्पहीनध्येयभावेषु चित्तं यदा पूर्णमास्ते तदा घटते निर्विचारा समापत्तिः। निर्विचारा देशकालनिमित्तानवच्छिन्ना निष्पद्यते। अर्थात् सा निर्विचारा सर्वदेशस्थविषयस्य सकलकालव्यापिविषयस्य युगपत्सर्वधर्मस्य निर्भासिका भवति। सविचारायान्तु धर्मविशेषं निमित्तं कृत्वा तस्य नैमित्तिकस्वरूपस्य कस्यचिद्विषयस्य प्रज्ञा जायते। निर्विचारायां पूनः सकलधर्माणां युगपज्ज्ञाने जाते निमित्तनैमित्तिकभावाभावो विद्यते। ग्राह्यविषयकसमापत्तिः निर्विचारां यावद्वर्तते।

इन्द्रियगतप्रकाशशीलोऽभिमान आनन्दमात्रविषयक एव। अत्रस्था समापत्तिः ग्रहणविषयका भवति। किञ्च इन्द्रियकारणभूतः अस्मिताख्यः अभिमानविषयको जातः। पुनरस्मीतिमात्रः अस्मितामात्रो वा यो भावः तद्विषयकसमापत्तिः ग्रहीतृविषयकनिर्विचारा।

अत्रेदं सम्प्रधार्यं यत् अलिङ्गम् अव्यक्तप्रकृतिं वा ध्येयविषयत्वेन संगृह्य निर्विचारा समापत्तिर्न प्राप्नोति। अव्यक्तायाः ध्येयरूपत्वेन आलम्बनं न भवितुमर्हेत्, सा तु लीनावस्था। तथा चोक्तं महाभारते–

अव्यक्तं क्षेत्रलिङ्गस्थं गुणानां प्रभवाम्यहम्।
सदा पश्याम्यहं लीनं विजानामि शृणोमि च॥

अव्यक्तमात्रनिर्भास इत्याख्यसमाधेः असम्भवात् तादृशप्रज्ञा नोदेति। तथापि प्रकृतिलयः अव्यक्ततापत्तिम् अनुभेजे। नात्र समापत्तिसदृशसम्प्रज्ञातयोगो मन्तव्यः, तथापि अव्यक्तविषयकसविचारसमापत्तिः सम्भवेत्। चित्तस्य लीनावस्थायाः सम्प्राप्तौ तदनुस्मृत्या अव्यक्तविषयकसविचारप्रज्ञा उद्भवेत्, या किल अव्यक्तविषयकसविचारसमापत्तिं नूनं भजते।

सम्प्रज्ञातसमाधौ सकलभेदेषु संसारस्य मूलं कारणमविद्या विद्यते। तथा सति मोक्षचिन्ता अपास्ता, अनित्याः लोकाः केचन निर्दिष्टाः शास्त्रेषु। ध्येयतातिरिक्तविषयकवृत्तिनिरोधाख्यसम्प्रज्ञातयोगस्य चातुर्विध्यं विषयस्य तथा वैशिष्ट्यस्य भेदेन निर्णीतम्। ते च योगाः वितर्कानुगत-विचारानुगत-सानन्द-

सास्मिताख्याः। ते च क्रमेण स्थूलविषये चतुर्भुजादिमूर्तिरूपे पञ्चमहाभूततत्वान्विते वितर्कानुगतः, सूक्ष्मतत्त्वविषये भूतसूक्ष्म-तन्मात्राहङ्कार-महत्तत्त्वप्रधानाख्ये विचारानुगतः, इन्द्रियाणां सात्विकांशप्रसूततया एकादशेन्द्रियतत्वे सानन्दः, अहङ्कारेण बुद्ध्या वा अभेदापत्तेः आत्मचैतन्ये सास्मित इति सञ्ज्ञायन्ते। एवं समासतो निरुक्तः सम्प्रज्ञातयोगः। असौ साक्षात्कारात्मकः समाधिः समापत्तिपरिभाषया व्यक्तः। एषा समापत्तिश्चतुर्धा नीता। तथापि ग्राह्य-ग्रहण-ग्रहीतृभेदेन त्रिधा विभक्ता। तेषु त्रिषु भेदेषु ग्रहीतृ-ग्रहणव्यतिरेकेन स्थूल-सूक्ष्म-विषयान्वितवितर्कविचारोभयपरतया ग्राह्यसमापत्तिर्द्वेधा भक्ता। इन्द्रियविषयक-समापत्तिर्ग्रहणसमापत्तिः, अस्मितास्पदग्रहीतृपुरुषविषयकसमापत्तिरिति भेदः स्पष्ट एव। भोजवृत्तिनये प्रकृतिलीनचित्ते सत्तामात्रप्रतीतिरेव सास्मिता, परमात्मा-लम्बनेनैव ग्रहीतृसमापत्तिसम्भवात् जीवन्मुक्तेस्तथा कैवल्यस्य सिद्धेरिति। पुनः वैशिष्ट्यविचारे स्थूलविषयगतशब्दसंकेतस्मृत्यनुबिद्धे सवितर्कसमापत्तिः, शब्दसंकेतस्मृत्यननुबिद्धे निर्वितर्कसमापत्तिः, सूक्ष्मविषयगतशब्दसंकेतस्मृत्यनुबिद्धे सविचारसमापत्तिः, सूक्ष्मविषयगतस्मृत्यननुबिद्धे निर्विचारसमापत्तिः, शब्दानुबिद्ध-तदननुबिद्धरूपे द्विविधा ग्रहीतृसमापत्तिरिति अष्टधा वाचस्पतिनये, भिक्षुनये तु चतुर्विधा ग्राह्यसमापत्तिः, ग्रहणगता ग्रहीतृगता च एकैकश इति षोढा। एवम् अष्टविधसम्प्रज्ञातयोगत्वं षड्विधसम्प्रज्ञातयोगत्वमिति विचारणा मिश्रभिक्षुमते यथाक्रमम्।

तत्र ग्राह्यसमापत्तौ मधुप्रतीका, ग्रहणसमापत्तौ मधुमती, ग्रहीतृसमापत्तौ विशोका नाम भूमित्रयं लभ्यते। धारणाध्यानसमाधिरूपसंयममुखेन समाधौ इन्द्रियजयवशात् मनोजवित्व-विकरणभाव-प्रधानजयसम्भवेन मधुप्रतीका सिद्धिः घटते। पुनर्योगिना निर्विचारसमापत्त्युत्कर्षेण ऋतम्भरप्रज्ञालाभात् मधुमती सिद्धिर्लभ्यते। सत्त्वपुरुषान्यताख्यातिवशेन सर्वभावाधिष्ठातृत्व-सर्वज्ञत्वलाभात् विशोका भूमिः सिध्यते। विशोकायां योगी सकलक्लेशकर्मक्षयेन जीवन्मुक्तस्तिष्ठति।

प्रकारान्तरेण सम्प्रज्ञातयोगिनश्चतुर्धा भूमिर्वर्तते। प्रथमकल्पिका, निर्वितर्क-समापत्त्या ऋतम्भरप्रज्ञमधुभूमिका, निर्विचारसमापत्त्या प्रज्ञाज्योतिष्कल्पा, ग्रहीतृ-समापत्त्या अतिक्रान्तभावनीया।[१३] अतिक्रान्तभावनीयदशायां योगसारदिशा जीवन्मुक्तत्वमासाद्यते। योगभाष्येऽपि विभूतिपादे चतुःपञ्चाशत्सूत्रे "तारकं

[१३]योगसूत्रं, मणिप्रभा– १/२

सर्वविषयं सर्वथाविषयमक्रमञ्चेति विवेकजं ज्ञानम्” [योगसूत्रम्– ३/५४] इति किञ्चिद्भिन्नप्रकारेण वर्णितम्।

सम्प्रज्ञातसमाधिगतं मुख्यं फलं तावत् विवेकख्यातिलाभेन आत्मज्ञानद्वारा अज्ञाननिवृत्तौ अभिमानरागद्वेषादिसंसारबीजनिवृत्तौ आदौ जीवन्मुक्तेः अनन्तरं कैवल्यलाभः। गौणं किल भूतेन्द्रियप्रकृतिजयमुखात् नानासिद्धिः, अणिमादि-ऐश्वर्यप्राप्तिः, सर्वज्ञतालाभ इति विविधविभूतिफलं सम्प्रज्ञातस्य।

**निरुद्धभूमिः–** चित्तभूमेरन्तिमाऽवस्था, अर्थात् एषा पञ्चमी किल। वृत्तीनां स्वकारणे चित्ते लीनत्वप्राप्तिः निरोधशब्देनोच्यते। चित्तस्यैषा निरोधावस्था निरुद्धेति। क्षिप्तावस्थायां चित्ते तमोगुणस्तथा सत्त्वगुणो निरुद्धौ वर्तेते। मूढावस्थायां चित्ते रजोगुणस्तथा सत्त्वगुणो निरुद्धौ स्तः। विक्षिप्तावस्थायां केवलं तमोगुणो निरुद्ध आस्ते। अत्र निरोध आपेक्षिको विद्यते। एकाग्रावस्थायां चित्तं केवलं ध्येयरूपं चतुर्भुजाद्याख्यं वृत्तिमुखेनापद्यमानमितरबहिर्वृत्तीनां निरोधमाभजते। एवं केवलं ध्येयाकारवृत्तिरवशिष्यतेऽत्र। निरूद्धावस्थायाम् एकाग्रावस्थाप्राप्तध्येयाकारवृत्तिनिरोधो जायते। निरोधसमाधेः अभ्यासद्वारा चित्तस्य अधिककालस्थायी निरोधो यदा आयच्छते तदा सा निरोधभूमिर्नाम। सूत्रितं पातञ्जले– “विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः” [योगसूत्रम्– १/१८] इति। तथा च विरामो वृत्तिनिरोधस्तस्य प्रत्ययः कारणं परवैराग्यमित्यर्थः, तस्य अभ्यासः तदनुष्ठानपौनःपुन्यं, तदेव पूर्वं यस्य सः तथोक्तः। विशदीकृतं भाष्यकारेण– “सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसम्प्रज्ञातः”[१४] इति।

अयमाशयः। असम्प्रज्ञातसमाधौ चित्तस्य सकला वृत्तिः निवर्त्तते। अतो न किमपि ज्ञानं समुदेति। विरामप्रत्ययस्य अभ्यासपूर्वतया एवं घटते। सकलवृत्तीनां विरामस्य प्रत्ययः कारणं वा परवैराग्यं बोधयति। तथा च सम्प्रज्ञातसमाधौ लब्धे विवेकख्यातिरूपे तत्त्वज्ञाने तस्य च गुणाधिकारात् तत्र वैराग्योत्पादनेन निर्विकल्पकपरवैराग्याभ्यासवशात् धर्ममेघसमाधिरसम्प्रज्ञाते समुदेति। सर्ववृत्तिनिरोधसत्त्वेऽपि ततः पुनर्व्युत्थानशङ्कया संस्कारशेषोऽवसीयते असम्प्रज्ञातसमाधौ। कैवल्यदशायां चित्तस्य अत्यन्तविलयेन चित्तवृत्तेर्निवृत्तौ

[१४] योगसूत्रं, व्यासभाष्यम्– १/१८

कस्यापि संस्कारस्यानवकाशेन व्युत्थानासम्भव इति बोद्धव्यम्। वस्तुतः असम्प्रज्ञातयोगः निर्विषयकः, कर्मबीजाभाववशेन निर्बीज इति अभिहितो भवति। समीरितं व्यासभाष्ये– "विरामप्रत्ययो निर्वस्तुक आलम्बनीक्रियते, स चार्थशून्यः, तदभ्यासपूर्वं हि चित्तं निरालम्बनम् अभावप्राप्तमिव भवतीति, एष निर्बीजः समाधिः असम्प्रज्ञातः"[१५] इति।

असम्प्रज्ञातसमाधिर्द्विविधः प्रोक्तः। भवप्रत्यय उपायप्रत्ययश्च। भवप्रत्ययो निकृष्ट उपायप्रत्ययश्चोत्कृष्टो योगिनां भवति। तत्र भवशब्दो मिश्रनये अविद्या, भोजराजमते संसारः, भिक्षुनये जन्म, प्राचीनबौद्धशास्त्रे जन्मनिर्वर्तककारणम् (भव पच्चया जाति) इति नानार्थपरः। वस्तुतः भवशब्दः केवलमविद्यां न बोधयति, अपि च सूक्ष्माविद्यामूलकसंस्कारं सूचयति यस्मात् विदेहादेरभिव्यक्तिर्घटते। योगदर्शने भवप्रत्ययगतं सूत्रम्– "भवप्रत्ययो विदेहप्रकृतिलयानाम्" [योगसूत्रम्– १/१९] इति। एतेन विदेहलीनानां तथा प्रकृतिलीनानां भवप्रत्ययो विद्यते। भव एव प्रत्ययः कारणं स एव भवप्रत्ययाख्योऽसम्प्रज्ञातयोगः। अविद्यामूलकसंस्कारवशेन आत्मभावस्योत्पत्तिः, अविच्छिन्नं कालं यावत् स्थितिः, अनन्तरं नाश इति जन्मशब्दवाच्यः। तत्र विदेहानां प्रकृतिलीनानां पदजन्यं जन्म अभिहितं भवति। उक्तं भाष्यकारेण– "विदेहानां देवानां भवप्रत्ययः, ते हि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिबाहयन्ति।"[१६] इति। अत्र विदेहादिजन्मकारणमेवम्। प्रकृतेस्तथा तद्विकृतेः आत्मानं पृथग्रूपेणाननुभवो यत्राविद्यैव कारणम्। समाधिसंस्कारबलेन तत्तद्दशामाप्नुवन्ति ते। अतः सूक्ष्माविद्यामूलकजन्महेतुसंस्कार एव भवः।

विदेहदेव-शब्दस्य व्याख्याने वैमत्यं विद्यते नाम। भोजराजेन– सानन्दसमाधौ बद्धधृतयः सन्तः प्रधानपुरुषतत्त्वासाक्षात्कारात् देहाहंकारशून्यत्वेन विदेहा भवन्तीति ईरितम्। वाचस्पतिमिश्रेण "भूतेन्द्रियाणामन्यतममात्मत्वेन प्रतिपन्ना-स्तदुपासनया तद्वासनावासितान्तःकरणाः पिण्डपातानन्तरमिन्द्रियेषु भूतेषु वा लीनाः"[१७] इति व्याख्यातम्। भिक्षुपादेन– "शरीरनैरपेक्ष्येण बुद्धिवृत्तिमत्तो विदेहाः"[१८] इति। योगसूत्रभाष्यकृदभिमतं यत् विदेहानां निर्बीजसमाधिर्घटत

[१५]तत्रैव,– १/१८

[१६]तत्रैव– १/१९

[१७]योगसूत्रं, तत्त्ववैशारदी– १/१८

[१८]योगसूत्रं, योगवार्तिकम्– १/१८

इति। सानन्दसमाधेः सम्प्रज्ञातान्तर्गतत्त्वेन सबीजत्वमापन्नस्य कथं निर्बीजे समुन्नयनम्। अत एवं व्याख्यातुं युज्यते हरिरहानन्दारण्यपादम् अनुसृत्य यत् स्थूलग्रहणे आसीनो योगी विषयत्यागेनानन्दमनुभवन् विषयत्यागञ्च परमपदज्ञानम् अभिवाञ्छति, किञ्च शब्दादिग्राह्यविषये विरागयुक्तः सन् शब्दादिज्ञानं निरुणद्धि, तदा विषयसंयोगाभावेन करणवर्गः लीनो भवति। स तादृशविषयग्रहणरोधरूपाक्लिष्टसंस्कारसञ्चयेन देहान्ते विलीनकरणः सन् निर्बीजमसमाधिलाभात्मकसंस्कारबलेन अविच्छिन्नकालं कैवल्यपदमिवानुभवन्नास्ते। पुनर्यो योगी सम्यक्तया विषयरोधप्रयत्नमसाधयित्वा आनन्दमयसालम्बनग्रहणतत्त्वध्यानेन तृप्तिं याति देहान्ते च यथायोग्यलोकम् अतिवाहयन् दिव्यमायुष्कालं यावत् ध्यानमुखं भुङ्क्ते। परमपुरुषतत्त्वसाक्षात्काराभावेन विदेहानामदर्शनबीजसत्त्वात् पुनरावर्तनं जायते।

"वैराग्यात् प्रकृतिलयः" [सांख्यकारिका– ४५] इति सांख्यकारिकायां वैराग्यसत्त्वेऽपि तत्त्वज्ञानाभावात् प्रधानबुद्ध्यहङ्कारपञ्चतन्मात्राख्यप्रकृतिषु अष्टसु अन्यतमे लीनो भवतीति गौडपादाचार्येण मन्त्रितम्। किन्तु योगसूत्रोक्तप्रकृतिलयशब्देन मूलप्रकृतौ लयोऽभिप्रेतः, चित्तस्य लयप्राप्त्या निर्बीजसमाधेः सम्भवात्। प्रकृत्यन्तरेषु चित्तलयो नाभिप्रेतः। कारणेन साकमविभागापन्न एव लयः, कार्यस्यैव कारणे लीनत्वात्। चित्तं कदापि बुद्ध्यादिषु लीनं न भवति, तस्य योगिचित्तस्य प्रधान एव लयसत्त्वात्। प्रकृतिलये परमपुरुषतत्त्वसाक्षात्काराभावेन तमेव लयं परमार्थं मन्यमानो योगी अन्तर्मुखो वशीकारवैराग्येण विषयवियोगहेतुवशात् चित्तलयं प्रधानं साधयति। असावेव प्रकृतिलयः। प्रकृतिलयादिपदविषयाः वायुपुराणे इत्थं मन्त्रिताः–

दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः॥
बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाः॥

तत्र "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" [श्रीमद्भागवद्गीता– ९/२१] इति स्मृतिबलेन संसारचक्रे पुनरागमनम्। विवेकख्यातिं यावत् चित्तस्याधिकारसमाप्तौ विषयप्रवृत्तिरूपं बीजं सम्यक्तया दग्धं भवति। अधिकारसमाप्त्यनन्तरं चित्तस्य चरितार्थता।

उपायप्रत्यय उत्कृष्टयोगिषु वर्तते। समाधिप्राप्तेः ये उपायाः विहिताः योगशास्त्रे तद्विषयकं सूत्रं "श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्"

[योगसूत्रम्– १/२०] इति। अत्र योगिनः श्रद्धादिपञ्चकेन वैराग्यात् असम्प्रज्ञातः समाधिर्घटते। सम्प्रज्ञातसमाधिना समासादिते तत्वज्ञाने परवैराग्याभ्यासेन असम्प्रज्ञातसमाधिर्जायते। विवेकख्यातिजनकसम्प्रज्ञातसमाधेः प्रसिद्धोपायाः श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञाख्याः विहिताः। एतैरुपायैः विवेकज्ञाने जाते तादृशविवेकाभ्यासेन परवैराग्यस्योत्पत्तेः कैवल्यलाभे प्रवेशः। असौ समाधिर-सम्प्रज्ञात एव। सकलज्ञेयानां सम्प्रज्ञानेन परवैराग्यवशात् तस्यापि सम्प्रज्ञानस्य निरोधेन असम्प्रज्ञातसमाधिशब्देन उच्यते। व्यासभाष्ये तथा व्याखातं– "चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता च, सत्त्वगुणात्मिका चेयमतो विपरीता विवेकख्यातिरिति। अतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि, तदवस्थं संस्कारोपगं भवति, स निर्बीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायत इत्यसम्प्रज्ञातः"[१९] इति। निरोधसमाधिसंस्कारेण सम्प्रज्ञात-समाधिजनितसंस्कारा नष्टा भवन्ति, भृशं निरोधाभ्यासेन चित्तं कैवल्यभाजनं सत् स्वकारणप्रकृतौ लीयते, पुरुषः स्वरूपेण तिष्ठति इति कैवल्यं पुरुषस्य।

योगस्य मुख्यमुद्देश्यं कैवल्यलाभः परा मुक्तिर्वा। सम्प्रज्ञातसमाधौ विवेकख्यातौ समुत्पन्नायां तदात्मज्ञानवशेन जीवद्दशायां जीवन्मुक्तिलाभो देहान्ते च कैवल्यप्राप्तिः। परन्तु असम्प्रज्ञातयोगेन द्रुततया प्रारब्धक्षये जाते कैवल्यं त्वरितं भवति। एतेनैवं प्रतीयते, सम्प्रज्ञातसमाधिस्थले आत्मसाक्षात्कारे जातेऽपि प्रारब्धनाशं यावत् मोक्षासम्भवात् प्रारब्धभोगः अवश्यमेव करणीयो योगिना। असम्प्रज्ञातसमाधिना योगी प्रारब्धं विनश्यैव स्वेच्छानुसारेण कैवल्यप्राप्तिर्घटत इति उत्कर्षः असम्प्रज्ञातस्य। उक्तञ्च भिक्षुणा योगसारे– "असम्प्रज्ञातयोगस्त्वखिलवासनाक्षयेण प्रारब्धातिक्रमद्वारा झटिति स्वेच्छया मोक्ष एवोपयुज्यते (न तु नियमेन)" [योगसारः– १/२] इति।

एवं सर्वथा विचार्यमाणे योगस्य चित्ताश्रयत्वेन चित्तभूमिश्चित्तावस्थावश्यमेव प्रार्थनीयेति शम्।

---

[१९] योगसूत्रं, व्यासभाष्यम्– १/२

# बौद्धनिकाये प्रमाणम्

टिना-घोषः*

## १. उपोद्घातः

विविधानि दर्शनानि हि वैरिञ्चप्रपञ्चे मनुजानाम् आध्यात्मिका-धिभौतिका-धिदैविक-रूपदुःखत्रय-निवृत्तये प्रवृत्तानि। तेषु वेदस्य प्रामाण्यम् उररीकृत्य प्रवृत्तानि आस्तिकदर्शननाम्ना अभिधीयन्ते। वेदस्य प्रामाण्यम् अस्वीकृत्य प्रवृत्तानि नास्तिकानि उच्यन्ते। नास्तिकेषु दर्शनेषु अन्यतमम् इदं बौद्धदर्शनम्। दृश्यते अनेन इति दृशिधातोः करणे ल्युटि दर्शनशब्दो व्युत्पद्यते। ज्ञानसाधनं हि तदर्थः। ऋते ज्ञानान्न मुक्तिः। अविद्यया भवति बन्धनं तस्य खण्डनं च विशुद्धेन ज्ञानेन भवति। अतः परमपुरुषार्थमोक्षाय विशुद्धं ज्ञानमपेक्षते। ज्ञानस्य शुद्धत्वाशुद्धत्वविचारश्च प्रमाणं विना न सिध्यति। अतः प्रमेयप्रतिपादके बौद्धदर्शनेऽपि प्रमाणस्यास्त्यपेक्षा। तदुक्तं प्रमाणव्युत्पादनप्रयोजनं धर्मकीर्तिना न्यायबिन्दौ– "सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद्व्युत्पाद्यते" इति। ततश्च दिङ्नागधर्मकीर्त्यादयो न्यायधुरन्धरा बौद्धाचार्याः प्रमाणतत्त्वप्रतिपादकान् ग्रन्थान् विरचयामासुः। तेषां ग्रन्थान् अधिकृत्यैव प्रमाणस्वरूपं निरूप्य गौतमप्रतिपादितन्यायेन सह तुलनात्मकम् अध्ययनं विधाय आगमप्रमाणं बौद्धैः स्वीकार्यं न वेति प्रबन्धेऽस्मिन् पर्यालोचयिष्यते।

## २. प्रमाणम्

सर्वपुरुषार्थसिद्धिनिमित्तं प्रमाणमनुस्रियते प्रेक्षावद्भिरिति प्रमाणमादौ व्युत्पाद्यते। प्रमीयतेऽर्थोऽनेनेति माधातोः करणे ल्युटि प्रमाणशब्दो निष्पद्यते। अत एव प्रमाकरणं प्रमाणमिति न्यायविदः। बौद्धानां नये प्रमाणं सम्यग्ज्ञानमपूर्वगोचरम् इति सामान्येन वक्तुं शक्यते। प्रमाणमेव सम्यग्ज्ञानं, सन्देहविपर्यासदोषरहितत्वात्। अविसंवादकं ज्ञानं हि लोके विशुद्धं ज्ञानमित्यभिधीयते। न च संशयविपर्यासज्ञानयोरविसंवादकत्वमस्ति, यथा– स्थाणुर्वा पुरुषो वा इति संशयज्ञानस्य, मरीचिकासु जलज्ञानमिति विपर्ययस्य। अपूर्वो गोचरः अस्येत्यपूर्वगोचरम्। गोचरः विषयो घटादिः तदर्थप्रापणयोग्यं

---

*स्वतन्त्रशोधकर्त्री

ज्ञानं प्रमाणम्। एवञ्च यज्ज्ञानमज्ञातमर्थं द्योतयति, वस्तुस्थित्यविरोधि अर्थाद् अविसंवादि तत् प्रमाणम्। कल्पनाश्रितं ज्ञानं हि विसंवादीत्युच्यते। एतत्सर्वं सङ्गृह्य धर्मकीर्तिना प्रमाणवार्तिके प्रमाणमित्थं लक्षितम्–

प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः।
अविसंवादनं शाब्देऽप्यभिप्रायनिवेदनात्॥ [प्र.वा. १.३] इति।

## २.१. प्रमाणभेदः

प्रमाणानां संख्यानिर्णये विवदन्ते दार्शनिकाः। प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकः। प्रत्यक्षमनुमानं शाब्दं चेति सांख्यः। प्रत्यक्षमनुमानमुपमानं शाब्दं चेति नैयायिकः। प्रत्यक्षमनुमानं शाब्दमुपमानमर्थापत्तिरिति प्राभाकराः। प्रत्यक्षमनुमानं शाब्दमुपमानमर्थापत्तिरनुपलब्धिश्चेति भाट्टाः। "द्विविधं सम्यग्ज्ञानम्। प्रत्यक्षम-नुमानञ्च"[१] इति द्वे प्रमाणे इति बौद्धाः। प्रमाणस्य द्वैविध्ये हेतुमाह धर्मकीर्तिः–

मानं द्विविधं विषयद्वैविध्यात् शक्त्यशक्तितः।
अर्थक्रियायां केशादिर्नार्थोऽनर्थाधिमोक्षतः॥ [प्र.वा. २.१] इति।

अर्थक्रियायां शक्त्यशक्तितः स्वलक्षणस्यार्थक्रियाशक्तत्वात् विजातीयव्यावृत्त्युपकल्पितस्य च सामान्यस्याशक्तत्वात् विषयस्य स्वलक्षणसामान्यलक्षणरूपतया द्वैविध्यं तस्मात् विषयद्वैविध्यात् मानं प्रत्यक्षानुमानभेदेन द्विविधम्। एवञ्च बौद्धानां तन्त्रे स्वलक्षणं सामान्यलक्षणञ्चेति प्रमेयं द्विविधम्। प्रमेयद्वैविध्यात् तद्ग्राहकं प्रमाणमपि द्विविधं प्रमाणमनुमानञ्च। तत्र प्रत्यक्षं स्वलक्षणग्राहकम्, अनुमानञ्च सामान्यलक्षणग्राहकम्। तदुदितं प्रमाणसमुच्चयवृत्तौ दिङ्नागेन– "अत्र प्रमाणं द्विविधमेव। कुतश्चेत् द्विलक्षणं प्रमेयम्। स्वसामान्यलक्षणाभ्यां भिन्नलक्षणं प्रमेयान्तरं नास्ति।" इति। यस्य प्रमेयस्य स्वरूपं शब्दादिप्रयोगं विनैव ग्रहीतुं शक्यते तत्स्वलक्षणम्। सामान्यलक्षणन्तु अनेकवस्तुभिः सह यदा प्रमेयस्य सामान्यं रूपं गृह्यते तदा सम्भवति इति सामान्यरूपेण वक्तुं शक्यते। अस्य स्फुटप्रतिपादनं विहितं धर्मकीर्तिना प्रमाणवार्तिके–

सदृशासदृशत्वाच्च विषयाविषयत्वतः।
शब्दस्यान्यनिमित्तानां भावे धीसदसत्त्वतः॥ [प्र.वा. २.२] इति।

सदृशासदृशत्वाद् विषयद्वैविध्यम्। सदृशं सामान्यं सर्वव्यक्तिसाधारणत्वात्,

---

[१]न्यायबिन्दुः

असदृशं स्वलक्षणं सर्वतो व्यावृत्तत्वात्। एवञ्च यत् सदृशरूपेण प्रतीयते तत्सामान्यलक्षणम्। तदुक्तम्–

सदृशेनैव रूपेण यस्य संवेदनोदयः।
सामान्यलक्षणं तत्स्यात् स्वरूपस्यात्र वेदने॥ इति।

यद्धि सादृश्येन न प्रतीयते अपि तु असदृशत्वेनासाधरणत्वेन प्रतीयते तत्स्वलक्षणम्। तत्र सामान्यलक्षणमनुमानस्य विषयो भवति, तदर्थक्रियासमर्थं न भवति, तच्च संवृतिसत्,[२]स्वलक्षणन्तु प्रत्यक्षस्य विषयो भवति, अर्थक्रियासमर्थं भवति, परमार्थसच्च भवति। तत्सङ्गृहीतं धर्मकीर्तिना प्रमाणवार्तिके–

अर्थक्रियासमर्थं यत्तदेव परमार्थसत्।
अन्यत्संवृतिसत्प्रोक्तं ते स्वसामान्यलक्षणे॥ [प्र.वा. २.३] इति।

स्वलक्षणसामान्यलक्षणरूपविषयद्वैविध्यात् प्रत्यक्षानुमानरूपप्रमाणद्वैविध्यम्।

## २.१.१. प्रत्यक्षम्

प्रतिगतमक्षं प्रत्यक्षम्। "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासः। अक्षपदमत्र त्वक्चक्षुःश्रोत्रघ्राणरसनाख्येन्द्रियवाचकम्। तस्मादुत्पन्नं ज्ञानं प्रत्यक्षमित्यभिधीयते। ननु यद्यदक्षाश्रितं ज्ञानं तत्तत्प्रत्यक्षमिति चेत् वक्ष्यमाणमानसादिप्रत्यक्षाणामिन्द्रियादनुत्पत्तेः प्रत्यक्षत्वं न स्यात् इति चेन्न। अक्षाश्रितत्वं हि व्युत्पत्तिनिमित्तं शब्दस्य न तु प्रवृत्तिनिमित्तम्। यथा गच्छतीति गौरिति गमनक्रियायां व्युत्पादितोऽपि गोशब्दो गोत्वं प्रवृत्तिनिमित्तीकरोति, ततश्च गच्छत्यगच्छति च गवि गोशब्दः सिद्धो भवति। तथा प्रत्यक्षस्य प्रवृत्तिनिमित्तं तु अर्थसाक्षात्कारित्वमिति बोध्यम्। ततश्च यत्किञ्चिदर्थस्य साक्षात्कारिज्ञानं तत्प्रत्यक्षमुच्यते। तेन च स्वसंवेदनादिकमपि ज्ञानं स्वसंवेदनारूपमर्थं साक्षात्करोतीति प्रत्यक्षशब्दवाच्यत्वं सिद्ध्यति। तत्र प्रत्यक्षस्य किं लक्षणमिति जिज्ञासायामाह धर्मकीर्तिः– "तत्र कल्पनापोढमभ्रान्तं प्रत्यक्षम्" इति। तत्रेति निर्धारणे सप्तमी। ततश्च तयोः प्रत्यक्षानुमानयोः प्रत्यक्षं साक्षात्कारिज्ञानं कल्पनापोढाभ्रान्तत्वयुक्तं द्रष्टव्यम्। एतदेव सङ्गृह्य प्रमाणवार्तिके प्रतिपादितम्–

प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति।
प्रत्यात्मसंवेद्यः सर्वेषां विकल्पो नाम संश्रयः॥ [प्र.वा. २.१२३] इति।

एवमेव प्रमाणलक्षणं प्रमाणसमुच्चये प्रादर्शि दिङ्नागेन– "प्रत्यक्षं कल्पनापोढं

[२]तस्य विषयः स्वलक्षणम् (न्यायबिन्दुः, पृ.- २१)

नामजात्याद्यसंयुतम्'' इति। नामजात्याद्यसंयुतमित्यत्रादिपदेन गुणद्रव्यक्रियाणां सङ्ग्रहः। एवञ्च कल्पनारहितं नामजातिगुणक्रियाद्रव्यैरसंयुक्तं प्रत्यक्षं भवति इति सरलार्थः फलति। नामादिभिः कस्यचित्संयोग एव हि कल्पना। न्यायबिन्दौ कल्पना इत्थं परिभाषिता– ''अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना'' इति। किञ्च यत् संज्ञासंख्यासंस्थानवर्णकर्मचित्तदृष्टिभ्रान्तिभ्यो मुक्तं भवति तद्भवति अभ्रान्तम्। एवं बौद्धतन्त्रे संज्ञादिभ्रान्तिभ्यो मुक्तमभ्रान्तं नामाद्यसंयुतं कल्पनाविरहितं भवति प्रत्यक्षम् इति वक्तुं शक्यते। बौद्धानां प्रत्यक्षं नैयायिकप्रतिपादितनिर्विकल्पकज्ञानेन तुल्यमिति बोध्यम्।

### २.१.१.१. प्रत्यक्षप्रकारः

''तच्चतुर्विधम्'' इति वदता धर्मकीर्तिना बौद्धानां नये प्रत्यक्षस्य चातुर्विध्यं प्रदर्शितम्। तद्धि– क] इन्द्रियप्रत्यक्षं, ख] मानसप्रत्यक्षं, ग] स्वसंवेदनप्रत्यक्षं घ] योगिप्रत्यक्षं चेति। तेषां विस्तरेण विवरणमधस्तात्प्रस्तूयते–

क] इन्द्रियप्रत्यक्षम्– इन्द्रियप्रत्यक्षस्य स्वरूपं निरूपयन् प्राह धर्मकीर्तिः–

संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना।
स्थितोपि चक्षुषा रूपमीक्षते साक्षजा मतिः॥ [प्र.वा. २.१२४] इति।

संहृत्य आकृष्य सर्वतो विकल्पनीयाच्चिन्तां स्तिमितेन सर्वविकल्पविगमात् अधिक्षिप्तेनान्तरात्मना चेतसा स्थितोऽपि पुरुषश्चक्षुर्विज्ञानेन रूपमीक्षते साक्षजा निर्विकल्पा मतिः इति कारिकार्थः। इन्द्रियद्वारा यदा वस्तु प्रत्यक्षं भवति तदा अस्माभिस्तस्य रूपगुणादिकं न विज्ञायते, यदा हि वस्तुनः इन्द्रियप्रत्यक्षत्वं सिद्ध्यति, ततः परमेव वस्तुनो वर्णादिविषया चिन्ता सम्भवति।

ख] मानसप्रत्यक्षम्– मानसप्रत्यक्षस्य किं लक्षणम् इत्याकाङ्क्षायाम् आह धर्मकीर्तिर्न्यायबिन्दौ– ''स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं तत् मनोविज्ञानम्'' इति। बौद्धतन्त्रे ज्ञानस्य चत्वारि कारणानि भवन्ति, येषां प्रत्यय इति व्यवहारः। ते हि– आलम्बनप्रत्ययः, सहकारिप्रत्ययः, अधिपतिप्रत्ययः, समनन्तरप्रत्ययश्चेति। यथा– घटप्रत्यक्षे घटस्य विषयत्वात् स कारणं भवति। विषयभूतं कारणम् आलम्बनप्रत्यय इत्युच्यते। आलोकं विना घटप्रत्यक्षं न सम्भवति अतः प्रकाशः सहकारिप्रत्ययः। चक्षुरिन्द्रियं विना घटप्रत्यक्षाभावात् चक्षुरिन्द्रियम् अधिपतिप्रत्ययः। यतोहि इन्द्रियम् अधिपतिरित्युच्यते। घटप्रत्यक्षाय किञ्चित्सामर्थ्यमपेक्षते यद् विना प्रत्यक्षीकरणं न

भवति तत् समनन्तरप्रत्यय इत्युच्यते। अत्र चक्षुरिन्द्रियद्वारा यद् घटविषयकं ज्ञानं, तेन ज्ञानेन समनन्तरप्रत्ययभूतेन यद् ज्ञानं मनसि उत्पद्यते तन्मानसप्रत्यक्षम्। पदार्थं प्रति रागादिज्ञानं यत्तदेव मानसप्रत्यक्षमित्यर्थकं "चित्तमप्यर्थरागादि" इति दिङ्नागोक्तलक्षणं न साधु। यतो हि दिङ्नागमते तु इन्द्रियद्वारा दृष्टेष्वेव पदार्थेषु मानसप्रत्यक्षं भवति। एवं हि ज्ञातवस्तुज्ञापकत्वेन मानसप्रत्यक्षस्य प्रामाण्यमेव न स्यात्। अतः पूर्वोक्तमेव साधु। एतत्सर्वं सङ्गृह्याचकथत्कीर्तिः प्रमाणवार्तिके–

तस्मादिन्द्रियविज्ञानान्तरप्रत्ययोद्भवः।
मनोन्यमेव गृह्णाति विषयं नान्धदृक् ततः॥ [प्र.वा. २ २४३] इति।

तस्माद् इन्द्रियविज्ञानमेव अनन्तरप्रत्ययस्तस्माद् उद्भवो यस्य तन्मनो मानसं प्रत्यक्षम्। इन्द्रियप्रत्यक्षग्राह्याद् विषयादन्यमेव विषयं गृह्णाति । तत मानसप्रत्यक्षस्य इन्द्रियज्ञानजन्यत्वाद् अन्धानां चक्षुरिन्द्रियविकलानां दृग् दर्शनं रूपस्य न सम्भवति इति कारिकार्थः।

ग] स्वसंवेदनप्रत्यक्षम्– स्वसंवेदनप्रत्यक्षं दिङ्नागेनेत्थं लक्षितं– "स्वसंवित् निर्विकल्पकम्" इति। निर्विकल्पकं ज्ञानमेव स्वसंवेदनप्रत्यक्षम्। मानसप्रत्यक्षेण इन्द्रियगृहीतवस्तूनां वर्णाद्यनुभवो भवति, ततस्तं विषयं प्रति य इच्छाक्रोधमोहसुखदुःखाद्यनुभवो भवति तदेव स्वसंवेदनप्रत्यक्षम्। तदुक्तं न्यायधुरन्धरेण धर्मकीर्तिना प्रमाणवार्तिके

अशक्यसमयो ह्यात्मा रागादीनामनन्यभाक्।
तेषां मतः सुसंवित्तिर्नाभिजल्पानुषंगिणी॥ [प्र.वा. २.२४९] इति।

घ] योगिप्रत्यक्षम्– न्यायबिन्दौ योगिप्रत्यक्षस्य लक्षणं परिभाषयन्नाह धर्मकीर्तिः– "भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानम्" इति। भूतः सद्भूतोऽर्थः तस्य भावना पुनः पुनश्चेतसि विनिवेशनं तस्या भावनायाः प्रकर्षो भाव्यमानार्थाभासस्य ज्ञानस्य स्फुटत्वारम्भः, यावद्धि स्फुटाभत्वमपरिपूर्णं तावत्तस्य प्रकर्षगतिः, तस्मात्पर्यन्तात् यज्ज्ञातं भाव्यमानस्य संनिहितस्येव स्फुटतराकारग्राहिज्ञानं योगिनः प्रत्यक्षम्। तत्सङ्गृहीतं प्रमाणवार्तिके–

प्रागुक्तं योगिनां ज्ञानं तेषां तद्भावनामयम्।
विधूतकल्पनाजालं स्पष्टमेवावभासते॥
कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः।
अभूतानपि पश्यन्ति पुरतोवस्थितानिव॥ [प्र.वा. २.२८१-२८२] इति।

प्राक् प्रथमपरिच्छेदे योगिनां ज्ञानं सत्त्यविषयमुक्तम्। तेषां योगिनां भावनामयं भावनाहेतुनिष्पत्तिकं तत् ज्ञानं सत्यस्वरूपविषयत्वेन विधूतकल्पनाजालम् अविकल्पत्वाच्च स्पष्टंविशदज्ञेयाकारम् एव अवभासते। कामश्च शोकश्च भयञ्च तैः उमादाः चौरस्वप्नादयश्चेति कामशोकभयोन्मादचौरस्वप्नादिभिरुपप्लुता भ्रान्तास्ते अभूतानप्यर्थान् भावना वशात् पुरतोऽवस्थितानिव पश्यन्ति इति कारिकार्थः।

## २.१.२. अनुमानम्

मीयतेऽर्थोऽनेनेत्यर्थे माधातोः करणे ल्युटि मानशब्दो व्युत्पद्यते। अनुः पश्चादर्थे। पश्चान्मानमनुमानम्। लिङ्गग्रहणलिङ्गलिङ्गिसम्बन्धस्मरणयोः पश्चात् यद्विज्ञानं पर्वतादौ धर्मिणि परोक्षवस्त्वालम्बकं तदेवानुमानशब्देनाभिधीयते। सामान्यलक्षणानां वस्तूनामर्थाद्यानि वस्तूनि अन्यौर्वस्तुभिः सह समानतया तिष्ठति, तेषां ज्ञानायास्त्यनुमानापेक्षा। अनुमानस्य किं लक्षणमिति चेद्वोचत्प्रमाणवार्तिके–

या च सम्बन्धिनो धर्माद् भूतिर्धर्मिणि जायते।

सानुमानं परोक्षाणामेकं तेनैव साधनम्॥ [प्र.वा. ३.६२] इति।

या च सम्बन्धिनो धर्मादन्वयव्यतिरेकतो लिङ्गात् तदाश्रये धर्मिणि ज्ञायते परोक्षार्थप्रतीतिः सानुमानं त्रिरूपलिङ्गप्रभवत्त्वात्, तदेवानुमानं परोक्षाणामेकान्तेनैव साधनम् इति कारिकार्थः। कस्यचन सम्बन्धिनो धर्माद् यद् धर्मिविषयकं परोक्षं ज्ञानं जायते तद् अनुमानम्। व्याप्तिज्ञानावलम्बितं भवत्यनुमानम्। व्याप्तिज्ञानं नाम सामान्येन द्वयोर्वस्तुनोर्यः व्याप्यव्यापकभावः सम्बन्धः सः। यस्य सत्त्वादन्यस्य सत्त्वं नियततया निर्णीयते तत् सामान्यतया व्याप्यम्। यथा धूमस्य सत्त्वाद् वह्नेः सत्त्वं नियततया निर्णीयते इत्यतः स धूमो व्याप्यो भवति। तदेव च हेतुरित्युच्यते। यस्य च सत्त्वं नियततया निर्णीयते तद् व्यापकं भवति। यथा वह्नेः सत्त्वं निर्णीयते इत्यतः स साध्यो भवति। तदेव च साध्यमित्युच्यते। एवञ्च यत्र यत्र धूमः तत्र तत्र वह्निः इतिव्याप्तिस्मरणसहकृतं पर्वते धूमदर्शनं जातं, ततः यद् वह्निविषयकं "पर्वतो वह्निमान्" इति ज्ञानं जायते तदेवानुमानम्।

### २.१.२.१. अनुमानप्रकारः

अनुमानं द्विविधं स्वार्थानुमानं परार्थानुमानञ्चेति बौद्धनैयायिकाः। तदुक्तं न्यायबिन्दौ न्यायधुरन्धरेण कीर्तिना– "अनुमानं द्विधा। स्वार्थं परार्थं च" इति।

क] स्वार्थानुमानम्– स्वस्मै इदमिति स्वार्थम्। येन स्वयं प्रतिपद्यते तत्स्वार्थमनुमानं ज्ञानात्मकम्। पर्वतादौ धर्मिणि धूमादिकं वीक्ष्य यस्य

प्रतिपत्तुः वह्निज्ञानमुत्पद्यते, स एव तेन ज्ञानेन परोक्षमर्थं प्रतिपद्यते नान्य इति स्वार्थानुमानमुच्यते। तदुक्तं स्वार्थानुमानं लक्षयता धर्मकीर्तिना– "तत्र स्वार्थं त्रिरूपाल्लिङ्गाद्यदनुमेये ज्ञानं तदनुमानम्" इति। रूपत्रययुक्ताल्लिङ्गादनुमेये परोक्षविषये यद् ज्ञानं प्रतिपत्तिरुत्पद्यते तत्स्वार्थानुमानम्।

ख] परार्थानुमानम्– परस्मै इदमिति परार्थम्। येन परं प्रतिपादयति तत्परार्थमनुमानं वचनात्मकम्। त्रिरूपलिङ्गप्रतिपादकं वचनं परं प्रतिपादयति ज्ञापयतीति कृत्वा वचनमप्यनुमानशब्देनोच्यते, उपचारात्, यथा आयुश्शब्देन घृतमुच्यते तथा। तदुदितं परार्थानुमानं लक्षयता धर्मकीर्तिना– "त्रिरूपलिङ्गाख्यानं परार्थानुमानम्" इति। अन्वयव्यतिरेकपक्षधर्मतासंज्ञकानि त्रीणि रूपाणि, येन वचनेन प्रख्याप्यन्ते तद्वचनं परार्थानुमानम्।

२.१.२.२.हेतुप्रभेदाः– सपक्षवृत्तित्वं[३] पक्षवृत्तित्वं[४] विपक्षावृत्तित्वम्[५] अनुमानसाधकहेतोः आवश्यकानि। यथा पर्वतो वह्निमान् धूमादित्यत्र धूमो हेतुः। निश्चितसाध्यवान् सपक्षः। अत्र साध्यो वह्निः, तस्य निश्चिताधिकरणं महानसम्। महानसे निश्चितवह्न्यधिकरणे धूमस्य सत्त्वाद् धूमः सपक्षवृत्तिः। सन्दिग्धसाध्यवान् पक्षः। सन्दिग्धवह्न्यधिकरणे पर्वते धूमस्य सत्त्वाद् धूमः पक्षवृत्तिः। निश्चितसाध्याभाववान् विपक्षः। वह्निर्निश्चिततया जलह्रदे नास्ति, अतो निश्चितसाध्याभावाधिकरणं जलह्रदः। तत्र धूमो नास्ति, अतो धूमो विपक्षावृत्तिः। एवञ्च गुणत्रयस्य धूमे सत्त्वाद् धूमरूपो हेतुर्वह्न्यनुमाने समर्थः।

हेतोस्त्रैविध्यं[६] बौद्धनये स्वीक्रियते अनुपलब्धिहेतुः, स्वभावहेतुः कार्यहेतुश्चेति। अनुपलब्धिर्नाम यस्मिन् स्थाने वस्तु भवेत्तस्मिन् स्थाने तस्याभावः। तस्माद् अनुपलब्धिहेतुः वस्तुनः सर्वथाभावो ज्ञायते। स्वभावहेतुराम्रवृक्षः। आम्रवृक्षः स्वभावादेवाम्रफलस्य हेतुर्भवति। कार्यहेतुर्नाम यो हि साध्यादुत्पन्नः। यथा पर्वतो वह्निमान् धूमादित्यत्रानुमाने धूमः कार्यहेतुः। धूमो हि वह्नेरुत्पन्नः वह्नेरनुमाने कारणत्वात् कार्यहेतुः।

---

[३]सपक्ष एव सत्त्वम्

[४]लिङ्गस्यानुमेये सत्त्वमेव

[५]असपक्षे चासत्त्वमेव निश्चितम्

[६]त्रीण्येव च लिङ्गानि। अनुपलब्धिः स्वभावकार्ये चेति

**२.१.२.३.अनुमानाभासाः**– यस्मिन्ननुमाने दोषस्तिष्ठति तद् हि न यथार्थानुमानम्, अपि तु अनुमानाभासः। अनुमानवद् आभासन्ते इति अनुमानाभासाः। अनुमाने मुख्यमङ्गत्रयं– पक्षः हेतुः दृष्टान्तश्चेति। अनुमाने दोष इत्यस्य तात्पर्यमेतेषु दोषा इति। अर्थात् अनुमानाभासा इत्यस्य प्रकारत्रयं पक्षाभासा हेत्वाभासा दृष्टान्ताभासाश्चेति।

पक्षाभासो नवधा विभज्यते– प्रत्यक्षविरुद्धः, अनुमानविरुद्धः, आगमविरुद्धः, लोकविरुद्धः, स्ववचनविरुद्धः, अप्रसिद्धविशेषणम्, अप्रसिद्धविशेष्यम्, अप्रसिद्धोभयं प्रसिद्धसम्बन्धश्च।

हेत्वाभासस्त्रिविधः असिद्धः, अनैकान्तिकः, विरुद्धश्चेति। तत्रासिद्धः चतुर्विधः– उभयासिद्धः, अन्यतरासिद्धः, सन्दिग्धासिद्धः आश्रयासिद्धश्चेति। अनैकान्तिकः षड्विधः– साधारणः, असाधारणः, सपक्षैकदेशवृत्तिविपक्षव्यापी, विपक्षैकदेशवृत्तिवसपक्षव्यापी, उभयपक्षैकदेशवृत्तिः विरुद्धाव्यभिचारी चेति। विरुद्धश्चतुर्विधः– धर्मस्वरूपविपरीतसाधनः, धर्मविशेषविपरीतसाधनः, धर्मि-स्वरूपविपरीतसाधनः धर्मिविशेषविपरीतसाधनश्चेति।

दृष्टान्ताभासश्च साधर्म्यमूलकं वैधर्म्यमूलकञ्चेति द्विविधम्। पुनः साधर्म्यमूलकस्य साधनधर्मासिद्धः, साध्यधर्मासिद्धः, उभयधर्मासिद्धः, अनन्वयः विपरीतान्वयश्चेति पञ्च भेदाः। वैधर्म्यमूलकस्य अपि पञ्च भेदाः सन्ति। ते हि– साध्याव्यावृत्तः, साधनाव्यावृत्तः, उभयाव्यावृत्तः, अव्यतिरेकः विपरीतव्यतिरेकश्चेति।

## ३. गौतमप्रवर्तितन्यायेन सह बौद्धन्यायस्य पर्यालोचनम्

**३.१ प्रत्यक्षम्**– इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति नैयायिकाः। तत्पुनर्द्विविधं निर्विकल्पकं सविकल्पकञ्चेति। दूरस्थं यत्किञ्चिद्वस्तु दृश्यते चेद् आदौ यत्किञ्चिद्वस्तु अस्ति इति भाति, परन्तु तस्य नामरूपादिकं न विज्ञायते इत्येवं नामजात्यादिरहितं ज्ञानमेव निर्विकल्पकमिति सामान्यतयोच्यते। एवञ्च निष्प्रकारकमर्थाद् विशेष्यविशेषणानवगाहि ज्ञानं निर्विकल्पकम् इति फलति। इदमेव च बौद्धानां प्रत्यक्षम्। परन्तु यदा वस्तुनः स्वरूपजातिगुणादिकं प्रत्यक्षीक्रियते तदा तत्सविकल्पकमित्युच्यते। एवञ्च यत्सप्रकारकमर्थाद् विशेष्यविशेषणावगाहि ज्ञानं तत्सविकल्पकमर्थात् सविकल्पकप्रत्यक्षमित्युच्यते। परन्तु बौद्धनैयायिकाः इदं सविकल्पकप्रत्यक्षं प्रत्यक्षत्वेन नाङ्गीकुर्वन्ति। तेषा मते

अस्य सामान्यलक्षणत्वात् अनुमानगम्यमिदं न तु प्रत्यक्षम्।

बौद्धानां नये यत्पूर्ववर्णितप्रत्यक्षचतुष्टयं विद्यते, तस्य न्यायशास्त्राभिमत-प्रत्यक्षज्ञानद्वये अन्तर्भावः शक्यः। न्यायनये लौकिकसन्निकर्षजन्यं ज्ञानम् इन्द्रियप्रत्यक्षम्, अलौकिकसन्निकर्षजन्यं च योगिप्रत्यक्षम्। सुखदुःखादीनां ज्ञानरूपं यत्स्वसंवेदनप्रत्यक्षं तद्धि मानसप्रत्यक्षान्तर्गतम्। मनस इन्द्रियत्वाच्च मानसप्रत्यक्षम् इन्द्रियप्रत्यक्षेऽन्तर्भवति। एवं च इन्द्रियप्रत्यक्षं योगिप्रत्यक्षमिति प्रत्यक्षद्वयमेवेति नैयायिकाः।

**३.२.अनुमानम्**– यद्यपि “अथ तत्पूर्वकं त्रिविधम् अनुमानं पूर्ववच्-छेषवत्-सामान्यतोदृष्टं च”[७] इति सूत्रयता गौतमेन पूर्ववत् शेषवत् सामान्यतोदृष्टम् इति अनुमानस्य त्रैविध्यं प्रतिपादितं तथापि अर्वाचीननैयायिकाः दिङ्नागप्रोक्तस्वार्थपरार्थभेदेन भेदद्वयम् एवानुमानस्याङ्गीचक्रुः। आभासविषये नैयायिकबौद्धयोर्मतभेदो दरीदृश्यते। तत्र नैयायिकाः समेषाम् आभासानां हेत्वाभासे अन्तर्भावं कारयन्ति। तद्विपरीता बौद्धनैयायिकाः। ते हेत्वाभासं विहायापि पक्षाभासं दृष्टान्ताभासं च पृथक्तया स्व्यकार्षुः। बौद्धाः असिद्ध-विरुद्धा-नैकान्तिक-हेत्वाभासत्रयम् अङ्गीकुर्वन्ति। नैयायिकास्तु तदितरबाधितसत्प्रतिपक्षम् अपि हेत्वाभासत्वेन परिगणयन्ति। नैयायिकानां परार्थानुमानं प्रतिज्ञा-हेतु-दृष्टान्त-उपनय-निगमनाख्यपञ्चावयवयुतं भवति। बौद्धास्तु प्रतिज्ञा-हेतु-दृष्टान्तरूपत्र्यवयवसंयुतं परार्थानुमानमभ्युपगच्छन्ति इति विशेषः।

## ४.उपसंहृतिः

बौद्धाः प्रत्यक्षमनुमानञ्च प्रमाणरूपेण अङ्गीकुर्वन्ति। तत्र दिङ्नाग-धर्मकीर्त्यादिभिः प्रत्यक्षादीनां यल्लक्षणं कृतं, तस्य खण्डनं यद्यपि उत्तरकालिकैः कुमारिलप्रभृतिमीमांसकैः नैयायिकैश्च विहितम्। किन्तु तैरेव प्रथमतया प्रमाणमार्गः आरब्धः इत्यतः ते श्रद्धार्हाः। परन्तु तैः आगमप्रमाणं न स्वीकृतमिति महतः आश्चर्यस्य विषयः। आगमप्रमाणानभ्युपगमे हि बुद्धवचनस्यैवाप्रामाण्यापत्तिः स्यादिति आगमप्रमाणम् अवश्यम् अभ्युपेयम् इत्यापतति। तस्माद् आगमप्रमाणम् अवश्यम्भ्युपेयम् इति भवति।

[७] न्यायसूत्रम् १.१.५

# बुद्धचरितदिशा बौद्धमतेष्वनीप्सिततत्त्वानां खण्डनविमर्शः

सुजितमाइतिः*

बौद्धमतावलम्बिषु कविषु महाकविरश्वघोषो भास्कर इव विराजते। स कणिष्कस्य समकालिक आसीदिति वक्तुं शक्यते। अर्थात् ख्रीष्टियप्रथमशतकमेवास्य महाकवेः आविर्भावकालः इति अनुमीयते। जन्मभूमिरस्य खलु साकेतमण्डलमिति सौन्दरनन्दस्य पुष्पिकया प्रमाणितम्। साकेतस्य वर्तमानं नाम अयोध्या। तस्य मातुर्नाम सुवर्णाक्षी। सौन्दरनन्दस्य पुष्पिकायामेवं लिखितमस्ति– "आर्यसुवर्णाक्षीपुत्रस्य साकेतस्य भिक्षोराचार्यस्य भदन्ताश्वघोषस्य महाकवेः वादिनः कृतिरिति।" 'बुद्धचरितम्' 'सौन्दरनन्दं' चेति महाकाव्यद्वयं तथा 'शारिपुत्रप्रकरणम्' इति प्रकरणमेकं महाकवेः अश्वघोषस्य कृतिरूपेण अङ्गीकृतानि। परन्तु परवर्तिनि काले आविष्कृतानि 'गण्डीस्तोत्रगाथा' इति गीतिकाव्यं तथा 'वज्रसूची' 'सूत्रालङ्कारः' 'महायानश्रद्धोत्पादसूत्रम्' चेति काव्यानि तेन विरचितानि इति नैकैः पण्डितैः मन्यन्ते।

बौद्धधर्मदीक्षानन्तरम् अश्वघोषेन तज्जीवनं बौद्धधर्मप्रचाराय समर्पितम्। भगवतः बुद्धस्य जीवनवृत्तान्तं तस्मै अधिकं रुरुचे। तथाहि जनकल्यानार्थं बौद्धधर्मप्रचाराय च बुद्धजीवनमाश्रित्य अष्टविंशतिसर्गैरुपनिबद्धं बुद्धचरिताख्यं महाकाव्यं विरचयामास। यथा तिक्तौषधं मधुना सम्मेल्यते तथा असावत्र बौद्धदर्शनस्य रहस्यपूर्णान् निगूढान् राद्धान्तान् शान्तरसमाश्रित्य सर्वसाधारणजनानाम् अवबोधाय पद्येन प्रतिपादितवान्। तथाहि अश्वघोषः विद्वत्प्रकाण्डम् आसीत् इत्यत्र न कश्चित् संशीतिलेशः। बौद्धदर्शनेषु बौद्धसिद्धान्तस्य कविरयमाचार्य एवासीत्।

प्रबन्धेऽस्मिन् बुद्धचरितमिति महाकाव्ये बौद्धमतेषु अनीप्सिततत्त्वानां खण्डनम् अश्वघोषदिशा वितन्यते।

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य

## ईश्वरास्तित्वखण्डनम्

नैयायिकादयः सर्वे आस्तिकदार्शनिकाः कस्यचित् कार्यस्य साधारणकारण-रूपेण ईश्वरादृष्टादीन् स्वीकुर्वन्ति। यथा न्यायवैशेषिकप्रकरणग्रन्थे तर्कसङ्ग्रहे अन्नम्भट्टेन करणस्य लक्षणं लक्षितम्– 'असाधारणं कारणं करणम्।' इति। तत्र असाधारणमिति साधारणकारणे ईश्वरादृष्टादावतिव्याप्तिवारणाय।

परन्तु अनात्मवादिभिः बौद्धदार्शनिकैः जगतः कस्यचित् कार्यस्य उत्पत्तौ ईश्वरस्य हेतुत्वं दृढतया नाङ्गीक्रियते। बौद्धाः जीवान्तर्गतम् आत्मानं न मन्यन्ते। जीवः केवलं पञ्चस्कन्धानां समूहमात्रमिति तन्मतम्। अस्याः समष्टेः अतिरिक्तं न भवति किञ्चिद् अन्यत् तत्त्वम्। तेषां मते प्रतीत्यसमुत्पादनियमेनैव कारणेभ्यः कार्याण्युत्पाद्यन्ते। अश्वघोषेणापि सप्रमाणं प्रबलयुक्त्या ईश्वरस्य हेतुत्वं निराक्रियते अष्टादशे सर्गे। तद्यथा–

ऐश्वरं चेदिदं विश्वं भवेन्नेत्थं व्यवस्थितम्।
दुःखैर्नाभिभवेत् कश्चित् नानायोनीर्न संस्पृशेत्॥
इष्टानिष्टेषु किञ्चिन्न सम्भवेदथ देहिनः।
यदि चास्य भवेत् किञ्चिदीश्वरस्यापि तद् भवेत्॥
ईश्वरो यदि सत्यं चेत् सन्देहोऽत्र कथं भवेत्।
नापवदेद् विप्रत्तौ च नान्यान् देवाँश्च पूजयेत्॥
सृष्टिरीशस्य सङ्कल्पः इत्यपि च न सिध्यति।
अत्रेशेऽविद्यमानेऽपि कथं दृश्यस्य वर्तनम्॥
सङ्कल्पस्य च सातत्यं कर्तृत्वं यदि सम्भवेद्?
सङ्कल्प एव कर्ता स्यात् कथं नेशः स एव हि!॥
सङ्कल्पेन विनैवेशः कुरुते चेदहैतुकीम्।
बालवत् परमेशस्य नाधिकारः स्वचेतसि॥
ददाति प्रभुरिच्छातो दुःखं वा यदि वा सुखम्।
इच्छाधीनः कथं कर्ता स्वतन्त्रः सोऽत्र वै भवेत्!॥
मानवः स्वानि कर्माणि कुरुते ईश्वरेच्छया।
फलस्य भोक्ता स्यादीशो नरो न फलभाग् भवेत्॥
जगद्रूपेण चेदीशः स्वयं परिणतः प्रभुः।
तद्रूपत्वादिमे सर्वे ईश्वरा न तु मानवाः॥
अन्यप्रेरित ईशोऽयं विदधाति न स्वेच्छया!।

अनवस्था ततस्तस्माज्जगत्कर्ता न सिध्यति॥
एवं परस्परं दोषदुष्टा ईश्वरसिद्धयः।[१] इति।

अत बौद्धमते नास्तीश्वर आत्मा वा परमार्थतो वस्तुभूतः पदार्थः। तथाहि बौद्धदार्शनिकैर्नैरात्म्यवादो निरीश्वरवादो वा स्वीक्रियते।

## स्वभाववादखण्डनम्

अनुमानवादिनः वह्निधूमयोः कार्यकारणभावमाश्रित्य तयोः साहचर्यं न्याय्यं मन्यन्ते। परन्तु चार्वाका व्याप्तिमङ्गीकर्त्तुं नोद्यताः। यतः व्याप्तिज्ञानं कार्यकारणभावमाश्रित्य जायते। तेषां मते जगतः वैलक्षणार्थं कार्यकारणभावो नापेक्षते। चार्वाकमते यथा सुखं दुःखञ्च स्वभावतः एव प्रवर्त्तते निवर्त्तते च तथा कार्य्यमपि स्वभावतः उत्पद्यते विनश्यते च। स्वभावादिनः मन्यन्ते जगति यत् किमपि दृश्यते तत्सर्वं स्वाभाविकमेव, न किञ्चित्कारणकलापसमुत्थम्। तथाहि बृहत्संहितायामुच्यते– "अपरे लोकायतिकाः स्वभावं जगतः कारणमाहुः। स्वभावादेव जगद् विचित्रमुत्पद्यते, स्वभावतो विलयं याति।"[२] इति।

परन्तु बौद्धमहाकविना जगतः कार्यजातस्य उत्पत्तौ स्वभावस्य हेतुत्वं न स्वीक्रियते। तथाहि उच्यते–

स्वभाववादेऽप्येषैवापत्तिस्तेन प्रकल्पिता॥
न हेतुर्जगतः कश्चित् प्रकृत्या तत् प्रवर्तते।
बीजादेवाङ्कुरोत्पत्तिरत एतन्न सन्मतम्॥
एकः कर्ता बहूनां न वस्तूनां कारणं भवेत्।
एक एव स्वभावोऽयं कारणं जगतः कथम्॥
विभुः प्रोक्तः स्वभावोऽयं विभौ न परिवर्तनम्।
उत्पादस्तु न तस्यास्ति स्वभावोऽतो न कारणम्॥
व्यापित्वात् तस्य सर्वत्र समाना हेतुना भवेत्।
अस्ति नैयून्यमाधिक्यं सोऽत्र तस्मान्न कारणम्॥
कारणानुविधायित्वं कार्यस्य परिलक्ष्यते।
निर्गुणस्य स्वभावस्य कथं स्याद् गुणहेतुना॥
शाश्वतत्वं स्वभावस्य कारणं सम्भवेद्धि तत्।

---

[१]बुद्धचरितम्– १८/२०-२९
[२]बृहत्संहिता– १/७

कार्यजातमिदं सर्वं विकारसहितं कथम्॥
नित्यश्चोत्पादकश्चापि स्वभावः कारणं यदि।
न च कार्यस्य नाशः स्याद् दृश्यते च हि नाशवत्॥
स्वभावतः प्रवृत्तिस्तु भूतानां विषयेषु चेत्।
स च नित्यस्त्वनावर्त्यतो निर्वाणमसम्भवम्॥
उत्पादकः स्वभावश्चेत् तत्कार्यं हि तथा भवेत्।
प्रवृत्तिः कार्यमात्रस्य सर्वत्र च न दृश्यते॥
स्वभावस्य प्रवृत्तिश्च न चित्तेन विभाव्यते।
दृश्यते तु फलं तस्मात् स्वभावो नात्र कारणम्॥
स्वभावोऽचेतनस्तावत् चेतनानां कथं त्वयम्।
कारणं सम्भवेत् तेषां गवादीनां च देहिनाम्॥
कारणं कङ्कणादीनां सुवर्णं दृश्यते यथा।
तथात्र जगतो हेतुः स्वभावो नात्र दृश्यते॥[३] इति।

## कालवादखण्डनम्

कालवादिनः कार्यस्य उत्पत्तौ कारणरूपेण कालं स्वीकुर्वन्ति। यतः ते सर्वेषामाधारः कालः इति अङ्गीकुर्वन्ति। आधारत्वेनैव तैः कालस्य कारणत्वं प्रतिपादितम्। तथाहि तैः कार्यस्य साधारणकारणरूपेण कालः स्वीक्रियते। भाषापरिच्छेदे विश्वनाथन्यायपञ्चाननेनोक्तम्– "जन्यानां जनकः कालो जगतामाश्रयो मतः" इति। इदानीमिति पदेनैव कालस्यास्तित्वं प्रतीयते। 'अद्य घटो भविष्यति, श्वः पटो भविता' इत्यादिव्यवहारे तत्तत्कार्योत्पत्त्यधिकरणत्वेन कालस्य हेतुत्वं स्वीकर्तव्यमिति नैयायिकानां निर्णयः। परन्तु बौद्धमतानुगतेन अश्वघोषेन जगतः कारणत्वेन कालः न स्वीकृतः। तथाहि तेनोच्यते–

कारणं न हि कालोऽपि यतः कालः सनातनः।
नैरन्तर्यात् प्रवृत्तेस्तु निर्वाणं स्यादसम्भवम्॥[४] इति।

अतः अश्वघोषस्य मते जगदुत्पत्तेः कालस्य शाश्वतकारणत्वं स्वीक्रियेत चेत् कस्यापि मोक्षप्राप्तिः न भवेत्। अर्थात् निर्वाणमसम्भवं भवेत्। जगदुत्तपत्तौ कालस्य शाश्वतकारणत्वं स्वीक्रियते चेत् तस्मादुत्पन्नस्य जगतः जीवा अपि शाश्वता भवेयुः, तेषां नाशोऽपि न सम्भवेत्। तथाहि कालः न स्वीक्रियते कारणत्वेन।

---

[३]तत्रैव– १८/२९-४१

[४]तत्रैव– १८/४२

## पुरुषवादखण्डनम्

पुरुषवादिनः साङ्ख्यदार्शनिका जगदुत्पत्तौ कारणत्वेन पुरुषं स्वीकुर्वन्ति। प्रकृतिः पुरुषश्चेति द्वे मूलतत्त्वे तेषाम्। अनयोरेव सम्बन्धाज्जगदुत्पद्यते इति तेषां राद्धान्तः। प्रकृतिपुरुषाभ्यामेव जगदुत्पत्तौ समर्थयितुं शक्यायां वृथा ईश्वरकल्पनेति तदाशयः। प्रकृतिर्जडा, पुरुषश्चेतनः, पुरुषसम्बन्धात् प्रकृतौ क्रिया उत्पद्यते इति तैः स्वीक्रियते।

परन्तु बौद्धदार्शनिकस्तथा महाकविरश्वघोषः बुद्धचरिते सप्रमाणं जगदुत्पत्तौ कारणत्वेन पुरुषं न स्वीकृतवान्। तथाहि महाकविना निगदितम्–

यद्येव पुरुषः कर्ता सर्वदेप्सितमाप्नुयात्।
न कश्चित् स्वस्य दुःखस्य कारणं सम्भवेत् क्वचित्॥
अभीप्सितं न लभते लभते चानभीप्सितम्।
पुरुषो न स्वतन्त्रोऽस्ति कथं कर्ता भवेत् किल॥
यदि स्यात् पुरुषः कर्ता कुर्यात् स्वेष्टं प्रयत्नतः।
नानिष्टमारभेतात्र दृश्यते तूभयात्मकम्॥
शुभं प्रयतते कर्तुम् अशुभाच्च बिभेत्यलम्।
तथाप्यशुभमाप्नोति शुभं नैवाधिगच्छति॥
शीतोष्णवातवर्षाभी रोगैः शोकादिभिस्तथा।
लोको हि निष्फलोद्योगो न स्वाधीनः कदाचन॥[५]

अतः बौद्धदार्शनिका नहि कस्यापि मूलकारणस्यैकस्य जगदुत्पादनविषये व्यवस्थां प्रकुर्वन्ति। नहि ते कदापि कथमपि विष्णोर्वा महादेवतो वा अहोस्वित् प्रकृतितो वा कस्मादप्येकस्मात् कारणात् जगतो जनिं स्वीकुर्वन्ति। तेषां मते भावभूतपदार्थानां सर्वेषामेवैककारणतः एककालावच्छेदेनैव जगतः समुत्पत्तिर्जायते।

## अहेतुकवादखण्डनम्

अहेतुकवादिनः नाम चार्वाकाः। तेषां मते सृष्टिः स्वभावत एव जायते। अहेतुकवादिनां (Accidentalism) मते असम्बन्धरूपाणां घटनानां समाहारस्वरूपं हि जगत्। तेषां निर्णयः– जगति कार्यकारणभावो नापेक्षते।

[५]तत्रैव– १८/४७-५१

जगति किमपि न किञ्चित्कारणकलापसमुत्थम्। तथाहि उच्यते तैः–

शिखिनं चित्रयेत् को वा कोकिलाँश्च प्रकूजयेत्।
स्वभावव्यतिरेकेण विद्यते नात्र कारणम्॥ इति।

अर्थात् अहेतुकवादिनां मते जगत् स्वभावत एव प्रवर्त्तते निवर्त्तते च। परन्तु अहेतुकवादिनां मतमिदं अश्वघोषेण खण्ड्यते। बुद्धचरिते उच्यते–

हेतुना दृश्यते कार्यं यथा तर्वादि भूमितः।
वृक्षात् फलसमुत्पत्तिर्बीजादङ्कुरसम्भवः॥
अहेतुके च संसारे प्रवृत्तिः स्यान्न कर्मणि।
सर्वं सर्वे लभेरन् वा ध्रुवा सिद्धिश्च सम्भवा॥
अहेतुकं सुखं दुःखं नराणां यदि सम्भवेत्।
कर्मणः फलवैयर्थ्यमतः कर्तात्र नेश्वरः॥[६] इति।

एवं समासेन प्रबन्धेऽस्मिन् बुद्धचरितस्याष्टादशसर्गमाश्रित्य बौद्धमतेषु पञ्चानामनीप्सिततत्त्वानां श्लोकप्रमाणैः सरलः विचारः क्रियते। इति शिवम्।

[६]तत्रैव– १८/५१-५४

# सर्वादीनि सर्वनामानि

जगदीशभट्टः*

## १. उपोद्घातः

व्यवहारनिर्वाहार्थं भाषा अत्यन्तं महत्त्वपूर्णं स्थानं भजते। तादृशभाषायाः संस्कारशास्त्रं व्याकरणं वेदपुरुषस्य अङ्गेषु मुखत्वेन प्रसिद्धम्। तादृशं व्याकरणं शास्त्रं सूत्ररूपेण रचितमिति समेषां ज्ञातचरम्। इमानि सूत्राणि षड्विधानि सन्ति। तथाहि–

सञ्ज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च सूत्रं षड्विधं स्मृतम्॥ इति।

विधिसूत्राणामुपकारकत्वेन अन्येषां सूत्राणां व्यवहारः। तत्राद्यं सञ्ज्ञासूत्रम्। सञ्ज्ञा इत्युक्ते नाम इत्यर्थः। लोके व्यवहारसिद्ध्यर्थं जातस्य शिशोः नामकरणसंस्कारद्वारा नाम क्रियते। यत्किञ्चिद्वस्तुनः अपि नाम क्रियते। शास्त्रे लाघवार्थं नाम = सञ्ज्ञा क्रियते। परमत्र शास्त्रे लाघवमपेक्षते इति हेतोः न केवलमेकस्य अपि तु बहूनामपि एकैव सञ्ज्ञा क्रियते। तादृशीषु सञ्ज्ञासु सर्वनाम इत्यपि अन्यतमा। अधुना सर्वनाम इति महत्याः सञ्ज्ञायाः विधायकं सूत्रं किञ्चित् विचारयामः।

## २.०. सर्वादीनि सर्वनामानि (१.१.०२७)

सूत्रार्थः– सर्वादीनि सर्वनामानि इति पदद्वयात्मकमिदं सूत्रम्। सर्वः आदिः= प्रथमः, आद्यवयवः = प्रथमावयवः येषां शब्दानां तानि सर्वादीनि। सर्वशब्दः शब्दस्वरूपपरः। शब्दस्वरूपपरः इत्युक्ते शबस्य या आनुपूर्वी तद्युक्तः इत्यर्थः। अर्थात् अत्र स्+अ+र्+व्+अ इति आनुपूर्वी। एतादृश-आनुपूर्वीयुक्तः सर्वशब्दः इत्यर्थः। सर्वादीनि इति नपुंसकलिङ्गे उक्तत्वात् शब्दस्वरूपाणि इति विशेष्यं भवति। सर्वनामानि इति सञ्ज्ञा। एवञ्च सर्वादीनि शब्दस्वरूपाणि सर्वनामसञ्ज्ञानि स्युः इति सूत्रार्थो भवति।

## २.१ सर्वादिगणः

पाणिनिना रचितेषु सूत्रेषु पदान्ते आदि-शब्दः भवति चेत् प्रायः तत्र गणपाठः

*परियोजनाधीक्षकः, श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालये, तिरुपतौ

भवति इत्यर्थः। अस्मिन् सर्वादीनि सर्वनामानि (१.१.०२७) इति सूत्रे आदिशब्दः सर्वादीनि इति पदे अन्ते प्रयुक्तः। अतः अत्र गणपाठः अस्ति। अस्मिन् सर्वादिगणे– सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम, पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्वम्, अन्तर्, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्– इति पञ्चत्रिंशत् पदानि पठितानि।

## २.२. सर्वनामसञ्ज्ञायां भेदः

पूर्वोक्तेषु सर्वनामसञ्ज्ञायुक्तशब्देषु सर्वनामसञ्ज्ञा केषुचित् शब्देषु नित्यं भवति, केषुचित् शब्देषु विकल्पेन भवति। केषुचित् स्थलेषु न भवति।

१. नित्यं सर्वनाम सञ्ज्ञा– पूर्वोक्तरीत्या केषाञ्चित् शब्दानां नित्यं सर्वनामसञ्ज्ञा भवति। तानि– सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, सम, सिम। त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्।

२. सर्वनामसञ्ज्ञानिषेधः– १. न बहुव्रीहौ (१.१.२९) इति सूत्रेण बहुव्रीहिसमासे, २. तृतीयासमासे (१.१.३०) इति सूत्रेण तृतीयातत्पुरुषे,३. द्वन्द्वे च (१.१.३१) इति सूत्रेण द्वन्द्वसमासे, एवं त्रिभिः सूत्रैः सर्वनामसञ्ज्ञानिषेधः क्रियते।

३. सर्वनामसञ्ज्ञाविकल्पः– १.विभाषा दिक्समासे बहुव्रीहौ (१.१.२८) इति सूत्रेण दिगन्तलक्षणबहुव्रीहौ सर्वनामसञ्ज्ञा विकल्प्यते, २. विभाषा जसि (१.१.३२) इति सूत्रेण द्वन्द्वसमासे जसमाश्रित्य शीभावे सर्वनामसञ्ज्ञा विकल्पेन भवति, ३. प्रथमचरमतयाल्पार्धकतिपयनेमाश्च (१.१.३३) इति सूत्रेण सर्वनामसञ्ज्ञा विकल्पेन भवति, ४. पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम् (१.१.३४) इति सूत्रेणसर्वनामसञ्ज्ञा विकल्पेन भवति, ५. स्वमज्ञातिधनाख्यायाम् (१.१.३५) इति सूत्रेणसर्वनामसञ्ज्ञा विकल्पेन भवति, ६. अन्तरं बहिर्योगोपसंव्यानयोः (१.१.३६) इति सूत्रेणसर्वनामसञ्ज्ञा विकल्पेन भवति, इत्येवं षड्भिः सूत्रैः सर्वनामसञ्ज्ञायाः विकल्पः क्रियते।

## ३.०. तद्गुणाधिकरणम्

बहुव्रीहिसमासे बहुधा भेदाः भवन्ति। तद्यथा– १.समानाधिकरणबहुव्रीहिः, २.व्यधिकरणहुव्रीहिः ३.सङ्ख्योत्तरपदबहुव्रीहिः, ४.सङ्ख्योभयपदबहुव्रीहिः,

५.सहपूर्वपदबहुव्रीहिः, ६.व्यतिहारलक्षणबहुव्रीहिः, ७.दिगन्तराललक्षणबहुव्रीहिः, ८.नञ्बहुव्रीहिः, ९.प्रादिबहुव्रीहिः, १०.उपमानपूर्वपदबहुव्रीहिः इति। एवमेव तद्गुणसंविज्ञानबहुव्रीहिः, अतद्गुणसंविज्ञानबहुव्रीहिः इत्यपि भेदौ भवतः। प्रकृतमत्र सर्वादीनि इति पदे प्रधानतया तद्गुणसंविज्ञानबहुव्रीहिः उत अतद्गुणसंविज्ञानबहुव्रीहिः इति सन्देह उदेति। अतः सर्वादीनि इत्यत्र कः समासः इति विचारः प्रस्तूयते।

## ३.१. सर्वादीनि इति पदे समासविचारः

सन्देहः– सर्वादीनि इति समस्तपदे सर्व आदि इति पदद्वयं वर्तते। तत्र सर्वशब्दस्तु सर्वः सर्वा सर्वम् इति त्रिषु लिङ्गेषु वर्तते। अत्र आदिशब्दस्तु नित्यं पुंलिङ्गः एकवचनान्तः। एवं सति सर्वादिशब्दाभ्यां कः कः समासः, कः कः विग्रहः सम्भवति इति विचारयामः। १. षष्ठी (२.२००८) इति सूत्रेण षष्ठीतत्पुरुषसमासः चेत् सर्वस्य आदिः सर्वादिः इति विग्रहः भवति। २. विशेषणं विशेष्येण बहुलम् (२.१.५७) इति सूत्रेण कर्मधारयसमासः चेत् सर्वः आदिः सर्वश्चासौ आदिश्च सर्वादिः इति विग्रहः भवति। एवं पूर्वोक्तसमासद्वयेऽपि परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः (२.४.२६) इति सूत्रेण द्वन्द्वसमासे तथा तत्पुरुषसमासे च परपदस्य यल्लिङ्गं तदेव समास्यापि भवति उत्युक्तत्वात्- सर्वादिः इति पुल्लिङ्गः एव भवति। ३. अनेकमन्यपदार्थे (२.२.०२४) इति सूत्रेण बहुव्रीहिसमासः चेत्, सर्वः आदिः येषां तानि सर्वादीनि इति भवति। ४. ब्रहुव्रीहितत्पुरुषयोः एकशेषः। प्रथमं सर्वः आदिः येषां तानि सर्वादीनि इति बहुव्रीहिसमासः कर्तव्यः। पुनः सर्वश्चासौ आदिश्च सर्वादिः इति तत्पुरुषसमासः कर्तव्यः। तत्पुरुषः इत्युक्ते कर्मधारयः एव अत्र कर्तव्यः। बहुव्रीहितत्पुरुषयोः एकशेषः सर्वादीनि च सर्वादिश्च सर्वादीनि इति। नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम् (१.२.०६९) इति सूत्रेण सर्वादीनि इति नपुंसकत्वात् बहुव्रीहिरूपमेव अवशिष्यते। अथवा स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यते इत्यर्थकवार्तिकेनापि सर्वादीनि इति बहुव्रीहिरूपमेव अवशिष्यते। अर्थात् एकशेषे तत्पुरुषरूपस्य समासस्य (६.१.२२३) इति सूत्रेण अन्तोदात्तः प्रवृत्तः। बहुव्रीहिरूपस्य तु बहुव्रीहौ प्रकृत्या पूर्वपदम् (६.२.००१) इति सूत्रेण पूर्वपदस्य प्रकृतिस्वरो भवति। अनयोः स्वरयोः उत्तरसूत्रेण यः स्वरः पूर्वपदप्रकृतिस्वरः उक्तः सः शिष्यते। सः तु बहुव्रीहिसमासस्य स्वरत्वात् बहुव्रीहिसमासस्य रूपमेव

अवशिष्यते।

एवंप्रकारेण बहुधा सर्वादीनि इति शब्दस्य विग्रहः समासश्च सिध्यति। तत्र बहुव्रीहिसमासं विहाय अन्यस्मिन् समासे आदिशब्दस्य नपुंसकत्वं तथा बहुवचनत्वं चेति द्वयमपि न सिध्यति। तत्र कः साधु इति चिन्ता उदेति।

समाधानम्– सर्वादीनि इति शब्दस्य बहुव्रीहिसमासः। अन्येन समासेन नपुंसकलिङ्गः, बहुवचनञ्च न सिध्यति। अतः बहुव्रीहिसमासः एव इति मन्तव्यम्।

पुनः सन्देहः– अस्माभिः सर्वादीनि इति शब्दस्य चतुर्धा समासः चिन्तितः। तत्र विग्रहद्वयं तावत् अत्र सङ्गच्छते। १. अनेकमन्यपदार्थे (२.२.०२४) इति सूत्रेण बहुव्रीहिसमासः चेत्, सर्वः आदिः येषां तानि सर्वादीनि इति भवति। २. ब्रहुव्रीहितत्पुरुषयोः एकशेषः। प्रथमं सर्वः आदिः येषां तानि सर्वादीनि इति बहुव्रीहिसमासः कर्तव्यः। पुनः सर्वश्चासौ आदिश्च सर्वादिः इति तत्पुरुषसमासः कर्तव्यः। तत्पुरुषः इत्युक्ते कर्मधारयः एव इति अत्र पुनः स्मर्तव्यम्। बहुव्रीहितत्पुरुषयोः एकशेषः सर्वादीनि च सर्वादिश्च सर्वादीनि इति। नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम् (१.२.०६९) इति सूत्रेण सर्वादीनि इति नपुंसकत्वात् बहुव्रीहिरूपमेव अवशिष्यते। अथवा स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यते इत्यर्थकवार्तिकेनापि सर्वादीनि इति बहुव्रीहिरूपमेव अवशिष्यते।

एवं द्वयोः विग्रहयोः कः साधीयानत्र भवति इति सन्देहः जायते।

समाधानम्– सर्वः (सर्वशब्दः) आदिर्येषां तानीमानि सर्वादीनीत्यस्य विग्रहः।

## ३.२ सर्वशब्दस्य सञ्ज्ञासम्पादनम्

सर्वशब्दस्य सञ्ज्ञासम्पादने सन्देहः– सर्वादीनि सर्वनामानि (१.१.०२७) इति सूत्रेण सर्वादिगणे पठितानां शब्दानां सर्वनामसञ्ज्ञा उच्यते। पूर्वोक्तप्रकारेण सर्वः आदिः येषां तानि इमानि सर्वादीनि इति विग्रहः उच्यते चेत् सर्वादिगणे पठितानामन्येषां शब्दानां सर्वनामसञ्ज्ञा सिध्यति सर्वशब्दं विहाय। कुतः इत्युक्तेः सर्वादीनि इत्यत्र बहुव्रीहिसमासः इति तु ज्ञातमेव अस्ति।

## ३.३. समासस्य समान्यपरिचयः

अत्र प्रकरणवशात् अन्योऽपि विषयः ज्ञातव्यः अस्ति। सो हि– प्राधान्येन समासः चतुर्धा भवति। १. अव्ययीभावः, २. तत्पुरुषः, ३. द्वन्द्वः, ४. बहुव्रीहि इति। तत्र पूर्वपदार्थप्रधानः अव्ययीभावः। अव्ययीभावसमासे विग्रहे विद्यमानयोः

पदयोः पूर्वपदस्यैव प्राधान्यं भवति। यथा– वृक्षस्य समीपम् उपवृक्षम् इत्यत्र उप इति पूर्वपदस्य सामीप्यार्थस्य प्राधान्यम्। उत्तरपदार्थप्रधानः तत्पुरुषः। तत्पुरुषसमासे विग्रहे विद्यमानयोः पदयोः उत्तरपदस्यैव प्राधान्यं भवति। यथा - राज्ञः पुरुषः राजपुरुषः इत्यत्र पुरुषः इति उत्तरपदस्यैव प्राधान्यम्। अतः राजपुरुषमानय इत्युक्ते राजसम्बन्धी पुरुष एव आनीयते न तु राजा। उभयपदार्थप्रधानः द्वन्द्वः। द्वन्द्वसमासे विग्रहे विद्यमानयोः पदयोः द्वयोरपि प्राधान्यं भवति। यथा– रामकृष्णौ आगच्छतः इत्यत्र आगमनक्रियायां रामकृष्णयोः द्वयोरपि अन्वयः भवति। अन्यपदार्थप्रधानो बहुव्रीहिः। समासस्य विग्रहवाक्ये विद्यमानस्य पदस्य अर्थः समस्तपदस्य न भवति। विग्रहे अविद्यमानस्यैव पदस्य अर्थः समस्तपदस्य अर्थात् समासपदस्य भवति। यथा– चित्राः गावः यस्य सः इत्युक्ते गोपालकः इत्यर्थः। चित्रगुमानय इत्युक्ते गोपालकः आनीयते न तु चित्राः गावः।

## ३.४. सर्वशब्दस्य सर्वनामसञ्ज्ञानुपपत्तिः

एवम् अन्यपदार्थप्रधानो बहुव्रीहः इत्युक्तत्वात् बहुव्रीहिसमासस्य अन्यपदार्थत्वं वर्तते। अतः समासे विद्यमानस्य सर्वशब्दस्य सर्वनामसञ्ज्ञा न सिध्यति। बहुव्रीहिसमासस्य अन्यपदार्थत्वात् सर्वशब्दस्य सर्वनामसञ्ज्ञा न सिध्यति इत्यत्र उदाहरणमेकं पश्यामः।

तद्यथा– चित्रगुः आनीयताम् इति एकं वाक्यम्। अस्मिन् वाक्ये चित्रगुः इति समस्तं पदम्। चित्राः गावः यस्य सः इति विग्रहः। चित्रगुशब्दः अर्थस्तु गोपालकः एव भवति। सः गोपालकः एव आनीयते न तु ताः गावः। एवमत्रापि सर्वशब्दं विहाय अन्येषां शब्दानां सर्वनामसञ्ज्ञा सिध्यति, सर्वशब्दमतिरिच्य। कथं सर्वशब्दस्य सर्वनामसञ्ज्ञा भवति इति सन्देहः।

## ३.५. सर्वादीनि इत्यत्र तद्गुणसंविज्ञानबहुव्रीहिः

बहुव्रीहिसमासे तावत् तद्गुणसंविज्ञानबहुव्रीहिः अतद्गुणसंविज्ञानबहुव्रीहिः इति द्विधा भेदः वर्तते। सः = समस्यमानपदार्थः, गुणः = अवयवः तादृशो वा यस्य सः तद्गुणः। एतादृशस्यापि अन्यार्थस्य संविज्ञानं भवति इति संविज्ञानबहुव्रीहिः। न तद्गुणः अतद्गुणः, अतद्गुणस्यापि अन्यार्थस्य संविज्ञानं भवति इति अतद्गुणसंविज्ञानबहुव्रीहिः भवति। चित्रगुः आनीयताम् इति वाक्ये चित्रगुः इत्युक्ते चित्राः गावः न परन्तु अन्यः गोपालकः एव। एतत्तु

अतद्गुणसंविज्ञानस्य उदाहरणम्। तद्गुणसंविज्ञानस्य उदाहरणम् इदानीं पश्यामः। चित्रवाससमानय इति वाक्ये चित्रवाससम् इत्युक्ते चित्रं वासः यस्य सः इति विग्रहः। चित्रवाससमानय इत्युक्ते चित्रं वासः युक्तः अन्यपदार्थः देवदत्तः आनीयते न तु चित्रं वासः त्यक्तः देवदत्तः आनीयते। लोहितोष्णीषः ऋत्विजः प्रचरन्ति इति वाक्ये लोहीतोष्णाः इत्युक्ते लोहितम् उष्णीषम् येषां ते इति विग्रहः। लोहितोष्णीषा ऋत्विजः प्रचरन्ति इत्युक्ते लोहितम् उष्णीषं युक्ताः ऋत्विजः प्रचरन्ति न तु लोहितम् उष्णीषं त्यक्ताः ऋत्विजः प्रचरन्ति। एवमेव पीताम्बरः इत्यादिषु अपि तद्गुणसंविज्ञानबहुव्रीहिः भवति।

## ३.६. विग्रहवाक्ये एव तद्गुणसंविज्ञानबहुव्रीहेः संसूचनम्

सर्वः (सर्वशब्दः) आदिः येषां तानि इमानि सर्वादीनि इति विग्रहवाक्ये एव एषः तद्गुणसंविज्ञानबहुव्रीहिः इति संसूचितम्। कथमिति चेत् सर्वः आदिः येषां तानि इत्येव पर्याप्तम्। तथापि सर्वः आदिः येषां तानि इमानि इत्युक्तम्। तानि इमानि इति सर्वनामद्वयम् उपात्तम्। इदंशब्दः सर्वदा प्रत्यक्षविषये एव उपयुज्यते। तादृश-इदंशब्दस्यापि प्रयोगः विग्रहे अस्ति। तेनैव सर्वनामगणे सर्वशब्दस्यापि अन्तर्भावः अस्ति, अतः एषः तद्गुणसंविज्ञानबहुव्रीहिः इति संसूचितम्।

एवञ्च सर्वादीनि इत्यत्र तद्गुणसंविज्ञानबहुव्रीहिः अस्ति। अतः सर्वशब्दस्यापि सर्वनामसञ्ज्ञा भवति इति मन्तव्यम्।

## ४.०. सर्वनामपदसाधुत्वाधिकरणम्

अत्र सर्वनाम इति पदे णत्वं नास्ति, अतः णत्वप्रतिषेधः कर्तव्यः इति आक्षेपं कृत्वा णत्वं न भवति इति सिद्धान्तः कथ्यते।

## ४.१ सर्वनामानि इति पदे णत्वप्रतिषेधः कर्तव्यः इत्याक्षेपः

सर्वादीनि सर्वनामानि (१.१.०२७) इति सूत्रेण सर्वादिगणे पठितानां सर्वनामसञ्ज्ञा विधीयते। अत्र सर्वनामानि इति सञ्ज्ञापदम्। पाणिनीयसूत्रे पूर्वपदात् सञ्ज्ञायामगः (८.४.००३) इति सूत्रमस्ति। एतेन सूत्रेण सर्वानामानि इति सञ्ज्ञापदे सर्वशब्दात्परं विद्यमानस्य नाम– इति पदस्य नकारस्य णत्वं भवति। सूत्रे तु सर्वनामानि इति णत्वरहितस्य प्रयोगः कृतः। अतः पूर्वपदात् सञ्ज्ञायामगः (८.४.००३) इति सूत्रेण प्राप्तस्य णत्वस्य प्रतिषेधः वक्तव्यः इति आक्षेपः क्रियते।

## ४.२ णत्वाभावस्य समाधानम्

लोके सर्वनाम इति णत्वरहितस्यैव व्यवहारः क्रियते। अत्र शास्त्रेऽपि तस्यैव साधुत्वं प्रतिपाद्यते। अतः सर्वादीनि सर्वनामानि (१.१.०२७) इति सूत्रे सर्वनामानि इति पदं निपातनं कृतम्। अतः अत्र पूर्वपदात् सञ्ज्ञायामगः (८.४.००३) इति सूत्रेण प्राप्तस्य णत्वस्य प्रतिषेधार्थं पुनः किमपि वक्तव्यस्य आवश्यकता नास्ति।

## ४.३ निपातनप्रतिषेधयोः जिज्ञासा

अधुना निपातनं नाम किं, प्रतिषेधः नाम कः इति ज्ञात्वयमस्ति। प्रतिषेधः इत्युक्ते अविशेषेण किञ्चित् उच्यते। ततः परं विशेषेण न इति उच्यते। तथा न इति कथनेन उक्तस्थले पूर्वम् अविशेषेण यदुक्तं तदत्र न भवति इत्यभिप्रायो ज्ञायते। निपातनमित्युक्तेऽपि एवमेव। अविशेषण किञ्चिदुक्त्वा विशेषेण न इति उच्यते। अविशेषण णत्वमुक्त्वा विशेषेण णत्वरहितस्य निपातनं क्रियाते। अतः अत्र णत्वं न भवति इति व्यक्तं भवति।

## ४.४ निपातनात् विकल्पः प्राप्नोति इति आक्षेपः

इदानीं निपातनस्योपरि आक्षोपः क्रियते। तथाहि– निपातनस्य णत्वरहितरूपस्य साधुत्वकथने तात्पर्यं न तु णत्वरूपस्य प्रतिषेधे तात्पर्यम्। अतः निपातनेन णत्वरहितं रूपं भवति, यथाप्राप्तं णत्वरूपमपि भवति। अन्यत्रापि एतादृशम् उदाहरणमस्ति। यथा इको यणचि (६.१.०७७) इति सूत्रेण इकः स्थाने यण् अपि भवति यथाप्राप्तः इक् अपि श्रूयते। एवमेव निपतनात् अणत्वमपि भवति, यथाप्राप्तं णत्वमपि भवति– इति।

समाधानम्– एवम् आक्षेपः भवितुं नार्हति, कुतः इत्युक्ते इको यणचि (६.१.०७७) इति सूत्रेण इकः इति षष्ठ्याः अत्र निर्देशः क्रियते। षष्ठीविभक्तिः स्थानिनं निवर्तयति। अतः इकं निवार्य इकः स्थाने यण् आगच्छति। लोकेऽपि दर्भाणां स्थाने शरैः प्रस्तरितव्यम् इति कथनेन न तत्र दर्भाः प्रस्तीर्यन्ते। परन्तु शराः एव प्रस्तीर्यन्ते। स्थानिनं निवर्तयति इत्युक्ते स्थानं यदासीत् इक् इति, तत् साधु इति बुद्धिं निवर्तयति इत्यर्थः।

पुनः आक्षेपः– एवं तर्हि यत्र षष्ठी नोच्यते तत्र रूपद्वयं स्यात्। कर्तरि शप् (३.१.०६८), दिवादिभ्यः श्यन् (३.१.६९) इत्यत्र दिवादिभ्यः, दिवादिभ्यः श्यन् (३.१.६९) इत्युक्तत्वात् श्यन् प्राप्नोति। यथा प्राप्तः शप् अपि भवति।

समाधानम्– श्यन्-प्राप्त्यनन्तरं शप्-अपि प्राप्नोति इति आक्षेप्तु न शक्यते।

यतो हि– शपः आदेशत्वेन श्यन्नादयः प्रत्ययाः क्रियन्ते। तर्हि शपः ग्रहणं तु कर्तव्यमिति न चिन्तनीयम्। शप् तु प्रकृतं कर्तरि शप् (३.१.०६८) इत्यस्मात् सूत्रात् अनुवर्तते। अतः श्यनः प्राप्त्यनन्तरं शप् न भवति, रूपद्वयमपि न भवति।

पुनः आक्षेपः– एवमपि कर्तरि शप् (३.१.०६८) इति सूत्रे शप् तु प्रथमानिर्दिष्टं न तु षष्ठीनिर्दिष्टम्। षष्ठीनिर्दिष्टमेव स्थानिनं निवर्तयति इति।

समाधानम्– अत्र दिवादिभ्यः इति पञ्चमी, शप् इति प्रथमा। तस्मादित्युत्तरस्य (१.१.०६७) इति सूत्रस्य सामर्थ्यात् दिवादिभ्यः इति पञ्चमीविभक्तिः शप् इति प्रथमां षष्ठीरूपेण परिवर्तयति। अत्र शप् इति प्रत्ययविधित्वात् पञ्चमी प्रथमायाः षष्ठीं न प्रकल्पयिष्यति इति नैव चिन्तनीयम्। यतो हि– प्रत्ययः कर्तरि शप् (३.१.०६८) इति सूत्रे विहितः, दिवादिभ्यः श्यन् (३.१.६९) इत्यत्र शप् अनुवर्तते, न तु विधीयते। अतः षष्ठीनिर्दिष्टं स्थानिनं निवर्तयति।

आक्षेपः– इदानीं सूत्रे पञ्चमीविभक्त्या निर्दिष्टं चेत् पूर्वसूत्रेण अनुवृत्तं प्रथमाविभक्तिपदं षष्ठीविभक्त्यन्तेन विपरिणम्य, षष्ठीनिर्दिष्टं स्थानिनं निवर्तयति इति भवदुक्तरीत्या अङ्गीकर्तुं शक्यते। परन्तु प्रागिवात्कः (५.३.०७०), अव्ययसर्वनाम्नामकच् प्राक् टेः (५.३.०७१) इत्यत्र अव्ययसर्वनाम्नाम् इति षष्ठीविभक्त्यन्तेन निर्देशः कृतः। अनेन सूत्रेण अकच्-विधानानन्तरं पूर्वसूत्रेण अनुवृत्तः कप्रत्ययोऽपि भवति। क-इति प्रथमान्तं पदं षष्ठीविभक्त्यन्तेन विपरिणम्यते चेदेव क-इति स्थानी भवति, क-इत स्थानिनं निवर्त्य अकचं विधातुं शक्यते। तम् अनुवृत्तं क-इति पदं षष्ठीविभक्त्यन्तेन विपरिणमयितुमत्र पञ्चमीविभक्तिः नास्ति। अतः अकचः विधानानन्तरं कप्रत्ययोऽपि भवति।

## ४.५ येन नाप्राप्ति न्यायेन समाधानम्

येन नाप्राप्ते यो विधिरारभ्यते तस्य बाधको भवति इति न्यायः अर्थात् परिभाषा अस्ति। येन = कप्रत्ययेन अत्यन्तम् अप्राप्ते (न+प्राप्ते) = सुतरां नागच्छति सति यो विधिः = अकच्-विधिः आरभ्यते सः = अकच् तस्य = कप्रत्ययस्य बाधकोः भवति। अतः उक्तरीत्या कप्रत्ययः नागच्छति। केवलम् अकच् एव भवति।

एवंक्रमेण निपातनमपि मन्तव्यम्। येन = णत्वेन अत्यन्तम् अप्राप्ते (न+प्राप्ते)= सुतरां नागच्छति सति यो विधिः = णत्वरहितः आरभ्यते सः = णत्वरहितः तस्य = णत्वस्य बाधकोः भवति।

## ४.६. निपातनस्थलेषु येन नाप्राप्ते न्यायस्वीकारे दोषः

येन नाप्राप्तिन्यायवत् निपातनं मन्तव्यमिति चेत् अन्यत्र दोषः भवति। तथा हि- अपरस्पराः क्रियासातत्ये (६.१.१४४) इति सूत्रे अपरस्पराः इति पदं निपात्यते। तत्र भाष्ये सातत्ये इति पदं कथं सिध्यति विचारवेलायां समो हिततततयोर्वा लोपः इति वार्तिकमुक्तम्। हित-ततयोः परयोः सम्-इत्यस्य मकारस्य लोपः विकल्पेन भवति इति वार्तिकाशयः। सूत्रकारैस्तु अपरस्पराः क्रियासातत्ये (६.१.१४४) इति सूत्रे सातत्ये इति मकाररहितपाठः निपात्यते। सततं, सन्ततम् इति रूपद्वयमपि भवन्तोऽपि वाञ्छन्ति। निपातनानि बाधकानि भवन्ति इत्यङ्गीक्रियते, तदा सततं, सन्ततम् इति रूपद्वयं न सिध्यति।

## ४.७ दोषपरिहारद्वारा सिद्धान्तप्रतिपादनम्

अत्र बाधकान्येव निपातनानि भवन्ति। सततं, सन्ततम् इत्यादिस्थलेषु प्रकारान्तरेण साधनीयम्। तथा हि–

लुम्पेदवश्यमः कृत्ये तुम् काममनसोरपि।
समो वा हिततततयोर्मांसस्य पचि युड्घञोः॥

इत्यनेन श्लोकेन कृत्यप्रत्यये परे अवश्यं-शब्दस्य अन्त्यमकारस्य, काममनसोः शब्दयोः परयोः तुमुन्प्रत्ययस्य अन्त्यमकरास्य, हित-ततयोः परयोः सम्-इत्यस्य अन्त्यमकारस्य विकल्पेन, युड्प्रत्ययविशिष्टे, घञ्प्रत्ययविशिष्टे पचधातौ परे मांसशब्दस्य अन्त्य-अकारस्य विकल्पेन लोपः भवति इत्यर्थः। उदाहरणानि– कृत्यप्रत्ययस्य अवश्यकार्यम्, अवश्यकृत्यम्। तुमुनः भोक्तुकामः, भोक्तुमनाः। समः सहितं, संहितं, सततं, सन्ततम्। मांसस्य पचि युटः मांस्पचनं, मांसपचनम्। मांसस्य पचि घञः मांस्पाकः, मांसपाकः। इत्ययं श्लोकःअवश्यम् अङ्गीकर्तव्यः। अपरस्पराः क्रियासातत्ये (६.१.१४४) इति सूत्रे सातत्ये इति निर्देशेन एकदेशानुमतिद्वारा पूर्वोक्तश्लोकः अङ्गीकर्तव्यः इति ज्ञाप्यते। तेन ज्ञापनेन सततं, सन्ततम् इति रूपद्वयमपि सिध्यति। न तु सातत्ये इति निपातनेन साक्षात् रूपद्वयं न सिध्यति। अत्र विकल्पेन मकारलोपत्वात् सन्ततम् इत्यपि सिद्धम्। सततशब्दात् ष्यञि कृते सातत्यम् इति रूपं सिध्यति, तद्वित् सन्ततशब्दादपि ष्यञि कृते सान्तत्यम् इति स्यात् इति न मन्तव्यम्। अनभिधानात्, तादृशप्रयोगस्य अभावात् सान्तत्यमिति ष्यञन्तप्रयोगः न भवति।

अन्यच्च सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च (४.३.०२३) इति सूत्रेण

पुरा इत्यव्ययात् ट्युप्रत्यये तुडागमे च पुरातनम् इति सिध्यति। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु (४.१.१०५) इति सूत्रे पुराणशब्दनिपातनेन पुरातनशब्दस्य बाधः भवति इति नैव चिन्तनीयम्। पृषोदरादीनि यथोपदिष्टम् (६.३.१०९) इति सूत्रेण प्रषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः इत्युच्यते। एवञ्च पुराणशब्दस्तु पुराणप्रोक्तेषु ब्राह्मणकल्पेषु (४.१.१०५) इति सूत्रे पुराणशब्दनिपातनेन सिध्यति। पुरातनशब्दस्तु शिष्टैः प्रयुज्यमानत्वात् पृषोदरादीनि यथोपदिष्टम् (६.३.१०९) इति सूत्रेण प्रषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः इत्युक्तत्वात् अस्य आकृतिगणत्वाच्च सिध्यति।

एवंरूपेण एतादृशोदाहरणेषु यत्नं विधाय प्रकरणान्तरेषु प्रकारान्तरेण साधनीयम्। अतः बाधकान्येव निपातनानि भवन्ति इति समाधानं युक्तमेव। एवञ्च सर्वनाम इत्यत्र निपातनात् णत्वं न भवति।

एवंक्रमेण सत्सु विचारणीयेषु बहुष्वंशेषु केचन विचाराः मयात्र प्रस्तुताः। इति शम्।

॥ गुरुदेवार्पणमस्तु ॥

# अधिवेदं निपातनप्रसङ्गः– एकं समीक्षात्मकम् अध्ययनम्


## श्रीमन्त-चट्टोपाध्यायः*


## भूमिका

यल्लक्षणेनानुत्पन्नं तत्सर्वं निपातनात्सिद्धमिति फणिभाष्ये भाष्यकृद्वचनानुसारं लौकिकलक्षणेभ्यो भिन्नत्वेन अलौकिकत्वाद् लौकिकव्याकरणेन असिद्धत्वाद्वा समे वैदिकशब्दाः निपातनकक्षामध्यारोहन्ति न वेति जिज्ञासायामिदं वक्तव्यं यद् अलौकिकत्वेऽपि न हि समे वैदिकशब्दा निपातनमध्ये परिगणयितुं शक्यन्ते। साध्यसिद्धभेदेन शब्दा द्विविधाः। येषां शब्दानां सिद्ध्यर्थं पाणिनिना सूत्रं विहितं, परन्तु सूत्रेषु सिद्धरूपेण तेषामुल्लेखो नास्ति, ते एव साध्यशब्दा इत्यभिधीयन्ते। यथोदाहरणं जनासः इति प्रयोगसिध्यर्थं पाणिनिना सूत्रितम् आज्जसेरसुक् (अ० ७-१-५०) इति सूत्रम्। किन्तु सूत्रेऽस्मिन् जनासः इति शब्दस्य साक्षात् कोऽपि उल्लेखो नास्ति। तस्माज् जनासः इति शब्दः साध्यः। अपरतः क्वचित् सूत्रेषु पाणिनिना साक्षात् सिद्धशब्दा उद्दिष्टाः।तत्र प्रक्रियामुखेन साध्यतया कर्तव्यं किमपि तु नोपदिष्टम्। तादृशशब्दाः सिद्धशब्दसमुद्देशो निपातनमिति वचनमाश्रित्य ते सिद्धशब्दा इत्युच्यते। वैदिकप्रक्रियायामेते सिद्धशब्दा एव निपातनपदवाच्याः। यथा अभ्युत्सादयां प्रजनयाम्...(अ० ३-१-४२) इति सूत्रे भगवता पाणिनिना अभ्युत्सादयामकः इति शब्द उल्लिख्यते। परन्तु अनेन सूत्रेण प्रत्ययादिसंयोगरूपं किमपि कर्तव्यं कर्म न विहितमस्ति। तस्मादस्य सिद्ध्यर्थं निपातनमपेक्षितमस्ति। अत्र आम्प्रत्ययः, अकः इति अनुप्रयोगश्च निपात्यते। एवमेव अवयाः श्वेतवाः पुरोडाश्च (अ. ८-२-६७) इत्यत्रापि अवयाः इत्यादीनां सिद्धानामेव शब्दानामुपदेशात् ते निपातनेन सिद्धाः।

अपि च, यद्येवं दृश्यते यच्छन्दसि सामान्यलौकिकसूत्रेण कोऽपि शब्दो न सिध्यते, सिध्यर्थं वा पाणिनिना किमपि विशेषवैदिकसूत्रमपि न कृतं, तर्हि तेषां शब्दानां पाणिनिना साक्षात्सूत्रेषु उल्लेखाभावेऽपि ते शब्दा निपातनपदवीमधिगच्छन्ति।

---


*शोधच्छात्रः, संस्कृत-पालि-विभागे, विश्वभारतीविश्वविद्यालयस्य

## व्यत्ययनिपातनयोः प्रभेदः

विधेरन्यथाभावो वा व्यतिक्रम्य गमनं वेत्यर्थे व्यतिपूर्वादिणो भावे णचि कृते सति निष्पन्नो व्यत्ययः क्वचिदन्यविषयं, क्वचिद्द्वौ, क्वचिद्वा विषयत्रयमवगाहते। न्यगादि च भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां– विकरणानां बहुलं व्यत्ययः स्यात् छन्दसीति। यथा छन्दसि भिद्धातोः रुधादित्वेऽपि रुधादिभ्यः श्नम् (अ० ३-१-७८) इत्यनेन श्नम्विकरणे भिनत्तीति रूपं न भूत्वा कर्तरि शप् (अ० ३-१-६८) इति शपि भेदतीति आद्यपक्षस्योदाहरणम्। द्वितीयतो नयतेर्लोटि शप्-सिप्-विकररणद्वयेन च्छन्दसि नेषतु इति रूपं द्वितीयपक्षस्योदाहरणम्। चरमपक्षस्योदाहरणं तावत् तरतेर्विध्यादौ लिङि उः, शप्, सिप् चेति विकरणत्रयेण छन्दसि तरुषेम इति रूपम्। चन्द्रकान्तकृतकातन्त्रछन्दःप्रक्रियायां व्यत्ययो विभक्तिलिङ्गवचनानाम् इति सूत्रस्य वृत्तौ चन्द्रकान्तेन लिखितं– विभक्तिलिङ्गवचनानां बहुलं व्यत्ययो भवतीति। यथा चक्रन्न क्रंददाध्ये शिवायै (ऋ० १०-९५-२३) इत्यत्र शिवे इति प्राप्ते विभक्तिलिङ्गयोर्व्यत्ययः। वचनव्यत्ययस्य यथोदाहरणं– प्रजापतिः प्रथमजा ऋतस्य (तै० आ० १/२३) इत्यत्र प्रथमज इति प्राप्ते व्यत्ययेन प्रथमजा इति। अपरतो निपूर्वात् पत्-धातोः णिचि व्युत्पन्नस्य निपातनस्य लोपागमवर्णविकारवर्णविपर्ययरूपस्थलचतुष्टयं वर्तते। तथा चोक्तं भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां पृषोदरादीनि यथोपदिष्टम् (अ० ६-३-१०९) इति सूत्रे–

भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्।
गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्॥ इति।

अध उभयव्याकरणदिशा निपातनपर्यायभूतानां सिद्धशब्दानां स्थलानि प्रदर्श्य तेषां निपातनत्वविचारो यथामति विधीयते–

अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयां क्रियाद् विदामक्रन्निति च्छन्दसि (अ० ३-१-४२)– वेदे अभि-उद्-षद्लृ विशरणगत्यवसादनेषु इति धातोः णिचि अनुबन्धलोपे अभि+उद्+सद् इत्यवस्थायाम् अत उपधाया (अ० ७-२-११६) इत्यनेन उपधावृद्धौ अभि+उद्+सादि इति दशायां सनाद्यन्ता धातवः (अ० ३-१-३२) इत्यनेन अस्य धातुसंज्ञात्वाद् लुङि निपातिते आम्प्रत्यये परतः अयामन्ताल्वाय्येत्न्विष्णुषु (अ० ६-४-५५) इत्यनेन णेरयादेशे आमः (अ० २-४-८१) इत्यनेन लुङ्लोपे अभ्युत्सादयामित्यत्र पूर्वोक्तस्य आमः लिटि विहितत्वाल्लिङि न प्राप्नोतीति कृत्वा आम्प्रत्ययस्तथा अभ्युत्सादयामकः इत्यत्र अक इति अनुप्रयोगश्च निपातनसिद्धः। यतः अकरिति कृञो लुङि तिपि मन्त्रे घस (अ० २-४-८०) इत्यनेन

च्लेर्लुकि सार्वधातुकगुणे तिपो हल्ङ्यादिलोपे रूपमिदं निष्पत्तिमेति। तस्माद् अकरिति अनुप्रयोग इत्युच्यते। लोके तु अभ्युदसीषदत् इति रूपम्।

एवं छन्दसि प्र-जनी प्रादुर्भावे इति धातोः णिचि प्रजन इ इति दशायां अत उपधायाः इत्यनेन उपधावृद्धौ प्राप्तायां सत्यामपि जनिजृष्क्नसु इत्यनेन गणसूत्रेण मित्संज्ञया मितां ह्रस्वः (अ० ६-४-९२) इति सूत्रेण ह्रस्वत्वस्य प्रजनि इत्यस्य धातुसंज्ञायां लुङ्लकारे निपातिते आम्प्रत्यये परतः अयामन्ताल्वाय्येत्न्विष्णुषु (अ० ६-४-५५) इत्यनेन णेरयादेशे प्रजनयाम् लुङ् इति स्थितौ आमः (अ० २-४-८१) इत्यनेन लुङ्लोपे प्रजनयामिति पूर्ववद् लिङि आम्प्रत्ययस्तथा प्रजनयामकः इत्यत्र अक इति अनुप्रयोगश्च निपातनकल्पितः। लोके प्राजीजनत् इति रूपं भवति।

छन्दसि चिञ् चयने इति धातोः लुङि आम्प्रत्यये द्वित्वे कृते अन्तिमचकारस्य कुत्वे च चिकि आम् लुङ् इति स्थितौ सार्वधातुकार्धतुकयोः (अ० ७-३-८४ ) इत्यनेन गुणे एकारे, एचोऽयवायावः (अ० ६-१-७८) इत्यनेन अयादेशे चिकयाम् लुङ् इत्यवस्थायाम् आमः इत्यनेन लुङ्लोपेन अकरिति लुङन्तपदस्य अनुप्रयोगेणच चिकयामकरित्यत्रापि कुत्वम्, आम्प्रत्ययः, अकरिति अनुप्रयोगश्च निपातनेन भवति। लौकिकभाषायां अचैषीत् इति भवति। तथा च न्यस्यते न्यासकारेण– ककारोऽप्यत्र निपात्यते इति।

एवं वेदे रमु क्रीडायाम् इति धातोः णिजन्ते लुङि रम् इ इति दशायाम् अत उपधाया इत्यनेन उपधावृद्धौ प्राप्तौ अपि जनिजृष्क्नषृरञ्जोदमन्ताच्च इत्यनेन मित्संज्ञा, मितां ह्रस्वः इत्यनेन च उपधाह्रस्वत्वे रम् इ इति भवति। अनन्तरं सनाद्यन्ता धातवः इत्यनेन धातुसंज्ञा, तन्निबन्धनलुङ्लकारे च निपातनेन आम्प्रत्यये, आमः इति सूत्रेण लुङ्लुकि अकरिति अनुप्रयोगेण च रमयामकरित्यत्र नियमेन अप्राप्त आम्प्रत्ययः , अकरिति अनुप्रयोगश्च निपात्यते। अरीरमत् इति लोकप्रयोगः। तथा हि लिख्यते सुबोधिन्यां जयकृष्णेन– ण्यन्तेभ्य एभ्य लुङि आम्प्रत्ययो निपात्यते इति। चन्द्रकान्तेन कातन्त्रछन्दःप्रक्रियायाः अभ्युत्सादयां प्रजनयां रमयां चिकयामकः (आख्याते चतुर्थः पादः, ७) इति सूत्रे आम्प्रत्ययस्य अकरिति विसर्गान्तस्य चानुप्रयोगस्य निपातनं मनसिकृत्य अवादि– एते निपात्यन्ते। सदि जनि रमिभ्य इण्णन्तेभ्योऽद्यतन्यामाम्प्रत्ययोऽक इति विसर्गस्य चानुप्रयोगः। चयतेरद्यतन्यामाम्प्रत्ययोऽक इत्यस्य चानुप्रयोगो निपात्यते इति।

छन्दसि पूङ्वने इति भ्वादिधातोः, पूञ् पवने इति क्र्यादिधातोर्वा णिचि आशीर्लिङि पू+णिच्+लिङ् इति स्थितौ पूगन्तलघूपधस्य च (अ० ७-३-८६)

इत्यनेन गुणस्य सावकाशादपि निपातनेन तन्निषेधे अचो ञ्णिति (अ० ७-२-११५) इत्यनेन धातोरादिवृद्धौ एचोऽयवायावः (अ० ६-१-७८) इत्यनेन आवादेशे च पावि लिङ् इत्यवस्थायां सनाद्यन्ता धातवः (अ० ३-१-३२) इत्यनेन अस्य धातुसंज्ञात्वाद् लिङि निपातिते आम्प्रत्यये परतः अयामन्ताल्वाय्येत्न्विष्णुषु (अ० ६-४-५५) इत्यनेन णेरयादेशे आमः (अ० २-४-८१) इत्यनेन लिङ्लोपेन पावयाम् इति जाते क्रियादिति आशीर्लिङन्तानुप्रयोगेण पावयांक्रियादिति रूपं सिद्ध्यति– अत्र प्राप्तो गुणनिषेधः, अप्राप्त आम्प्रत्ययः, क्रियादिति लिङन्तानुप्रयोगश्च निपातनकल्पितः। लौकिकभाषायां पाव्यादिति भवति। तथा हि लिख्यते काशिकाकारेण– पवतेः पुनातेर्वा ण्यन्तस्य लिङ्यां निपात्यते, क्रियादिति चास्यानुप्रयोगः इति। न्यासकृता तत्र विहितं-लिटि विहितत्वाल्लिङि न प्राप्नोति, ततो निपात्यते इति।

वेदे विद्धातोः लुङि आम्प्रत्यये विद् आम् लुङ् इति जाते पुगन्तलघूपधस्य चइत्यनुसारं गुणप्राप्तेऽपि निपातनात् तत्प्रतिषेधे विदाम् लुङ् इत्यवस्थायाम् आमः इति सूत्रेण लुङ्लोपे अक्रन् इति लुङन्तपदस्य अनुप्रयोगेण विदामक्रन्निति। यत्र अक्रन् इति डुकृञ्-धातोः लुङः प्रथमपुरुषस्य बहुवचने निष्पत्तिमेति। विदामक्रन्नित्यत्रापि गुणप्रतिषेधः, आम्प्रत्ययः, अक्रन्निति लुङन्तपदस्य अनुप्रयोगश्च निपातनसिद्धः। काशिकाकारेण न्यगादि- विदेर्लुङ्याम् निपात्यते, गुणाभावश्च, अक्रन्निति चास्यानुप्रयोगः इति। कातन्त्रछन्दःप्रक्रियायां चन्द्रकान्तेन अपस्पृधेथां विदामक्रन् पावयांक्रियात् (आख्याते चतुर्थः पादः, ५) इति सूत्रेऽपि अनयोः आम्प्रत्ययस्य तथा कृञ अनुप्रयोगस्य निपातनमुरसिकृत्य प्रत्यपादि- विदामक्रन्निति विदेरन्यतन्यामाम्प्रत्ययो ऽडादेः कृञश्चानुप्रयोगः। पावयांक्रियादिति पवतेः पुनातेर्वा आशिष्याम् प्रत्ययः कृञश्चानुप्रयोगो निपात्यते इति।

छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्या देव-यज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि (अ० ३-१-१२३)– निष्टर्क्य इत्यत्र निस्पूर्वात् कृन्ततेः ऋदुपधाच्च (अ० ३-१-११०) इति सूत्रेण क्यपि प्राप्ते ण्यत्प्रत्ययः , धातोः कः त्, तः क् इति विपर्यासः, निसः षत्वञ्च निपातितम्। काशिकाकारेण प्रोक्तं– कृती छेदने (धा.पा. १४३६) इत्यस्मान्निस्पूर्वात्क्यपि प्राप्ते ण्यत्, आद्यन्तविपर्ययश्च , निसश्च षत्वं निपात्यते इति। प्रपञ्चितञ्च सुबोधिन्यां जयकृष्णेन निष्टर्क्यादयः शब्दाश्छन्दसि निपात्यन्ते इति।

भाष्यकारेण निष्टर्क्य इति किं निपात्यते इति आक्षेपभाष्यस्य वार्तिके भाषितं– निष्टर्के कृतेराद्यन्तविपर्ययश्छन्दसि कृताद्यर्थः इति। अस्य भाष्यवार्तिकस्य

व्याख्यानं कुर्वता नागेशेन उद्योते आद्यन्तविपर्ययस्य निपातनं न मनसिकृत्य लिख्यते– कृताद्यर्थ आद्यन्तविपर्यय आवश्यकस्तेनात्रापि सिद्धे तदर्थं न निपातनमिति। अर्थात् कृतशब्दादौ यथा आदेरन्तत्वम् , अन्तस्य चादित्वं दृश्यते तथैव विपर्ययः अत्रापि आवश्यकतया भवति, न तु निपातनात्। अन्तिमे भगवता भाष्यकारेण निष्टर्के व्यत्ययमङ्गीकृत्य षत्वमात्रफलकञ्च निपातनमिति मनसि निधाय उपस्थापितं मतान्तरवार्तिकं– निष्टर्के व्यत्ययं विद्यान्निसः षत्वं निपातनादिति। शेखरे नागेशेनापि केवलं निसः षत्वस्य निपातनमुरसिकृत्य प्रत्ययवर्णयोश्च निपातनं नाङ्गीकृत्य व्यत्ययः स्वीकृतः– निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनादिति व्यत्ययोऽत्र प्रत्ययवर्णयोरिति। कातन्त्रछन्दःप्रक्रियायाः निष्टर्क्यदेवहूयदेवयज्याः (आख्याते चतुर्थः पादः, ४) इति सूत्रे अस्य निपातनं स्वीकृत्य न्यगादि- निस्पूर्वात् कृन्ततेर्ऋदुपधलक्षणे क्यपि प्राप्ते यः वर्णविपर्ययो निसः षत्वञ्च निपात्यते इति।

देवहूयः इत्यत्र देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यपि देव+ह्वे, हु+क्यप् वेत्यवस्थायां वचिस्वपियजादीनां किति (अ० ६-१-१५) इत्यनेन ह्वे इत्यस्य सम्प्रसारणे हुत्वे देव-हु+य इति स्थितौ दीर्घत्वं तथा अचो यत् (अ० ३-१-८७) इति यति प्राप्ते क्यप्प्रत्ययस्तथा ह्रस्वस्य पिति कृति तुक् (अ० ६-१-७१ ) इत्यनेन तुगागमः प्राप्नोतीति कृत्वा तुगभावोऽत्र निपातनसिद्धः। उपन्यस्तञ्च न्यासकृता– यदा ह्वेञ् स्पर्द्धायाम् इत्यस्मात् क्यप् तदा यजादित्वात् संप्रसारं, हलः इति दीर्घः। यदा तु हु दाने इत्यस्मात्, तदा तुगभावो निपात्यते दीर्घत्वञ्चेति। चन्द्रकान्तेन कातन्त्रछन्दःप्रक्रियायाः निष्टर्क्यदेवहूयदेवयज्याः इति सूत्रे निपातनं स्वीकृत्य प्रपञ्चितं– देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च निपात्यते इति।

प्रणियः उन्नियश्चेत्यत्र यथाक्रमं प्र-नीधातोः, उद्-नीधातोश्च, अचो यत् इति यत्प्रत्ययस्य अवकाशाद् अप्राप्तः क्यप्प्रत्ययो निपातितः।

उच्छिष्यः इति रूपम् उत्पूर्वकात् शिष्धातोः क्यप्प्रत्यये दकारस्य श्चुत्वेन जकारे कृते, शश्छोऽटि (अ० ८-४-६३) इत्यनेन शस्य छत्वं, ततः खरि च (अ० ८-४-५५) इति जकारस्य श्चुत्वे निष्पत्तिर्मेति। अत्र अनभिप्रेतः क्यप्प्रत्ययो निपातितः, हलन्तत्वाद् ऋहलोर्ण्यत् (अ० ३-१-१२४) इत्यनेन ण्यत इष्टत्वात्। कातन्त्रछन्दःप्रक्रियायाः प्रणीयोन्नीयोच्छिष्यापृच्छ्यब्रह्मवाद्यप्रतिषीव्याः (कृत्सु प्रथमपादः, ६) इति सूत्रे वृत्तिकृता चन्द्रकान्तेन एतेषां निपातनम् उरीकृत्य निर्णीतं– प्रान्नियः उदो नीशिषिभ्यां क्यप् निपात्यते इति।

मर्यः, स्तर्या ध्वर्यश्चेत्यत्र यथाक्रमं मृङ्-स्तृञ्-धृभ्यो ऋहलोर्ण्यत् इत्यनेन ण्यत्प्रत्ययस्य अभिप्रेतत्वात् यत्प्रत्ययो निपातनसिद्धः। चन्द्रकान्ततर्कालङ्कारेण कातन्त्रछन्दःप्रक्रियायाः खन्यखान्यमर्यध्वर्यभाव्यस्ताव्याः (आख्याते चतुर्थः पादः, ३) इति सूत्रस्य वृत्तौ मर्यध्वर्ययोः घ्यणि प्राप्ते यप्रत्ययस्य निपातत्वम् अभ्युपगतम्। तत्रभवता स्तर्यायाः निपातनप्रसङ्गे भय्यप्रवय्यास्तर्याः (कृत्सु प्रथमपादः, ५) इति सूत्रवृत्तौ अगादि-स्तृणातेश्च स्त्रियामभिधेयायां यप्रत्ययः इति।

खन्यः इत्यत्र सर्वदैव ऋहलोर्ण्यत् इत्यनेन ण्यति प्राप्ते यत्प्रत्ययो निपात्यते। चन्द्रकान्तेनापि कातन्त्रछन्दःप्रक्रियायाः खन्यखान्यमर्यध्वर्यभाव्यस्ताव्याः इति सूत्रे यप्रत्ययस्य निपातनं मनसिकृतम्।

देवयज्या इत्यत्र देवशब्दे उपपदे यज्धातोः यप्रत्ययो निपातनसिद्धः। तथा हि लिखितं नागेशेन शेखरे– स्त्रीलिङ्गे एवेदं निपातनमिति। कातन्त्रछन्दःप्रक्रियायाः निष्टर्क्यदेवहूयदेवयज्याः इति सूत्रवृत्तौ चन्द्रकान्तेनापि देवशब्दे उपपदे यजेर्यप्रत्ययो निपात्यते इति कथितम्।

एवम् आङ्पूर्वकप्रच्छवीप्सायामिति धातोः क्यपि ग्रहिज्यावयिव्यधिवष्टि (अ० ६-१-१६) इत्यनेन सम्प्रसारणे विभक्तिकार्ये च आपृच्छ्यमिति भवति। अत्र ण्यति प्राप्ते क्यप्प्रत्ययो निपातनकल्पितः। चन्द्रकान्ततर्कालङ्कारेणापि कातन्त्रछन्दःप्रक्रियायाः प्रणीयोन्नीयोच्छिष्यापृच्छ्यब्रह्मवाद्यप्रतिषीव्याः इति सूत्रवृत्तौ क्यपो निपातनम् अङ्गीकृतम्।

प्रतिषीव्यः इत्यत्र प्रति-उपसृष्टात्सीव्यतेः क्यप्प्रत्यये, षत्वे, हलि च (अ० ८-२-७७) इत्यनेन दीर्घत्वे च निष्पद्यते। अत्रापि ऋहलोर्ण्यत् इत्यनेन ण्यत्त्वे प्राप्ते क्यप्प्रत्ययस्तथा परिनिवीनामभावे परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् (अ० ८-३-७०) इति सूत्रस्य अनवकाशादपि धातोः सस्य षत्वं निपातनकल्पितम्। कातन्त्रछन्दःप्रक्रियायां चन्द्रकान्तेन प्रणीयोन्नीयोच्छिष्यापृच्छ्यब्रह्मवाद्यप्रतिषीव्याः इति सूत्रवृत्तौ प्रोक्तं– प्रतिपूर्वात् सीव्यतेः क्यप् षत्वं च निपात्यते इति।

ब्रह्मवाद्यमित्यत्र ब्रह्मणि उपपदे सति वदेः वदः सुपि क्यप् च (अ० ३-१-१०६) इत्यनुसारं यत्क्यपोः प्राप्तयोरपि ण्यत्प्रत्ययो निपातनसिद्धः। कातन्त्रछन्दःप्रक्रियायाः प्रणीयोन्नीयोच्छिष्यापृच्छ्यब्रह्मवाद्यप्रतिषीव्याः इति सूत्रवृत्तौ घ्यणप्रत्ययेनास्य निपातत्वं समुपदर्शितं चन्द्रकान्तेन।

भाव्यः, स्ताव्यः, खान्यश्चेत्यत्र यथाक्रमं भवतेः, स्तौतेः, खनेश्च अजन्ताद्

अचो यत् (अ० ३-१-८७) इति शास्त्रानुसारं यतः अवकाशादपि ण्यत् निपातितः। कातन्त्रछन्दःप्रक्रियायाः खन्यखान्यमर्यध्वर्यभाव्यस्ताव्याः इति सूत्रवृत्तौ चन्द्रकान्तेन खान्यइत्यत्र खनेः घ्यण्प्रत्ययेन तथा भाव्यः, स्ताव्यश्चेत्यत्र भवतेः स्तौतेश्च ये प्राप्ते घ्यणा एतेषां निपातनत्वं समुपकल्पितम्।

उपचाय्यपृडमित्यत्र पृडे उत्तरपदे उपपूर्वाच्चिनोतेः अजन्तत्वात् यति प्राप्ते ण्यत्तथा धातोः लघूपधात्वाद् इकारस्य गुणे एकारे, एकारस्य च एचोऽयवायावः (अ० ६-१-७८) इत्यनुसारम् अयादेशस्यावकाशादपि अप्राप्त आयादेशो निपातनसिद्धः। चन्द्रकान्तेन कातन्त्रछन्दःप्रक्रियायाः उपचाय्यपृडं हिरण्ये (कृत्सु प्रथमपादः, ७) इत्यत्र निगदितं– हिरण्येऽभिधेये उपचाय्यपृडमिति निपात्यते। पृडे उत्तरपदे उपपूर्वाच्चिनोतेर्घ्यण् आयादेशश्च निपात्यते इति।

अवयाः श्वेतवाः पुरोडाश्च (अ० ८-२-६७)– अत्र चकारवलेन उक्थशाःइत्यस्यापि ग्रहणीयम्।

अवपूर्वस्य यजेः श्वेतवहादीनां डस्पदस्येति वक्तव्यमिति वार्तिकेन डसि कृते डित्त्वाच्च टेः (अ० ६-४-१४३) इत्यनेन टेर्लोपे सम्बुद्धौ अवयः इति एकवचनान्तस्य रूपस्येष्टत्वात् सूत्रे अवयाः इति प्रथमाया एकवचनान्ततया विपरिणामो निपातनकल्पितः।

श्वेता एनं वहन्ति इत्यर्थे श्वेतोपपदपूर्वाद् वहतेः पूर्वोक्तवार्तिकेन डस्प्रत्यये डित्त्वात् टेर्लोपे च सम्बुद्धौ श्वेतवः इत्यस्याभिप्रेतत्वात् श्वेतवाः इति प्रथमैकवचनान्तत्वं निपातनसिद्धम्।

पुरोडाः इत्यत्र पुरो दाश्यते दीयते इत्यर्थे पुरस्पूर्वस्य दाशतेः पूर्वोक्तवार्तिकेन डसि कृते सम्बुद्धौ एकवचने पुरोडः इति प्राप्ते पुरोडाः इति प्रथमैकवचनान्तत्वं, दकारस्य डकारश्च निपात्यते। उपन्यस्तञ्च न्यासकृता न्यासटीकायां– मन्त्रे श्वेतवहोक्थशस् (अ० ३-२-७१) इत्यादिनैव दकारस्य डकारो निपात्यते इति।

एवम् उक्थानि उक्थैर्वा शंसतीत्यर्थे उक्थपूर्वस्य शन्सु स्तुतौ इति धातोः पूर्वोक्तवार्तिकेन डसि टिलोपात् सम्बुद्धौ उक्थशः इति रूपस्यावकाशाद् अप्राप्त उक्थशाः इति रूपं निपातितम्।

उपर्युक्तस्थलेषु अत्वसन्तस्य चाधातोः (अ० ६-४-१४) इति सूत्रमिदं नात्र प्रवर्तते, असम्बुद्धौ इति अनुवर्तनात्। अवयाः श्वेतवाः– इति सूत्रस्य तु सम्बुद्धिविषयत्वेन इमानि स्थलानि अत्वसन्तस्य चाधातोः इति सूत्रस्य भवितुं नार्हन्ति। काशितं काशिकाकृता– अवयाः, श्वेतवाः, पुरोडाः इत्येते

निपात्यन्ते। अवपूर्वस्य यजेः , श्वेतपूर्वस्य वहेः, पुरस्पूर्वस्य दशतेः मन्त्रे श्वेतवहोक्थशास्पुरोडाशो ण्विन् (३-२-७१) अवे यजः (३-२-७२) इति ण्विनि कृते श्वेतवहादीनां डसपदस्य (का.वा.) इति डस्प्रत्यये निपातनान्येतानि। सम्बुद्धौ दीर्घार्थमेते निपात्यन्ते इति। न्यासकृता दृढीकृतं - नैते रुत्वार्थं निपात्यन्ते, किं तर्हि? सम्बुद्धौ दीर्घत्वार्थम्। ननु च दीर्घत्वमप्येषाम् अत्वसन्तस्य चाधातोः इत्येव सिद्धम्? तत्र हि सर्वनामस्थाने चासम्बुद्धौ इत्यतः असम्बुद्धौ इत्येतदनुवर्तते, तेन सम्बुद्धौ दीर्घत्वं प्राप्नोतीति तदर्थमेते निपात्यन्ते इति। उक्तञ्च सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन– एते सम्बुद्धौ कृतदीर्घा निपात्यन्ते इति।

चन्द्रकान्ततर्कालङ्कारेणापि कातन्त्रछन्दःप्रक्रियायाः सम्बुद्धववयाः श्वेतवाः पुरोडा उक्थशाः (नाम्नि चतुष्टये प्रथमः पादः, १३) इति सूत्रे एतेषां निपातनं मनसिकृत्य कथितं- सम्बुद्धावेते कृतदीर्घा निपात्यन्ते इति।

प्रयै रोहिष्यै अव्यथिष्यै (अ० ३-४-१०)–प्रयै इति प्रयातुमित्यर्थे प्रपूर्वाद् यातेः कैप्रत्यये प्र-या+कै इति स्थितौ आतो लोप इटि च (अ० ६-४-६४) इति आलोपेन निपात्यते।

रोहिष्यै इति रोढुमित्यर्थे रुहेः इष्यैप्रत्यये पूगन्तलघूपधस्य च (अ० ७-३-८६) इत्यनेन लघूपधगुणे निपातितं भवति।

अव्यथिष्यै इति नञ्पूर्वाद्व्यथेः इष्यैप्रत्यये अव्यथितुमित्यर्थे निपातितम्।

प्रोक्तञ्च भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याम् एते तुमर्थे निपात्यन्ते इति।

कातन्त्रछन्दःप्रक्रियायाः प्रयै रोहिष्यै अव्यथिष्यै दृशे विख्ये (कृत्सु द्वितीयः पादः, ११) इत्यत्र चन्द्रकान्तेन ईरितं– तुमर्थे एते निपात्यन्ते। प्रपूर्वात् यातेः कैन्प्रत्ययः। रुहेर्नञ्पूर्वात् व्यथेश्च ष्यैन् इति।

दृशे विख्ये च (अ० ३-४-११)– दृशेः ख्यातेश्च केप्रत्यये कित्त्वाद् गुणाभावे ख्यातेरालोपे च यथाक्रमं द्रष्टुं विख्यातुञ्चेत्यर्थे दृशे विख्ये च निपातनसिद्धे। चन्द्रकान्तेन प्रयै रोहिष्यै अव्यथिष्यै दृशे विख्ये (कृत्सु द्वितीयः पादः, ११) इत्यत्र केन्प्रत्ययेन उभयोः निपातनं स्वीकृत्य अवादि- दृशेर्विपूर्वात् ख्यातेश्च केन्प्रत्ययः।

अवचक्षे च (अ० ३-४-१५)- छन्दसि अवचक्षे इति अवपूर्वाच् चक्षधातोः एशप्रत्यये अवख्यातव्यमिति कृत्यप्रत्ययार्थे निपातितम्। सुबोधिन्यां जयकृष्णेन लिखितम्- अवपूर्वाच्चक्षिङ एश् प्रत्ययो निपात्यते इति। कातन्त्रछन्दःप्रक्रियायां चन्द्रकान्तेन अवचक्षे (कृत्सु द्वितीयः पादः, १६) इति सूत्रे अस्य निपातनमभ्युपगत्य

कीर्तितम्– अवपूर्वाच्चक्षिङः एश्प्रत्ययो निपात्यते। भावकर्मणोरर्थयोरिति।

दीर्घजिह्वी च च्छन्दसि (अ० ४-१-५९) इति सूत्रेऽस्मिन् दीर्घजिह्वी इति पदं दीर्घ्या जिह्वा यस्याः इति व्युत्पत्तौ अप्राप्तो ङीष्प्रत्ययो निपातनकल्पितः, स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् (अ० ४-१-५४) इति सूत्रे असंयोगोपोधादिति प्रतिषेधात् सूत्रस्यास्यानवकाशात्। प्रपञ्चितञ्च जयकृष्णेन सुबोधिन्यां– दीर्घजिह्वीति निपात्यते च्छन्दसीति। चन्द्रकान्तेनोपपादितं कातन्त्रछन्दःप्रक्रियायां दीर्घजिह्वी (नाम्नि चतुष्टये चतुर्थः पादः, ७) इति सूत्रे दीर्घजिह्वीति स्त्रीयामीप्रत्ययान्तं निपात्यन्ते इति।

पश्च पश्चा च छन्दसि (अ० ५-३-३३) छन्दसि विषये पश्च इति पश्चा चेति शब्दद्वये यथाक्रमम् अवरशब्दस्य पश्चादेशः, अप्रत्ययः, आप्रत्ययश्च निपातनसिद्धाः।

सूत्रे चकारग्रहणवलात् पश्चादित्यत्रापि अवरशब्दस्य पश्चभावः, आतिप्रत्ययश्च निपातितौ। भाष्यकारेण अवरशब्दं विहाय अपरशब्दञ्च गृहीत्वा अपरस्य पश्चभाव आतिश्च प्रत्ययः इति सूत्रार्थप्रत्यायकवार्तिकस्य भाष्ये भाष्यते– अपरस्य पश्चभावो निपात्यते, आतिश्च प्रत्ययः इति। काशिकाकृताऽपि अवरशब्दं हित्वा अपरशब्दस्य पश्चादेशेन, अकाराकाराभ्याञ्चैतेषां निपातनत्वं दर्शितं सर्वत्र-अपरस्य पश्चभावोऽकाराकारौ च प्रत्ययौ निपात्येते इति। तत्रभवता पश्चात् (अ० ५-३-३२) इति सूत्रस्य वृत्तौ पश्चाद् इति शब्दस्य निपातनमुररीकृत्य अवादि-पश्चात् इत्ययं शब्दो निपात्यतेऽस्तातेरर्थे इति। जयकृष्णेन सुबोधिन्यां निर्णीतम्– अवरस्य पश्चभावः अकाराकारौ च प्रत्ययौ निपात्येते इति।

चन्द्रकान्ततर्कालङ्कारेण कातन्त्रछन्दःप्रक्रियायाः पश्चपश्चापश्चाताच्चास्तत्यर्थे (नाम्नि चतुष्टये षष्ठः पादः, ८६) इत्यत्र एतेषां निपातनमङ्गीकृत्य प्रत्यपादि-दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमान्तभ्यो दिग्देशकालेष्वस्तातिर्व्विहितः। तदर्थे पश्च पश्चा पश्चातादित्येते निपात्यन्ते। प्रथमयोरपरशब्दस्य पश्चादेशः अकाराकारौ च प्रत्ययौ। चरमे पश्चिमशब्दस्यापरशब्दस्य वा पश्चादेश आताच्च प्रत्ययः इति।

## सिद्धान्तः

निष्कर्षत एते सिद्धान्ताः समुपलभ्यन्ते–

१. लौकिकेभ्यः पृथक्त्वेऽपि सर्वे वैदिकशब्दाः निपातनपदवाच्या इति भ्रमो नैव कर्तव्यः। अत्रापि केवलं सिद्धशब्दा एव निपातनपर्यायिनः। मुग्धबोधव्याकरणस्य

अन्तिमे सूत्रे बहुलं ब्रह्मणि इत्यत्र वोपदेवेनापि– सर्वे लौकिकप्रयोगा वेदे अन्यथा भवन्तीति प्रोक्तम्।

२. विभक्तिलिङ्गवचनानि हि व्यत्ययस्थलानि। अपरतो लोपागमवर्णविकारवर्ण-विपर्ययास्तावत् निपातनक्षेत्राणि।

३. वैदिकप्रक्रियामाश्रित्य पर्यालोचितानि पाणिनीयदिशा सर्वाणि निपातनानि चान्द्रकान्तम् अपाणिनीयकातन्त्रछन्दःप्रक्रियानुसारमपि तानि समानि निपातनसिद्धानीति शिवम्।

# स्थानेऽन्तरतमः इति सूत्रस्य महाभाष्यदिशा न्यासान्तरविचारः

मलय पोडे*

## १. उपोद्घातः

विद्यमानेषु व्याकरणेषु वेदाङ्गत्वेन प्रसिद्धस्य पाणिनीयव्याकरणस्य मूलग्रन्थः पाणिनिप्रणीता अष्टाध्यायी। तस्या अष्टाध्याय्याः प्रथमपादस्य पञ्चाशत्तमं सूत्रं "स्थानेऽन्तरतमः" (१।१।५०) इति। षड्विधेषु पाणिनीयसूत्रेषु सूत्रमिदं परिभाषासूत्रम्। अनियमे नियमकारिणी भवति परिभाषा। एकस्य स्थानिनः स्थाने अनेकेषामादेशानां प्राप्तिरनियमः। तदा नियमविधायकं भवति सूत्रमिदम्। एतस्य सूत्रस्य महाभाष्यदिशा न्यासान्तरविचारः अधः सम्पाद्यते।

## २. सूत्रार्थः

अस्मिन् सूत्रे पदद्वयमस्ति– स्थाने इति अन्तरतमः इति च। स्थाने इति सप्तम्यन्तं पदम्। स्थानशब्दश्चात्र प्रसङ्गपरकः। अन्तरशब्दः सदृशपरकः। अतिशयेन अन्तरः अन्तरतमः नाम सदृशतमः। अतिशयेन सदृशः इत्यर्थः। अतः सूत्रार्थः कौमुद्यां– "प्रसङ्गे सति सदृशतम आदेशः स्यात्।" इति।

दध्यत्र इतीहोदाहरणम्। दधि अत्र इति स्थिते "इको यणचि" (६।१।७७) इति सूत्रेण इकः इकारस्य स्थाने अचि अकारे परे यणः प्रसक्तिर्भवति। इदानीम् इकारस्य स्थाने यण्वर्णेषु य् व् र् ल् इत्येतेषु कस्य प्राप्तिः स्यादित्यनियमः भवति। तदा "स्थानेऽन्तरतमः" (१।१।५०) इति परिभाषया सदृशतमस्य यण एव इकारस्य स्थाने आदेशो भवति। अनया परिभाषया तालुस्थानिकस्य इकारस्य तालुस्थानिक यकार एव स्थानत अन्तरतमो भवति। एवञ्च दधि अत्र इति स्थिते अनया परिभाषया नियमितेन "इको यणचि" (६।१।७७) इति सूत्रेण इकः इकारस्य स्थाने अचि अकारे परे यणि यकारे प्रक्रियाकार्ये दध्यत्र इति रूपम्।

---

*सहायकाचार्यः, संस्कृतविभागे, राणीबाँध-सर्वकारीय-महाविद्यालयस्य

## ३. न्यासान्तरपक्षः

अस्य सूत्रस्य पदसार्थक्यवर्णनवेलायां न्यासान्तरमेकं प्रकल्पितम्। न्यासः नाम सूत्रस्य विन्यासः। अन्यः न्यासः न्यासान्तरम्। अर्थात् सूत्रस्यान्यथा विन्यासः। तथाहि अस्मात् सूत्रात्परम् "उरण् रपरः" (१।१।५१) इति सूत्रमस्ति। महर्षिः पाणिनिः संहितापाठरूपेण एव सूत्राणि रचयामास। अत्र संहितापाठो विद्यते– "स्थानेऽन्तरतम उरण् रपरः" इति। तस्मिन् संहितापाठे "स्थानेऽन्तरतमः" इति प्रथमान्तः उत "स्थानेऽन्तरतमे" इति सप्तम्यन्तः अन्तरतमशब्द इति संशयः। एवं सूत्रस्वरूपं "स्थानेऽन्तरतमः" इति "स्थानेऽन्तरतमे" इति वा संशयः।

"स्थानेऽन्तरतमे उरण् रपरः" इति स्थिते "एचोऽयवायावः" (६।१।७८) इत्यनेन एकारस्यायादेशे "स्थानेऽन्तरतम् अय् उरण् रपरः" इति जाते "लोपः शाकल्यस्य" (८।३।१९) इत्यनेन अवर्णपूर्वस्य यकारस्य लोपे च "स्थानेऽन्तरतम उरण् रपरः" इति सिध्यति।

एवमेव "स्थानेऽन्तरतमर् उरण् रपरः" इति स्थिते "भोभगोअघोअपूर्वस्य योऽशि" (८।३।१७) इति सूत्रेण अकारपूर्वस्य रोर्यादेशे "स्थानेऽन्तरतमय् उरण् रपरः" इति जाते, "लोपः शाकल्यस्य" (८।३।२२) इत्यनेन यस्य लोपे च "स्थानेऽन्तरतम उरण् रपरः" इति सिध्यति।

एवं च अत्र सूत्रस्य न्यासद्वयं भवितुमर्हति– "स्थानेऽन्तरतमः" इति "स्थानेऽन्तरतमे" इति च। अस्मिन् प्रसङ्गे कैयटेन प्रदीपे उक्तं– "पदप्रकृतिः संहिता इति संहिताया एव नित्यत्वात्ततः पदापोद्धारे क्रियमाणेऽन्तरतमशब्दः किं सप्तम्यन्तोऽपोद्ध्रियते अथ प्रथमान्त इति प्रश्नः। तत्र सप्तम्यन्तपक्षे षष्ठीति वर्तते। अन्तरतमो य आदेशस्य स्थानी तत्रैव षष्ठी, यत्रैव षष्ठी तत्रादेश इति प्रकृतिर्नियम्यते। प्रथमान्तपक्षे त्वन्तरतम आदेशो भवतीत्यादेशो नियम्यते।"

"स्थानेऽन्तरतमः" इति सूत्रन्यासपक्षे च अन्तरतम इति आदेशस्य विशेषणम्। तेन सूत्रार्थो भवति "प्रसङ्गे प्राप्यमाणानाम् आदेशानाम् अन्तरतम आदेशः स्यात्।" इति। एवम् आदेशनियामकं भवतीदं सूत्रम्।

"स्थानेऽन्तरतमे" इति सूत्रपक्षे "षष्ठी स्थानेयोगा" इति सूत्रात् षष्ठी इत्यनुवर्तते। अन्तरतमे इति स्थानविशेषणम्। स्थीयन्ते अस्मिन् आदेशा इति विग्रहे निष्पन्नः स्थानशब्दः स्थानिपरकः। एवं सूत्रार्थः– "आदेशस्यान्तरतमः यः स्थानी तत्रैव षष्ठी, यत्रैव षष्ठी तत्रादेशः स्यात्।" एवं स्थानिनियामकं सूत्रं भवति।

## ३.१. न्यासान्तरपक्षे दोषाः

"स्थानेऽन्तरतमे" इति न्यासान्तरस्य स्वीकारे केचन दोषा आपतन्ति।

क) प्रथमदोषः– यथा "इको यणचि" (६।१।७७) इति सूत्रस्य प्रकृतिनियमपक्षे "यणाम् आदेशानां ये अन्तरतमाः इकः स्थानिनः तत्र षष्ठी, यत्र च षष्ठी तत्रादेशा भवन्ति" इत्यर्थो भवति।

"इको यणचि" (६।१।७७) इति सूत्रे स्थानिरूप इक्प्रत्याहारः इ उ ऋ ऌ इत्येतेषां वर्णानाम्, आदेशो यण्प्रत्याहारश्च य् व् र् ल् इत्येतेषां वर्णानां बोधकः।

दध्यत्र मध्वत्र इत्यत्र दधि अत्र इति मधु अत्र इति च स्थिते एकमात्रिकस्य इकारस्य स्थाने आन्तरतम्याद् अर्धमात्रिकः य् इत्यादिश्यते। किन्तु ब्रह्मबन्ध्वर्थम् कुमार्यर्थम् इत्युभयत्र ब्रह्मबन्धू अर्थम् इति कुमारी अर्थम् इति च स्थिते द्विमात्रिकेन इका ऊकारेण सह आन्तरतम्याभावाद् अर्धमात्रिकस्य यणः आदेशो न भवति। तेन ब्रह्मबन्ध्वर्थं कुमार्यर्थमित्यादिकं न सिध्येत्। परन्तु रूपद्वयं तु इष्टमिति दोषः। तथाह्युक्तं महाभाष्ये–

"यदि प्रकृतितः "इको यणचि" इति यणां ये अन्तरतमा इकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीति इहैव स्याद्– दध्यत्र मध्वत्र। कुमार्यर्थम् ब्रह्मबन्ध्वर्थमित्यत्र न स्यात्।" इति।

ख) द्वितीयदोषः– एवमेव "इको गुणवृद्धी" (१।१।३) इति सूत्रे दोषः। अन्तरतमसूत्रनियमाद् अस्य सूत्रस्यार्थो भवति– "गुणवृद्ध्योः ये अन्तरतमा इकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्ति।" इति।

एवं च ए ओ इति गुणसंज्ञकस्य ऐ औ इति वृद्धिसंज्ञकस्यादेशस्य द्विमात्रिकत्वाद् आन्तरतम्याद् द्विमात्रिकस्य स्थानिन इकः स्थाने एव गुणवृद्ध्यादेशः स्यात्।

तेन नेता लविता इत्युभयत्र नी ता इति लू ता इति च स्थिते यथाक्रमम् द्विमात्रिकस्य ईकारस्य ऊकारस्य च इकः स्थाने "सार्वधातुकार्धधातुकयोः" (७।३।८४) इति सूत्रेण आन्तरतम्याद् द्विमात्रिक एकार ओकारश्च गुणो भवति। एवमेव नायकः लावक इत्यादिकं सिध्यति।

परन्तु चेता स्तोता इत्युभयत्र चिधातोः स्तुधातोश्च एकमात्रिकेण स्थानिना इका इकारेण उकारेण च सह द्विमात्रिकस्य आदेशस्य एकारस्य ओकारस्य च गुणस्य आन्तरतम्याभावाद् गुणो न भवति। एवमेव चायकः स्तावक इत्यादिकं न सिध्यति इति दोषः। तथाह्युक्तं महाभाष्ये–

“तथा “इको गुणवृद्धी” गुणवृद्ध्योर्ये अन्तरतमा इकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीति इहैव स्याद्– नेता लविता नायकः लावकः। चेता स्तोता चायकः स्तावक इत्यत्र न स्यात्।” इति।

ग) तृतीयदोषः– एवमेव ॠवर्णस्य गुणवृद्धिप्रसङ्गे दोष आगच्छति। तथाहि कर्ता इत्यत्र कृ तृ इति स्थिते “सार्वधातुकार्धधातुकयोः” (७।३।८४) इत्यनेन एकमात्रिकेन ॠकारेण स्थानिना सह आन्तरतम्याद् एकमात्रिकः अकारः गुणादेशः सिध्यति। ततः रपरत्वे कर्ता इति निष्पद्यते। एवमेव हर्ता इत्यत्रापि।

एवमेव आस्तारक इत्यत्र आ स्तॄ ण्वुल् इति स्थिते द्विमात्रिकेन ॠकारेण स्थानिना सह आन्तरतम्याद् द्विमात्रिकः आकारः वृद्धिः सिध्यति। ततः रपरत्वे आस्तारकः इति निष्पद्यते। एवं निपारक इत्यत्रापि।

परन्तु आस्तरिता निपरिता इत्यत्र आ स्तॄ इ तृ इति नि पॄ इ तृ इति च द्विमात्रिकेन ॠकारेण स्थानिना सह एकमात्रिकस्य गुणस्य अकारस्य आन्तरतम्याभावाद् गुणो न सिध्यति। एवमेव कारकः हारक इत्यत्र स्थानिना एकमात्रिकेन ॠकारेण सह द्विमात्रिकस्य आकारस्य आन्तरतम्याभावाद् वृद्धिर्न भवति इति दोषः। तथाह्युक्तं महाभाष्ये– “तथा ॠवर्णस्य गुणवृद्धिप्रसङ्गे– गुणवृद्ध्योर्यदन्तरतममृवर्णं तत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीति इहैव स्यात्– कर्ता हर्ता आस्तारकः निपारकः इति। आस्तरिता निपरिता कारकः हारकः इत्यत्र न स्यात्।” इति।

एवम् अन्तरतमशब्दस्य सप्तम्यन्तपाठे लक्ष्यस्यासिद्ध्या “स्थानेऽन्तरतमे” इति न्यासान्तरं दुष्टम्।

## ४. सूत्रपक्षः

प्रथमान्तपक्ष एव समीचीनः। अस्मिन् पक्षे “स्थानेऽन्तरतमः” इति सूत्रस्वरूपम्। अत्रान्तरतम इति आदेशस्य विशेषणम्। तेन सूत्रार्थो भवति स्थाने अर्थात् प्रसङ्गे प्राप्यमाणानाम् आदेशानाम् अन्तरतम आदेशो भवतीति। अनेन आदेशनियमनं भवति।

## ४.१. न्यासान्तरपक्षस्थानां दोषाणां सूत्रपक्षे निरासः

एवं नास्ति उपर्युक्तदोषाणां प्रसक्तिः। तेषां निवारणमधः प्रदर्श्यते–

तथाहि “इको यणचि” (६।१।७७) इति सूत्रे आदेशनियमात् “अचि परे इकः

स्थाने अन्तरतमः यण् आदेशो भवति" इति सूत्रार्थौ भवति। एवं स्थानिदृष्ट्या यः अन्तरतम आदेशः, तस्य प्रसक्तिर्भविष्यति। एवं दध्यत्र मध्वत्र इव ब्रह्मबन्ध्वर्थं कुमार्यर्थमित्यादीनां सिद्धिर्भविष्यति।

क) प्रथमदोषसमाधानम्– तथाहि ब्रह्मबन्धू अर्थम् इति कुमारी अर्थम् इति च स्थिते स्थानिन ऊकारस्य दृष्ट्या अन्तरतम आदेशः वकारः ईकारस्य च दृष्ट्या अन्तरतम आदेशः यकारः। ऊकारस्योच्चारणस्थानम् ओष्ठौ। यण्सु वकारस्य दन्तोष्ठम्। एवं वकार एवान्तरतम ऊकारस्य। तथा ईकारस्योच्चारणस्थानं तालु। यण्सु यकारस्योच्चारणस्थानं तालु। एवं यकार एवान्तरतम ईकारस्य।

ख) द्वितीयदोषसमाधानम्– एवमेव "इको गुणवृद्धी" (१।१।३) इत्यनेन नेता लविता नायकः लावक इव चेता स्तोता चायकः स्तावक इत्यत्रापि गुणवृद्धी भवत आदेशस्यान्तरतम्यनियमात्।

ग) तृतीयदोषसमाधानम्– ऋवर्णस्य स्थाने गुणवृद्धिप्रसङ्गः कर्ता हर्ता आस्तारकः निपारक इत्यत्र इव आस्तरिता निपरिता कारकः हारक इत्यत्रापि स्यात्।

एवं न्यासान्तरपक्षे प्राप्तानां दोषाणां निवारणम् अन्तरतमशब्दस्य प्रथमान्तपक्षे सिद्धम्।

## ४.२. सूत्रपक्षे सम्प्राप्तानां दोषाणां निरासः

परन्तु प्रथमान्तपक्षे केचन दोषाः समुद्भवन्ति। ते तावत्–

क) प्रथमदोषः– प्रस्तुतेन सूत्रेणादेशस्य आन्तरतम्यनियमाद् "वान्तो यि प्रत्यये" (६।१।७९) इत्यत्र स्थानिनो निर्देशः कर्तव्यः। अन्यथा "एचोऽयवायावः" (६।१।७८) इत्यस्मात् सूत्राद् एचः इत्यस्यानुवर्तनाद् ए ओ ऐ औ इति वर्णचतुष्टयस्य स्थाने अव् आव् इति वान्तादेशप्रसक्तिः स्यात्। अत ओकारौकारयोः वान्तादेशः भवतीति बोधनाय "ओदौतोः वक्तव्यम्" इत्येवं वचनं कार्यम्।

परन्तु सप्तम्यन्तपक्षस्वीकारे प्रकृतिनियमाद् वान्तादेशस्य अन्तरतमः स्थानी गृह्यते। वान्तादेशस्य अन्तरतमः स्थानी तु ओकार औकारश्च स्वतः सिद्धः। अतो नास्ति दोषः। किन्तु प्रथमान्तपक्षो गौरवदोषयुक्तः।

ख) द्वितीयदोषः– "ऊदुपधाया गोहः" (६।४।८९) इति सूत्रेण गोह उपधाया ओकारस्य ऊत्त्वं विधीयते। प्रथमान्तपक्षे गोह् इत्यस्य हकारस्य स्थाने ऊत्त्वनिवृत्तये उपधाग्रहणं करणीयम्।

परन्तु सप्तम्यन्तपक्षे स्थानिनियमात् ऊत्त्वस्यान्तरतमः स्थानी ओकार एव

भवतीति उपधाग्रहणं न कर्तव्यमिति प्रथमान्तपक्षे गौरवम्।

ग) तृतीयदोषः– "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" (८।२।४२) इति सूत्रेण निष्ठातस्य नकारो विधीयते। तथाहि भिन्न इत्यादौ नत्वविधानाय निष्ठातस्योल्लेखः करणीयः। अन्यथा चरितमित्यादौ रेफात्परस्येटः निष्ठाङ्गत्वाद् इकारस्य स्थाने नत्वमापद्येत।

परन्तु सप्तम्यन्तपक्षे आदेशस्य नकारस्य अन्तरतमः स्थानी निष्ठातकारः। अतस्तस्य ग्रहणाभावे निष्ठातस्य स्थाने एव नत्वं सिध्यतीति प्रथमान्तपक्षे गौरवम्।

एतेषां दोषाणां समाधानं तावत् महाभाष्ये भाष्यकारेण विहितम्–

क) प्रथमदोषसमाधानम्– तथाहि "वान्तो यि प्रत्यये" (६।१।७९) इत्यस्य सूत्रस्य स्थाने "यि प्रत्यये" इति सूत्रं विधीयते। "एचोऽयवायावः" (६।१।७८) इत्यस्मात् सूत्राद् एचः अयवायावः इति पदद्वयमनुवर्तते। एवमस्य सूत्रस्यार्थो भवति– "यकारादौ प्रत्यये परे एचः स्थाने अयवायावः स्युः।" इति। एवम् ओकारस्य स्थाने अव् औकारस्य च स्थाने आव् भवतीति नास्ति दोषः।

एवं सूत्रस्वीकारे चेयं जेयमित्यादौ यादौ प्रत्यये परे एकारस्य प्राप्त यः अयादेशः स हि "क्षय्यजय्यौ शक्यार्थे" (६।१।८१) इति सूत्रे "क्षिज्योरेवैचः शक्यार्थे एवायादेशः" इति नियमान्न निषिध्यते।

रायमिच्छतीत्यर्थे रैयतीति प्रयोगे ऐकारस्य आयादेशप्राप्तिरूपदोषः वैदिकत्वात् लौकिकनियमस्य वेदे प्रभावाभावात् निराकृतः। एवं प्रथमदोषः समाहितः।

ख) द्वितीयदोषसमाधानम्– "ऊदुपधाया गोहः" (६।४।८९) इति उपधाग्रहणस्य सत्त्वान्नास्ति द्वितीयदोषः।

ग) तृतीयदोषसमाधानम्– एवमेव "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" (८।२।४२) इति सूत्रे तकारस्तु पठित एवेति नास्ति तृतीयदोषः।

एवं प्रथमान्तपक्षे दोषत्रयस्य समाधानात् प्रथमान्तपक्ष एव साधुः। अतः "स्थानेऽन्तरतमः" (१।१।५०) इत्येव सूत्रस्वरूपमिति शम्।

## ४. समीक्षणम्

एवं "स्थानेऽन्तरतमः" इति सूत्रस्य महाभाष्यदिशा अस्मिन् प्रबन्धे न्यासान्तरं प्रस्तुतम्। तत्र एतत्सूत्रव्याख्यानकाले पतञ्जलिना "स्थानेऽन्तरतमे" इति न्यासान्तरं प्रस्तुतम्। वस्तुतस्तु इदं न्यासान्तरं "स्थानेऽन्तरतमः" (१।१।५०) इत्यत्र अन्तरतमः इति पदसार्थक्याय एव प्रस्तुतम्। अत आदौ अष्टाध्याय्यां सूत्राणां

संहितापाठे "स्थानेऽन्तरतमः उरण् रपरः" इति "स्थानेऽन्तरतमे उरण् रपरः" इति वा पदच्छेदः स्यादित्यत्र शङ्का प्रस्तुता। एवं अन्तरतमशब्दस्य प्रथमान्तपाठः सप्तम्यन्तपाठो वेति संशयः।

प्रथमान्तपाठपक्षे सूत्रमिदम् आदेशनियामकं सप्तम्यन्तपाठपक्षे च प्रकृतिनियामकम्। तत्र सप्तम्यन्तपक्षे "इको यणचि" (६।१।७७) इत्यस्य दध्यत्र मध्वत्र इव ब्रह्मबन्ध्वर्थमम् कुमार्यर्थमित्यत्र नास्ति प्राप्तिः, "इको गुणवृद्धी" (१।१।३) इति गुणस्य चेता स्तोता इत्यत्र वृद्धेश्च चायकः स्तावकः इत्यत्र प्राप्तिर्नास्ति, ऋवर्णस्य गुणस्य आस्तरिता निपरिता इत्यत्र वृद्धेश्च कारकः हारकः इत्यत्र नास्ति प्राप्तिः इत्येते दोषाः समुल्लिखिताः।

ततो दोषाणां सद्भावात् सप्तम्यन्तपक्षनिराकरणात् न्यासान्तरं निराकृतम्। तेन च प्रथमान्तपक्षस्य साधुत्वम्। एवं दुष्टं "स्थानेऽन्तरतमे" इति न्यासान्तरं परिकल्प्य तत्प्रत्याख्यानबलेन अन्तरतमः इति पदसार्थक्यवर्णनमेव भाष्यकारस्य लक्ष्यम्। अतः "स्थानेऽन्तरतमे" इति न्यासान्तरं स्वप्रत्याख्यानद्वारा अन्तरतमः इति पदस्य सार्थक्यप्रतिपादकमिति सिद्धम्।

महाभाष्ये न्यासान्तरपर्यालोचनवेलायां न्यासान्तरस्वीकारे केचन दोषा भवन्तीति ज्ञायते। ते च दोषास्तावत् - सूत्रभेदोषः, गौरवदोषः, इतरेतराश्रयदोषः, अव्याप्तिः, अतिव्याप्तिः इत्यादयः। "स्थानेऽन्तरतमः" (१।१।५०) इति सूत्रस्य स्थाने "स्थानेऽन्तरतमे" इति न्यासान्तरस्य स्वीकारे "इको यणचि" (६।१।७७) इति सूत्रेण ब्रह्मबन्ध्वर्थम् कुमार्यर्थम् इत्यत्र यण्, "इको गुणवृद्धी" (१।१।३) इति सूत्रेण चायकः स्तावक इत्यादिषु आदेशः, ऋवर्णस्य निपरिता कारकः इत्यादिषु गुणश्च न भवतीति अव्याप्तिदोषः भवति। एवं सूत्रस्यास्य महाभाष्यदिशा न्यासान्तरविचारः प्रस्तुत इति शिवम्।

# मेदिनीपुरमण्डले संक्षिप्तस्यसारस्य अनुशीलनम्

## देवाञ्जन-दासः*

संस्कृतशिक्षा भारतवर्षस्य गौरवविधायका। संस्कृतभाषा श्रेष्ठतमा भाषा तथा देवभाषा इति प्रसिद्धा। काव्य-साहित्यैः भाषायाः सौन्दर्यं स्फुटति। किं तु व्याकरणेन भाषा सुस्थतां प्राप्नोति। उच्यते पाणिनीय-शिक्षायां– 'मुखं व्याकरणं स्मृतमि'ति। यद्यपि संस्कृतव्याकरणस्य चर्चायां पाणिनिव्याकरणं एव प्रधानम्। किन्तु वङ्गेषु पाणिनि-व्याकरणमृते बहुविधस्य व्याकरणस्य अनुशीलनमस्ति। पूर्ववङ्गेषु कलापस्य, मेदिनीपुरमण्डले संक्षिप्तसारस्य, भाटपाडायां सुपद्मव्याकरणस्य, आसामादिषु पूर्वभारतेषु प्रयोगरत्नमालायाः, कलिकातायां तत्पार्श्ववर्तिस्थानेषु मुग्धबोधव्याकरणस्य चर्चा उपलभ्यते।

संक्षिप्तसार-व्याकरणसम्प्रदायस्य प्रधानरूपेण आचार्यत्रयमस्ति– क्रमदीश्वरः, जुमरनन्दी, गोयीचन्द्रश्चेति। एते संक्षिप्तसार-व्याकरणसम्प्रदायस्य त्रिमुनीति कथ्यते। क्रमदीश्वरो व्याकरणस्यास्य सूत्रकारः, जुमरनन्दी सूत्राणां परिशोधनरूपायाः 'रसवती'वृत्तेः प्रणेता, गोयीचन्द्रश्च समग्रव्याकरणस्य टीकाकारः। एतेषाम् आविर्भावकालस्य जन्मवृत्तान्तस्य च विवरणं नोपलभ्यते। किंवदन्त्यनुसारेण क्रमदीश्वरः जुमरनन्दी चेति समकालिकौ। क्रमदीश्वरस्य परिचयप्रदानार्थं गुरुपद-हालदारमहोदयेन 'व्याकरण दर्शनेर इतिहास' इति ग्रन्थे वङ्गीय इति पदेन अभिहितम्–

क्रमदीश्वरविप्रेण वङ्गीयेन ततः परम्।
संक्षिप्तसारनाम्ना तु महद् व्याकरणं कृतम्॥

'ततः परम्' इति पदेन ख्रिष्टीये एकादशशतके भोजदेवेन 'सरस्वती-कण्ठाभरणम्' इति व्याकरणग्रन्थस्य विरचनात् परं क्रमदीश्वरमहाभागानाम् आविर्भावकाल इति सूच्यते। गुरुपद-हालदारमहोदयानां वर्णनानुसारेण हैमव्याकरणं संक्षिप्तसारस्य परवर्ति। भारतवर्षस्य पूर्वप्रान्ते पश्चिमप्रान्ते च द्वौ व्याकरणसम्प्रदायौ समकालम् एव प्रतिष्ठां लभेते। कालोऽयं ख्रिष्टीयो द्वादशशतकम्

---

*सहायकाचार्यः, संस्कृतविभागे, झाडग्राम-राजकीय-महाविद्यालयस्य

इति मन्यते। संक्षिप्तसारग्रन्थस्य अन्तिमभागे क्रमदीश्वरमहाभागानाम् आत्म-परिचयज्ञापकः श्लोकोऽस्ति–

विद्यातपोऽर्थिवादीन्द्रः पूर्वग्रामिद्विजः कविः।
चक्रपाणिसुतो ज्यायान् नप्तासौ श्रीपतेः कृती॥[१]

अत्र क्रमदीश्वरस्य पितुर्नाम चक्रपाणिः, पितामहस्य नाम श्रीपतिः, स एव पूर्वग्रामवास्तव्यः, द्विजः कविश्चेति ज्ञायते। वादीन्द्रः तस्य गुणकथनरूपोपाधिविशेषः। 'वादीन्द्रचक्रचूडामणी'त्यनेन स सर्वत्र भूषितः। स कविः, कृती, वादीन्द्रः, तार्किकश्रेष्ठ इति। क्रमदीश्वरमहाभागः छात्रावस्थायां ईर्ष्यापरैः सतीर्थैः निहतोऽभवदिति वृत्तान्तं न विश्वासपदमिति पण्डिताः। हरप्रसादशास्त्रिमतेन क्रमदीश्वरः शैवगणात् वादीन्द्र इति उपाधिम् अलभत। तस्य मतेन खिष्टीये दशमे शतके मध्यभारते अभ्युदिताय शैव-पाशुपतसम्प्रदायाय संक्षिप्तसारव्याकरणं विरचितम्। शैवसम्प्रदायः प्राकृतजनानां मौखिकभाषायां धर्मप्रचारं करोति। अतः क्रमदीश्वरमहाभागेन तस्य व्याकरणग्रन्थस्य अन्तिमभागे प्राकृतव्याकरणमपि संयोजितम्। शास्त्रिमहोदयानां मतेन क्रमदीश्वरमहाभागस्य आविर्भावकालः खिष्टीयो दशम-शताब्दीति।

'पूर्वग्रामी'ति विशेषणस्य प्रयोगबलात् स पूर्वग्रामवासीति मन्यते। वङ्गदेशस्य प्राचीननाम एव पूर्वग्राम इति। 'Indian Culture' (Vol. V, No. 4, April 1939, pp. 357– 361) इति पत्रे नलिनीनाथदाशगुप्तमहोदयः '*Kramadīś-vara* and his school of grammar' इति प्रबन्धे पूर्वग्रामविषये उक्तवान्– 'Purvagrama was a village in Daksina Radha (South Radha)'. काकतीयराजमहिष्याः रुद्रदेव्याः समयकाले मलकापुरमिति शिलास्तम्भे उत्कीर्णलिप्यां 'पूर्वग्रामः' दक्षिणराढस्य ग्रामविशेषोऽयमिति उपलभ्यते। दीनेशचन्द्र-भट्टाचार्यमतेन 'पूर्वग्रामी'ति शब्दो न जन्मस्थानवाचकः, किं तु 'वन्द्यघटीयः', 'काञ्जिविल्वीय' इत्यादिवज्जन्मकुलवाचकः।

'संक्षिप्तसारो' न कस्यचन बृहत्तरस्य ग्रन्थस्य सारसङ्ग्रहः। सपरिशिष्टादेः अस्य सूत्रसंख्या ४६९९ इति। अनेन सह प्राकृतपादस्य ४८४ इति सूत्रयोगेन समग्रव्याकरणस्य सूत्रसंख्या ५१७३ इति। अतः परं छन्दःप्रकरणं, सार्धपञ्चाशत् श्लोकेन विधृतम् अलङ्कारप्रकरणनम्। सर्वाणि सूत्राणि अष्टसु पादेषु सुविन्यस्तेति।

---

[१](सं. सा., प्राकृतो भागः, पृ. ५२)

एकैकशः पादेषु एकैकशो विषयो विधृतः– १.सन्धिः, २.तिङन्तः, ३.कृदन्तः, ४.तद्धितः, ५.कारकं, ६.सुबन्तं, ७.समासः, ८.प्राकृतपादश्चेति। उणादयः अव्ययानि च कृदन्तपादस्य अन्तिमभागे तद्धितपरिशिष्टश्च तद्धितपादस्य अन्तिमभागे एव संयुक्तः। सन्धिपादात् परं शब्दरूपात्मकः सुबन्तपादाध्यायः न संनिविष्टः; तत्स्थले धातुरूपात्मकस्य कृदन्तपादस्य समावेशः लक्ष्यते– अत्र हि व्याकरणान्तरेण सह भिन्नता। विषयविन्यासस्य कारणरूपेण गोयीचन्द्रमहाभागेन टीकायामुल्लिखितं– 'नमस्काराद्यन्तरं सर्वभाषाप्रधानत्वात् प्रथमं सप्तभिः पादैः संस्कृतभाषालक्षणानि प्रक्रममाणः, सकलविषयव्यापकत्वात् सन्धिकार्याणां तद्विधानाय प्रथमं सन्धिपादम् आरब्धवान्। तदनन्तरं धातुमूलकत्वात् सकलपादानां तदधिकारविहितानां तिङादीनां कृतां च विधानाय द्वितीय-तृतीयौ तिङ्कृत्पादौ।...धातोः कृन्निष्पन्नमेव नामेति मतमाश्रित्य नामाधिकारविहितानां तद्धितानां विधानाय चतुर्थं तद्धितपादम्। तस्मादेव नाम्नो विहितकर्त्रादिसंज्ञात् उक्तत्वादनुक्तत्वाच्च स्वादीनां विधानाय पञ्चमं कारकपदम्। नाम्नः सुपि विहिते विशेषविधानाय षष्ठं सुबन्तपादम्। सुबन्तानां च समासाश्रयकार्यादिविधानाय सप्तमं समासपादमिति। संस्कृतभाषालक्षणानि समाप्याष्टमेन पादेन प्राकृतादिभाषालक्षणानि विरचितवान्' (सं. सा., पृ. २– ३)। वस्तुतः पदसाधनस्य सौविध्याय विभागोऽयं प्रस्तुतः।

अस्य व्याकरणग्रन्थस्य उद्देश्यं नामकरणस्य तात्पर्यं– कस्यापि बृहत्तरव्याकरणग्रन्थस्य न संक्षेपस्वरूपः संक्षिप्तसारः; परं तु व्याकरणसाहित्यस्य सारोपादानसङ्ग्रहात्मकोऽयं ग्रन्थः। गोयीचन्द्रमतेन– 'शास्त्रान्तरेषु सत्स्वपि शास्त्रकरणफलमाह संक्षिप्तसारमिति संक्षिप्तं च तत्सारम् अन्यत्र प्रकीर्णसारं च विद्यते तदध्ययने मन्दधियां केवलम् आत्मवञ्चनम् एव फलं न तु रहस्यपरिज्ञानम्' (सं. सा., पृ. २)। एषां महाभागानां मतेन क्रमदीश्वरेण सूत्राणां वर्णगतं लाघवं परिहृत्य वृत्तिगतं लाघवम् अनुसृतम्। फलतः अत्र सूत्राणां प्राचुर्यं, वृत्तिभागस्य संक्षिप्तता च परिलक्ष्यते– 'अत एवाचार्येण वर्णकृतलाघवम् अनङ्गीकृत्य व्याख्याकृतलाघवम् एवाङ्गीकृतम्' (सं. सा., पृ. २)। पाणिनिव्याकरणेन प्रभावितोऽपि भर्तृहरिमहाभागानां वाक्यपदीयस्य, महाभाष्यटीकायाः, भट्टिकाव्यस्य च बहुशः प्रभावः संक्षिप्तसारे परिलक्ष्यते। अत्र सुस्पष्टरूपेण किंचिन्नामसमूहस्य उल्लेखो दृश्यते– कातन्त्रः (सं. सा. १।१०६, १९६, २।६२६), चान्द्रः (सं. सा. १।३४२, ७।२१२), भागवृत्तिः (सं. सा. ५।१०१, ७।४३६), वामनः (७।१६५), क्षपणकः (७।४०७), अनुपदकारः (१।२१५), भारविः (२।१६३)

इति। जुमरनन्दिना वृत्तिभागे संस्कृत-साहित्येभ्यः व्याकरणस्य सिद्धासिद्धप्रयोग उदाहरणरूपेण उल्लिखितः। व्याकरणेऽस्मिन् धात्वंशः अधिकतरः समृद्धः। अस्मिन् विषये बहुविधा ग्रन्था विरचिता– जुमरनन्दिकृता जौमरधातुमाला, महेशकृता धातुमाला, कुल्लुकभट्टकृतः रूपप्रकाश इत्यादयः प्रधानम्।

संक्षिप्तसारस्य मङ्गलाचरणे ग्रन्थकारेण उक्तं–

शिवं प्रणम्य सर्वेशं सर्वभाषासु लक्षणम्।
संक्षिप्तसारमाचष्टे पण्डितः क्रमदीश्वरः॥ इति।

अस्य टीकायां गोयीचन्द्रेन कथितं– 'सर्वभाषासु संस्कृत-प्राकृत-पैशाच्यादिषु संक्षिप्तसारं लक्षणं क्रमदीश्वरनामा पण्डित आचष्टे ब्रवीतीति श्लोकार्थः।... भाषाग्रहणेन छान्दसलक्षण-परित्यागश्च सूचितः' (सं. सा., पृ. १-२)।

पाणिनीयव्याकरणे उल्लिखितः प्रकृतिभावः संक्षिप्तसारे सन्धिनिषेधरूपेण उल्लिखितः। 'लुग्यादेर्न सन्धिः' (सं. सां १।३५९), 'लुग्वस्य' (सं. सां १।३६०), 'लुग्विसर्गस्य' (सं. सां १।३६१) इति सूत्रत्रयस्य टीकायामुक्तं 'लुप्तस्यालुप्तवत्त्वादेव सन्धिनिषेधे सिद्धे...' (स. सा., पृ. १४०)। प्रधानतो भावशब्दः क्रियाशब्दश्च समानार्थबोधक इति मन्यते। किं तु महाभाष्यस्य प्रदीपटीकायामुक्तं– क्रिया एव परिस्पन्दनसाध्या, भावश्च अपरिस्पन्दनसाध्यः। 'क्रियामुख्य-प्रयोजकौ' (सं. सां ५।१) इति सूत्रस्य व्याख्याकाले तत्त्वमिदं गोयीचन्द्रेनापि विवरणीटीकायामुल्लिखितं– 'धात्वर्थौ द्विविधो भवति– कोऽपि परिस्पन्दनसाध्यो यथा गमनादिः, कोऽपि अपरिस्पन्दनसाध्यो यथा अवस्थानादिः'। परवर्तिनि काले क्रियाशब्दस्यार्थौ यौगिकः रूढि वेति व्याख्या अभिरामेण कृता। 'क्रियामुख्य-प्रयोजकौ' (सं. सां ५।१) इति सूत्रस्थस्य द्वन्द्वसमासस्य संभाव्यता-असंभाव्यताविषये आलोचना दृश्यते। संक्षिप्तसारस्य विवरणीटीकायां व्याख्यातं कारकपादमधिकृत्य गुरुत्वपूर्णं टीकात्रयं विरचितं न्यायपञ्चाननाचार्येण, वंशीवदनाचार्येण, अभिराम-विद्यालंकार-भट्टाचार्येण च। क एव कर्तेति प्रश्नस्य मीमांसार्थं वंशीवदनाचार्येण बहुविधानि मतानि पर्यालोच्य खण्डयित्वा च उपादानविषये अपरोक्षज्ञानं, चिकीर्षा, कृतिविशिष्टत्वं च कर्तृत्वम् इति।

रचनाशैल्या व्याकरणमिदं अतीव सरलं प्राञ्जलं च। पाणिनिव्याकरणभुक्तः प्रत्याहारो वैदिकांशः संक्षिप्तसारे न अन्तर्भुक्तः। वैदिकांशं व्यतिरेकेण पाणिनि-कात्यायन-पतञ्जलिकृतानां साधितपदानाम् उपदेशार्थं संक्षेपकरणं न सम्भवति।

तिङन्तपादस्य २।६८७ इति सूत्रव्याख्याकाले गोयीचन्द्रेण कथितम्– 'एतेनैतत् प्रतिपादितं छान्दसव्यतिरिक्तानां पदानां त्रिमुनिप्रसाधितानाम् अत्र शास्त्रे साधनं न्यूनत्वम् इति सर्वथा न संभावनीयम्' ( सं. सा., पृ. ३६३)। संज्ञानिर्धारणे किमपि नूतनत्वं नात्र परिदृश्यते। उच्यते च– "पूर्वाचार्यपरम्पराधिगताभिः प्रसिद्धाभिः संज्ञाभिरेव प्रायेणास्य ग्रन्थकृतो व्यवहारः" ( सं. सा. ७।१, गो. टी.)। अतः वक्तव्यस्य सरलत्वम् अव्याहतम्।

संक्षिप्तसारस्य प्रत्येकं पादस्य अन्तिमभागे वर्तमानायां पुष्पिकायाम् उक्तम्– 'इति श्रीक्रमदीश्वरकृते संक्षिप्तसारे रसवत्यां वृत्तौ महाराजाधिराजश्रीमज्जुमरनन्दि-परिशोधितवृत्तौ...'। जुमरनन्दिनः उपाधिः राजाधिराजः आसीत्। बृहद्वङ्गग्रन्थे दीनेशचन्द्रसेनमहोदयेन उक्तं जुमरनन्दी मुर्शिदावादवासी। गोयीचन्द्रमतेन जुमरनन्दी 'उक्तानुक्तदुरुक्तविचारचारुचतुरः– 'तेषां च लक्षणानां व्यासशीलादि-परिशीलन-विमलमतिरधिकृतोमापतिदत्तप्रभृतिसभाजनपर-उक्तानुक्तदुरुक्तविचार-चारुचतुरो जुमरनन्दि-परिशोधितलक्षणं वृत्तिं कृतवान्' (सं. सां., पृ. ३)। व्याकरणस्यास्य सूत्रबाहुल्यं रचनाशैल्यां च युक्तिहीनत्वं दृश्यते। अतो मुग्धबोधव्याकरणस्य अनुरागिणो जुमरनन्दिनः विषये तन्तुवायः इति परिहासेन कथयन्ति। किन्तु जुमरनन्दी संक्षिप्तसारव्याकरणस्य कश्चन प्रामाणिकः आचार्यः; तस्य नामानुसारेणैव संक्षिप्तसारव्याकरणसम्प्रदायस्य नाम जौमर-व्याकरणं जौमर-सम्प्रदाय चेति उपलभ्यते। जौमर-धातुमाला इति अस्य व्याकरणसम्प्रदायस्य कश्चित् प्रसिद्धो ग्रन्थः। अस्य व्याकरणसम्प्रदायस्य तृतीयः प्रामाणिकः आचार्यो गोयीचन्द्रः। स एव वोपदेवस्य पूर्ववर्ती आसीत्। तद्धितपरिशिष्टस्य सूचनायां गोयीचन्द्रेण उक्तं– 'श्रीमज्जुमरनन्दिपरिशोधितवृत्तिभागात् परिशिष्टमस्ति यत्किञ्चित् तत् संपूर्णं कुरुते गोयीचन्द्रः प्रकीर्णया वृत्त्या' (सं. सा., पृ. ९३९)। वङ्गेषु सर्वत्रैव अस्य व्याकरणस्य प्रचलनम् आसीत्। गौडदेशे अस्य सर्वाधिकं प्रचलनम् आसीत्। पश्चिमवङ्गेषु मेदिनीपुरमण्डले तत्समीपवर्तिनि उत्कलदेशे च संक्षिप्तसारस्य चर्चा दृश्यते।

गोयीचन्द्रस्य परवर्तिनि काले संक्षिप्तसारव्याकरणम् अधिकृत्य मौलिकरचना विलुप्ता अभवत्। अस्मिन् काले गोयीचन्द्रविरचितां टीकाम् अधिकृत्य बहुविधाः टीकाग्रन्था उपलब्धा भवन्ति। ते सर्वे पश्चिमवङ्गीया आसन्। षोडशे शतके न्यायपञ्चाचनेन विरचिता व्याकरणदीपिका व्याकारदीपिका वा , सप्तदशे शतके व्याकरणदीपिकामधिकृत्य वंशीवदन-कविचन्द्रेण व्याकारदीपिकाटीका

व्याकरणादर्शः, गोपालचक्रवर्तिना संक्षिप्तसारटीका गोपालः, चन्द्रशेखर-विद्यालंकारेण हरिरामवाचस्पत्याचार्येण च अर्थबोधिनीति ग्रन्थः प्रसिद्धाः। गोयीचन्द्रस्य व्याख्याया भ्रान्तिसंशोधनार्थं केशवदेव-तर्कपञ्चाननेन दुर्घटोद्घाट इति टीका, अभिरामविद्यालंकारभट्टाचार्येण कौमुदीटिप्पनी विरचिता। संक्षिप्तसारम् अवलम्ब्य संक्षिप्तं व्याकरणत्रयम् अस्ति–

१. नारायण-वन्द्योपाध्यायेन विरचिता सारावली

२. गौरमोहन-भट्टाचार्येण रत्नावली

३. आनन्दिकृतः शीघ्रबोध इति।

इदानीन्तनकालेऽपि संक्षिप्तसारस्य चर्चा उपलभ्यते। १९०१ ख्रिष्टाब्दे जीवानन्द-विद्यासागरेण सजुमरवृत्तिः सविवरणी संक्षिप्तसारम् इति सम्पादितम्। अभिरामविद्यालङ्कारभट्टाचार्येण विरचिता सन्धिटिप्पनी आशुतोष-भट्टाचार्येण, कारकटिप्पनी समासटिप्पनी चेति शिरोरत्नमहाशयेन सम्पादितम्। १९१४ ख्रिष्टाब्दे कारकटिप्पन्याः परिशोधितं संस्करणं करुणासिन्धुदासमहाभागेन सम्पादितं Semantico-syntactic Relations– A Philosophical Approach इति नाम्ना। अनेन प्रकारेण पश्चिमवङ्गे ग्रन्थसंपादनाकार्ये गवेषणास्तरे च संक्षिप्तसारस्य चर्चा एतावदपि प्रसिध्यति।

# चक्रपाणिविजये विशिष्टशब्दानां व्याकरणविचारविमर्शः

जयकृष्णः*

प्रयोगशरणं हि व्याकरणम्। तत्परिपक्वतायै वेदकाव्यादिषु तद्व्युत्पत्ति-प्रायोगिकस्य भवति काचिन्महती आवश्यकता। विशिष्य महाकाव्येषु यद्येकैकमपि वाक्यं व्याकरणेन व्युत्पादितं भवति कस्यापि वैयाकरणस्य तर्हि व्याकरणोदधौ न स्यादगम्यं किमपि अध्येतुरिति वृद्धानां न न दृढा मतिः। एतेन महाकाव्यास्वादलाभः अपि निश्चप्रचम्। कवीनाम् ऊहापोहे, विशिष्टविचारे, प्रौढप्रयोगे अद्भुते चिन्तने च अधीयानः जातु विद्वान् अपि क्लिष्टतामनुभवेत्। प्राचीनेषु महाकाव्येषु तादृशीनां क्लिष्टतानां निवारणोपायाः मल्लीनाथादिभिः बहुभिः वृद्धैः पूर्वं सुष्ठ्वकारि। तादृगेव कश्चन प्रयासः अस्माभिरिह लेखे अर्वाचीने एकस्मिन् महाकाव्ये सुधियां तोषाय क्रियमाणः अस्ति।

'चक्रपाणिविजयम्' इति हि किञ्चन महाकाव्यम्। भट्टलक्ष्मीधरेणादो व्यरचि। एतत् सर्गाणां विंशत्योपनिबद्धं वर्तते। महाकाव्यमिदं सुप्रसिद्धं वृत्तान्तं श्रीकृष्णेन बाणासुरस्य पराजयात्मकं विषयीकरोति। कविना महाकाव्येऽस्मिन् विशिष्टाः प्रयोगाः कृताः सन्ति। तेषु प्रयोगेषु केषाञ्चित् व्याकरणदृष्ट्या चिन्तनं प्रस्तुमः।

## चक्रपाणिरित्यस्मिन् शब्दे समासविचारः

पुनातु पादान्तपतद्धरित्री सीमन्तरत्नप्रतिबिम्बितो वः।
तन्मस्तकारूढसुरारिभारनिरस्तिहेतोरिव चक्रपाणिः॥ १।१॥

चक्रपाणिः वः पुनातु इत्येवं क्रमेण मङ्गलात्मकः अन्वयः। नन्विह चक्रं पाणौ यस्य सः चक्रपाणिः इति बहुव्रीहिः समासो भवति। अयं समासः अन्यपदार्थप्रधानो भवति। उदाहरणेऽस्मिन् 'अनेकमन्यपदार्थे' (२-२-२४) इत्यमुना सूत्रेण समासः क्रियते। यस्य चार्थः– अनेकं प्रथमान्तम् अन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। एवं विचारिते सति 'चक्रं पाणौ यस्य सः चक्रपाणिः' इत्यत्र उभयोः पदयोः विभक्तिभेदः दृश्यते खलु! समानाधिकरणत्वं नास्तीत्यर्थः। तर्हि 'चक्रं पाणौ यस्य सः चक्रपाणिः' अत्र व्यधिकरणत्वे सत्यपि प्रयोगसाधुत्वमस्ति वा?

*प्राध्यापकः, संस्कृतविभागे केन्द्रीयविश्वविद्यालयस्य हिमाचलप्रदेशेषु

अस्ति चेत्कुतः? तदिह विचार्यते 'सप्तमीविशेषणे बहुव्रीहौ' (२.२.३५) इत्यत्र सप्तमीग्रहणमेव तज्ज्ञापकम्। तद्यथा 'कण्ठेकालः' इत्यादिषु विचार्यते। कण्ठे तिष्ठतीति कण्ठेस्थः, स कालो यस्येति विग्रहः। सुपीति (३.२.४) योगविभागात्कः। 'सप्तम्युपमानपूर्वपदस्य' इति बहुव्रीहिसमासः, स्थशब्दलोपः। 'अमूर्धमस्तका...' (६.३.१२) इत्यनेन सप्तम्या अलुक्। ननु कण्ठेस्थशब्दः यद्यपि प्रथमान्त एवात्र बहुव्रीहौ पूर्वपदं, तस्य कालशब्देन सामानाधिकरण्यमस्त्येवेति कथं सप्तमीग्रहणं व्यधिकरणपदबहुव्रीहिज्ञापकम्? किञ्च विशेषणत्वादेव सिद्धे किं वा सप्तमीग्रहणेन? इति चेत् यदा स्थपदमनादृत्य कण्ठे इत्यस्याधिकरणत्वं, तस्य च कालरूपे उत्तरपदार्थे उपसङ्क्रमः, तदा कण्ठे इत्यस्य अप्रथमान्तत्वाद्बहुव्रीहेः अप्रसक्तेः तत्र सप्तम्यन्तस्य पूर्वनिपातः अस्फुटः स्यात्। ततश्च सप्तमीग्रहणात् अप्रथमान्तोऽपि बहुव्रीहिः क्वचिदस्तीति विज्ञायते इति ज्ञेयम्। इत्थं सूत्रे सप्तमीग्रहणं न क्रियते चेत् समानाधिकरण्यत्वे एव बहुव्रीहेः प्रवृत्तिरिति आयाति। तस्मात् 'चक्रपाणि'रित्यादिषु व्यधिकरणापन्नेषु रूपेषु बहुव्रीहिः न स्यात्। अतः एतादृशेषु रूपेषु व्यधिकरणतयापि बहुव्रीहिः उपपन्नः यथा स्यात्तदर्थम् एषा व्यवस्था क्रियते पाणिनिना। अतः 'चक्रं पाणौ यस्य सः चक्रपाणिः' इति सङ्गच्छते।

## 'अर्थी'त्यस्मिन् शब्दे तद्धितार्थविचारः

महाराजः बलिः महान् दानस्य कर्ता। दानस्य अभावे आत्मानम् अपूर्णं मनुते सः। यदि अर्थिनः तद्द्वारि न स्थिताः भवेयुः तर्हि सः मद्दुःखम् अनुभवति। अर्थिनाम् असम्पन्नतां विलोक्य बलिः जलविहीन-मीन इव जीविते असौकर्यम् अन्वभूत्।

नत्वत्र अर्थी इति शब्दविषये उदेति काचिज्जिज्ञासा। यद्यपि धनमस्यास्तीति धनवान् उत धनी इति मतुबन्ते रूपे इव इहापि अर्थः अस्यास्तीत्यर्थे 'अत इनिठनौ' (५.२.११५) इति सूत्रेण इनिः प्राप्तः। तथा च सूत्रार्थः– अदन्तान्मत्वर्थे इनिठनावेतौ स्तः। तदस्यास्त्यस्मिन्नित्यर्थे मतुप् (५.२.९४)। एवञ्च मत्वर्थे अर्थात् तदस्यास्त्यस्मिन्नित्यर्थे अदन्तात्प्रातिपदिकात् इनि एवं ठन् इत्येतौ प्रत्ययौ भवतः इति तात्पर्यम्।

प्रकृते 'अर्थ' इति प्रातिपदिकस्य अदन्तत्वादिनौ प्रत्यये 'अर्थी' इति रूपमिति तु भ्रम एव। 'अर्थी'त्यस्य शब्दस्यार्थो भवति– अर्थो यस्य नास्ति स इति। तथा च वार्तिकम्– 'अर्थाच्चासन्निहिते' (वा.३२२७) इति असन्निहितविषयकादर्थशब्दात् इनिरेव इति तदर्थः। एवञ्च अर्थ इत्यस्मात् प्रातिपदिकात् प्रकृतवार्तिकेन इनिप्रत्यये

'अर्थ इन्' इत्यवस्थायां 'यस्येति च' (६.४.१४८) इति अकारलोपे अर्थिन् इति जाते। विभक्त्यादिकार्येषु अर्थी इति रूपं सिद्ध्यति। असन्निहितः अर्थः अस्येति विग्रहः। अत्र विरोधात् अस्तीति न सम्बध्यते। अर्थः असन्निहितः अस्य इत्यर्थे अप्राप्त एव इनिर्विधीयते इति कैयटः। तथा च लक्ष्मीधरमहाकाव्येस्मिन्–

जानञ्जनं दुःस्थितमर्थिलाभे विनार्थिनं नित्यमदानदुःस्थः।
आः कष्टमित्थं च दुःखी कथं स निन्ये दिवसा नु साधुः॥१।२६॥

## जगद्गोप्तरिशब्दस्य समासविचारः

दोर्दण्डदर्पोपशमात्सुराणां भयापहारेण च दानवानाम्।
आसीज्जगद्गोप्तरि यत्र वीरे सर्वत्र शस्त्रव्यवहारभङ्गः॥१५॥

महाराजो बलिः शिष्टरक्षको दुष्टशिक्षकश्चासीत्। स च देवानां भयमपगमय्य दैत्यानां मदञ्च प्रशमय्य राज्यं शशास। अतः विप्लवस्याभावात् शस्त्रप्रयोगप्रसङ्गो नासीदिति तात्पर्यम्। पद्येऽस्मिन् जगद्गोप्तरि इति पदं प्रयुज्यते। तत्र षष्ठीसमासः। जगतः गोप्ता इति विगृहीतव्यम्। परन्त्विदमयुक्तम्। गुपू-रक्षणे इति धातोः 'ण्वुल्तृचौ' (३.१.१३३) इति सूत्रेण तृचि गोप्ता इति रूपम्। ततश्च 'कर्तृकर्मणोः कृति' (२.३.६५) इति सूत्रेण जगच्छब्दात् षष्ठी विधीयते। तत्र 'षष्ठी' (२.२.८) इति सूत्रेण समासे प्राप्ते 'प्रतिपदविधाना षष्ठी न समस्यते' (वा.१३२०) इति तस्य निषेधः। किन्तु 'कृद्योगा षष्ठी समस्यते' (वा.१३१७) इति षष्ठीसमासः प्रतिप्रसूयते। तथापीह 'तृजकाभ्यां कर्तरि' (२.२.१५) इति निषेधो दुर्वारः। कर्त्रर्थतृजकाभ्यां षष्ठी न समस्यते इति तदर्थः। जगतः कर्ता इत्यादौ यथा।

अत्रेदं समाधानं– 'घटानां निर्मातुस्त्रिभुनविधातुश्च कलहः' इत्यत्र भट्टोजिदीक्षितोक्तरीत्या नेयं कारकषष्ठी किन्तु कर्मणः शेषत्वेन विवक्षायां 'षष्ठी शेषे' (२.३.५०) इति सूत्रेण षष्ठी इति वक्तव्यम्। पूर्वोत्तरसाहचर्यात्। 'तृजकाभ्यां कर्तरी'ति (२.२.१५)) कारकषष्ठ्या एव निषेधः। ततो न दोषः। महाभाष्यस्य व्याख्याता कैयटस्तु 'बहुषु बहुवचनमि'ति (१.४.२१) सूत्रे 'इह कदाचिद्गुणो गुणिविशेषको भवती'ति भाष्यप्रयोगात् अनित्योयं निषेधः इति मन्यते। गुणिनो विशेषकः इत्यत्र इति कर्तरि ण्वुल्प्रत्ययान्तः। अथवा गोप्ता इत्यत्र नायं तृच् (३.१.१३३) परन्तु तृन् (३.२.१३५)। ततश्च 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (२.३.६९) इति षष्ठीनिषेधः। इह प्रयोगे जगद् इति द्वितीयान्तम् इति वा समाधेयम्।

## अद्यकीय इतिशब्दे तद्धितविचारः

प्रद्युम्नपुत्रस्य श्रीकृष्णस्य पौत्रस्य अनिरुद्धस्य तत्पत्न्या नायिकया उषया श्रृङ्गार-रसप्रधानं मेलनं जायमानम् अस्ति। तत्र सोपमं वर्णनं कुर्वन्नाह कविराट् भट्टलक्ष्मीधरः नवमे सर्गे–

सङ्गमय्य शशिनेव विशाखाम् ईदृशेन दयितेन वयस्याम्।
अद्यकीयरजनीव महोभिः पूर्णतामुपगतास्मि यशोभिः॥ ६४॥

हे प्रियतम! तव महोभिः यशोभिः अहम् 'अद्यकीय'रजनीव पूर्णताम् उपगतास्मीत्येवम् अन्वयः। श्लोके अद्यकीय इति शब्दे छविधानं कुगागमश्च कथम् उपपादनीय इति विचार्यते। प्रायस्तद्धिते छविधौ कुगागमः द्वयोरेव स्थलयोः दृश्यते, 'नडादीनां कुक् च' (४.२.९१) इत्यत्र गहाद्यन्तर्गते (४.२.१३८) 'जनपरयोः कुक्' इति गणसूत्रे च। अथवा 'अन्तःपूर्व.....' (४.३.६०) इति सूत्रस्थे 'कुग्जनस्य परस्य च' इति भाष्यवार्तिके।

ननु नडादिस्तु नाकृतिगणः न च गणसूत्रभाष्यवार्तिकाभ्यां शब्दस्यास्य सिद्धिः तत्र जनपरयोरेव पाठात्। कथन्तर्हि शब्दोऽयं व्युत्पाद्य इति जिज्ञासा जायते।

तथाहि आद्य उपायः– अद्यस्याव्ययत्वात् अकचं (५.३.७१) विधाय छविधानान्तर्गतत्वेन कस्यचिद्गणस्य आकृतित्वाच्छं वदामो यदि तर्हि अद्यकीय इति शब्दसिद्धिः अर्हति भवितुम्। अथवा द्वितीयोपायस्तु– अद्य इत्यस्मात् स्वार्थिकं कनं विधाय गहादित्वात् (४.२.१३८) छो शक्यः वक्तुम्। एवं क्रियमाणे अपि अद्यकीय इति रूपं प्रतिप्रसूयेत।

महाकाव्यान्तरेषु प्रयोगस्य अस्य श्रवणं न जायते। तथापि उक्तः प्रयासस्तु स्थितस्य साधुत्वविधानमात्राय। विश्वविख्यातेन महता वैयाकरणेन रामानुजदेवनाथवर्येण तु द्वितीयोपायं ब्रुवता 'अद्यकीय इति प्रयोगो न भाति' इत्यभाणि।

## वावल्ल इति शब्दविचारः

जिह्वायुग्मैर्भुजङ्गस्य स्पृशद्भिरपि दुःसहैः।
विषाक्तैरिव वावल्लैश्चक्रिरे शतधा घनाः॥ १८-७४॥

(बाणासुरपक्षात् आक्रमणं कृतवतः कस्यचित् महाभुजगस्य) जिह्वायुग्मैः विषाक्तैः वावल्लैः घनाः शतधा चक्रिरे इत्येवम् अन्वयः। कृष्णबाणासुरयोः युद्धप्रसङ्ग एषः। अत्र वावल्लैः इति पदविषये जिज्ञासा। 'अत्र कविना "वावल्ले"ति

देशीपदं ‘‘व्यापृते’’ति अर्थे प्रयुक्तम्’ इति ग्रन्थस्यास्य आद्यः व्याख्याता डा.पूर्णोचन्द्रोपाध्यायः ब्रवीति। देशिपदन्नाम अत्र उत्तरेषु पञ्जाबीभाषायां व्वा वल्ले व्वा वल्ले इत्यादिशब्दानाम् उत्कर्षहर्षप्रकर्षादिषु प्रयोगः क्रियते। मद्विप्रतिपत्तिरत्र यत् गौडदेशीयोऽयं कविः पाञ्चनदादिषु प्रयुज्यमानं लौकिकं शब्दं कथं वा प्रौढे सुसंस्कृते महाकाव्ये शक्नोति प्रयोक्तुमिति! यद्यपि सत्यमिदं यत् अमरकल्पद्रुमामरवाचस्पत्येषु नायं वावल्ल इति शब्दः दृष्टः क्वापि। वल्लः इति तु दृश्यते। कव्यन्तरेण प्रयुक्तस्स्यादिति न सद्यः ज्ञायते।

किञ्च! वावल्ल इति शब्दसदृशः वावदूक इति कश्चन शब्दः ‘बहुवदनशीले वक्तरि’ (इत्यस्मिन्नर्थे), शब्दकल्पद्रुमे वाचस्पत्ये अमरे च लक्षितः। तत्र वद + यङ्लुक् + ऊकः (‘उलूकादायश्च’ उ.४.४१– अनेन ऊकान्तस्य निपातः) इति वाचस्पत्यकार-कल्पद्रुमकारौ। ‘कुर्वादिषु (४.१.५१) वावदूक-शब्दपाठात् ‘वदेः ऊकः’ इति सुधाव्याख्याकारः।

ननु यङ्लुकादिकं विधाय यथा वावदूकः सिद्ध्यति ऊकान्तः, तथैव वल्ल-संवरणे सञ्चरणे च इत्यस्माद्धातोः यङ्लुकादिकं कृत्वा अजन्तः कश्चन शब्दः वालल्ल इत्यपि शक्यः साद्धुम् इति युक्तिर्भासते। प्रकृते प्रसङ्गानुरोधिनी अर्थसङ्गतिस्तु चिन्त्या। अथवा धात्वनेकार्थत्वेन निर्वाहः चिन्त्यः।

## वाङ्मिनि उत वाग्ग्मिनि

अस्ति वामनयने भवती यत् प्राह साहसमिदं न वदामः।
तत् किमन्यदुपसत्तिरियं मे ब्रूहि वाङ्मिनि यदद्य विधेयम्॥९।३४॥

‘हे वाङ्मिनि’! ब्रूहि, इत्येवमन्वयः। वाचः मतुबर्थे ग्मिनिः (५.२.१२४) अत्र विधीयते। तथा हि स्त्रियां वाचो ग्मिनिं विधाय, कुत्वेन (८.२.३०), जश्त्वेन (८.२.३९) नान्तत्वाच्च ङीपा (४.१.५) वाग्ग्मिनी इति गकारद्वयसमन्वितं रूपम्।

ननु ग्मिनावत्र गकारोच्चारणं तु ‘प्रत्यये भाषायां नित्यम्’ (वा.५०१७) इत्यनुनासिकाभावार्थम्। कथं तर्हि सम्बोधने ग्मिनेर्गकारं विहाय अनुनासिकसंयुतत्वं ‘वाङ्मिनी’त्यभाणि कविना? ‘वाग्ग्मिनि’! इति खलु स्यादनुनासिककार्याभावे प्रत्यये गकारानुपस्थित्यभावे च। एतादृक्प्रयोगः दशमे सर्गे अपि दृश्यते। तथाहि–

तामेवावसरप्राप्तां भित्तिमादाय सा ततः।
नानावचनचित्राणि रचयामास वाङ्मिनी॥१०।११॥

अत्रेदमुच्यते– वच-परिभाषणे इति धातोः ‘वचेर्मिनिञ् चस्य गः’

इति उणादिसूत्रेण मिनिञ्-प्रत्ययं तथा चास्य गादेशमपि कुर्वन्ति दुर्गसिंहः उणादिवृत्तिकाराः च। तथा च सरस्वतीकण्ठाभरणे 'वचेर्गश्च' इति सूत्रे वाग्मिः इति लक्ष्यमपि दृश्यते।

एवञ्च उणादिविधीनां बाहुलकात् (३.३.१) गादेशाप्रवृत्तिः क्वचित् स्यादिति वक्तुं शक्येत। तथा सति वाङ्मिनि इति सिध्यति। एवं चिन्तने वृद्धसम्मतिस्तु प्रतीक्षणीया।

## कतिपय-शब्दे निपातननिर्णयः

अथ कतिपयलक्षस्वर्णशैलादिशृङ्गे
प्रसरति सति वारां सर्वतोऽपि प्रवाहे।
प्रशममसमशक्तिः कर्तुमम्भोधाराणामकृत
हृदि महास्त्रं वायवीयं वृषाङ्कः॥९०॥

प्रकृते हरिहरयोः युद्धे हरपक्षात् माहास्त्रक्षेपणप्रसङ्गः वर्तते। श्लोके विद्यमाने कतिपयशब्दे पुगयचौ कथ्येते कल्पद्रुमवाचस्पत्यकाराभ्याम्। किञ्चाष्टाध्याय्यां तावत् 'द्वित्रिभ्यां तयस्यायज्वा' (५.२.४३) इत्यत्र 'उभादुदात्तो नित्यम्' (५.२.४४) इत्यत्र च अयज्विधानं दृश्यते। कतेरुक्तस्थलद्वये चर्च्या नास्ति। औणादिकी व्यवस्थापि न लक्षिता काचित्। प्रकारान्तेण केनापि क्वापि नैतौ पुगयचौ व्याख्यातौ दृश्यते। कथं तर्हि एतयोः विधानमत्र बोध्यम्? इति चेदुच्यते– 'प्रथमचरमतयाल्पार्धकतिपय..' (१.१.३३), 'पोटायुवतिस्तोककतिपय..' (२.१.६५), 'षट्कतिकतिपय..' (५.२.५१) इत्यादिषु कतिपये पुगयचोः निपातनं मन्तव्यम्। एवं रीत्या निपातनस्य अस्य साधुत्वम् आचार्यैः रामानुजदेवनाथवर्यैः समर्थितमिति दिक्।

# पूर्वत्रासिद्धम्– अध्ययनमेकम्

अनुपकुमारखानः*

## उपोद्घातः

अकारस्य प्रयत्नो विशेषतया स्पष्ट्यते "अ अ" (८/४/६८) इति पाणिनीयसूत्रस्य दीक्षितवृत्तौ। अकारस्य प्रयत्नः द्विविधः– संवृतो विवृतश्चेति। प्रयोगदशायाम् अकारः संवृतः, प्रक्रियादशायां विवृतश्च भवति। 'प्रयुज्यते असौ इति प्रयोगः' इति व्युत्पत्त्या धातुप्रातिपदिकप्रत्ययनिपातागमादेशानां यथाक्रमं पच्-नर-अण्-उप-अट्-अवाम् अकारः संवृतो भवति। किन्तु शास्त्रीयकार्ये प्रक्रियादशायाम् अकारो विवृतो भवति। तथा न स्वीक्रियते चेत् 'दण्डस्य आनयनम् > दण्ड आनयनम्' इत्यादौ "अकः सवर्णे दीर्घः" (६/१/१०१) इति सूत्रेण दीर्घ एकादेशो न स्यात्। अत एव "अ अ" इति सूत्रस्य वृत्तौ दीक्षितपादेनोक्तम्– "विवृतमनूद्य संवृतोऽनेन विधीयते। अस्य चाष्टाध्यायीं सम्पूर्णां प्रत्यसिद्धत्वात् शास्त्रदृष्ट्या विवृतत्वमस्त्येव"[२] इति। सूत्रेऽस्मिन् प्रथमः अकारो विवृतः, अन्तिमः अकारः संवृतः। विवृतस्य अकारस्य स्थाने संवृतः अकारो विधीयतेऽनेन सूत्रेण।

अत्र लक्षणीयं यत् सूत्रमेतद् अष्टाध्याय्याम् अन्तिमसूत्रम्। इतः पूर्वम् अष्टाध्याय्या यानि सूत्राणि सन्ति तानि प्रत्येतत् सूत्रमसिद्धम्। "नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्" (८/४/६७) इति यावद् अष्टाध्याय्याः सर्वेषां सूत्राणां दृष्ट्या विवृतोऽकारः संवृतो नाभवत्। अतः कार्याणि सिध्यन्ति। एवं सूत्रप्रयोगाद् व्याकरणे कार्यसाधनकाले 'अकारो विवृतः' इति स्वीक्रियते। किन्तु सूत्रप्रयोगाभावे परिनिष्ठितरूपे अकारो व्यवह्रियते चेत् "अ अ" इति सूत्रबलाद् अकारः संवृतो भवतीति सिद्धान्तः।

## सूत्रस्यास्य स्वरूपम्

अधुना प्रश्नो जायते, कथम् "अ अ" इति सूत्रस्यासिद्धत्वम् इति। प्रश्नस्योत्तरत्वेन "पूर्वत्रासिद्धम्" (८/२/१) इति सूत्रमालोचितमस्ति। सूत्रमेतद्

---

*शोधच्छात्रः, संस्कृतविभागे, वर्धमानविश्वविद्यालयस्य

[२]गोपालदत्तपाण्डेयः प्रथमः खण्डः– १४

अष्टाध्याय्याम् अष्टमाध्याये द्वितीयपादे प्रथमसूत्रम्। इतः पूर्वं सप्त अध्यायाः अष्टमाध्यायस्य च प्रथमपादः सन्ति। अत आलोच्यमानात् सूत्रात् पूर्वं विद्यमानः अष्टाध्याय्या भागः 'सपादसप्ताध्यायी' इति अन्तिमभागश्च 'त्रिपादी' इति अभिधीयते। द्विपदात्मकेऽस्मिन् सूत्रे 'पूर्वत्र' 'असिद्धम्' इति पदद्वयम् अस्ति। "सप्तम्यास्त्रल्" (५/३/१०) इति सूत्रेण पूर्वशब्दात् परं सप्तम्यर्थे त्रल्प्रत्यये कृते पूर्वत्र इति पदं निष्पद्यते। तदा पूर्वत्र इति पदस्यार्थो भवति पूर्वस्मिन्। अधुना सूत्रस्यार्थो भवति 'पूर्वं प्रति असिद्धमि'ति। किन्तु, पूर्वं प्रति किमसिद्धमिति प्रश्नोऽधुनापि जायते। कथयति, पूर्वं भवति परसापेक्षम्। यस्मात् परमस्ति तत्पूर्वम्। अतः पूर्वं प्रति परमसिद्धमि'ति सूत्रस्यार्थः। पुनरपि एकः प्रश्नो विद्यतेऽत्र। कस्मात् पूर्वं परं वेति निर्धारणविषये संशयो वर्तते। पूर्वत्रासिद्धम् इति सूत्रम् अवधिरूपेण निर्धार्यते। अस्मात् सूत्रात् पूर्वं यानि सूत्राणि सन्ति तेषां सूत्राणां दृष्ट्या अस्मात् सूत्रात् परस्थितानि सर्वाणि सूत्राण्यसिद्धानि भवन्ति। सूत्रात् अस्मात् पूर्वं सपादसप्ताध्यायी परञ्च त्रिपादी स्तः। तर्हि सूत्रस्यार्थो भवति– 'सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा' इति। सूत्रस्यास्याधिकारत्वात् त्रिपाद्यामपि सर्वेषु सूत्रेषु 'पूर्वं प्रति परमसिद्धमि'ति नियमः प्रयुज्यते।

सूत्रस्य कार्यद्वयं स्वीक्रियतेऽत्र– आदेशलक्षणप्रतिषेधार्थकार्यं स्थानिलक्षण-भावार्थकार्यञ्च। यथा– 'हरे इह' इत्यत्र "एचोयवायावः" (६/१/७८) इति सूत्रेण अयादेशे 'हरय् इह' इति स्थिते "लोप शाकल्यस्य" (८/३/१९) इति सूत्रेण यकारलोपे 'हर इह' इति जाते "आद् गुणः" (६/१/८७) इति सूत्रेण गुणः एकादेशःप्रसज्यते। किन्तु तन्न भवति। "आद् गुणः" इति सपादसप्ताध्यायीस्थितं (षष्ठाध्याये प्रथमपादे सप्ताशीतितमं) सूत्रम्। तत्प्रति लोपविधायकं "लोपः शाकल्यस्य" इति त्रिपादीस्थं सूत्रम् असिद्धम्। अतः "आद् गुण" इति सूत्रस्य दृष्ट्या लोपो नाभवत्, तेन गुणप्रसङ्गोऽपि नास्ति। लोपादेशमाश्रित्य 'आद् गुणः' इति सूत्रस्य प्राप्तिः स्यात्, किन्तु प्रतिषिध्यते।

सूत्रस्यास्य अपरं कार्यमस्ति स्थानिलक्षणभावार्थकार्यम्। स्थानिनमवलम्ब्य सूत्रप्राप्तिर्भवति चेत्तत् प्राप्यते इति स्थानिलक्षणभावार्थं कार्यम्। यथा, अदस्शब्दात् पुंलिङ्गे चतुर्थ्येकवचने 'अदस् ङे' इति स्थिते "त्यदादीनामः" (७/२/१०२) अदसोऽन्त्यस्य सकारस्य स्थाने अकारादेशे 'अद अ ङे' इति जाते "अतो गुणे" (६/१/९७) इति सूत्रेण अकारद्वयस्य स्थाने पररूपैकादेशे अकारे 'अद ङे'

इत्यवस्थायां “सर्वनाम्नः स्मै” (७/१/११), “अदसोऽसे दादु दो मः” (८/२/८०) चेति सूत्रद्वयस्य प्राप्तिः भवति। प्रथमसूत्रेण (७/१/११) ङेविभक्तेः स्थाने स्मै-आदेशे ‘अद स्मै’ इति स्यात्। द्वितीयसूत्रेण (८/२/८०) अदस्शब्दस्य दकारस्य स्थाने मकारादेशे, अन्त्यस्य अकारे च उकारादेशे ‘अमु ङे’ इति स्यात्। अत्र “विप्रतिषेधे परं कार्यम्” (१/४/२) इति सूत्रनियमेन परसूत्रस्य प्राप्तिः भवति। तदा ‘अमु ङे’ इत्यवस्थायां सर्वनाम्नः अकारान्तत्वाभावात् “सर्वनाम्नः स्मै” इति सूत्रस्या अप्रवृत्त्या स्मै इत्यादेशस्याभावे ‘अमुष्मै’ इत्यभीष्टं न सिध्यति। “पूर्वत्रासिद्धम्” इति सूत्रस्याधिकारत्वात् स्मै-विधायकसूत्रस्य दृष्ट्या “अदसोऽसेर्दादु दो मः” इति सूत्रम् असिद्धम्। तेन ‘अमु ङे’ इति स्थिते स्मै-विधायकसूत्रदृष्ट्या सर्वनाम्नः अकारान्तत्वात् स्मै इत्यादेशे ‘अमुष्मै’ इत्यभीष्टरूपम्। पूर्वं प्रति परमसिद्धमित्युक्तेः पूर्वपरेतिशब्दद्वयेन किं बोद्धव्यं कार्यं शास्त्रं वेति संशये केचन कार्य्यासिद्धत्वपक्षं स्वीकुर्वन्ति। तन्मते पूर्वकार्यदृष्ट्या परकार्यम् असिद्धम् इति। बहवो व्याख्याकाराः शास्त्रासिद्धत्वपक्षं स्वीकुर्वन्ति। तन्मते पूर्वपरेतिशब्दद्वयेन सूत्राण्येव बोद्धव्यानि न सूत्रविहितानि कार्याणि। अतः पूर्वसूत्रदृष्ट्या परसूत्रस्य असिद्धत्वात् तद्विहितकार्यमपि न विद्यते।

कार्यसिद्धत्वं स्वीक्रियते चेदभीष्टं न सिध्यति। यथा ‘अद् ङे’ इति स्थिते ‘अदसोऽसेर्दादु दो मः’ इति सूत्रेण मकारोकारादेशे ‘अमु ङे’ इत्यवस्थायां ‘पूर्वत्रासिद्धम्’ इत्यनेन उकारस्यासिद्धत्वेऽपि अकारस्य पुनरागमनं न भविष्यति। तत्र उकारो नास्तीति भवतु किन्तु अकारोऽस्तीति न सिध्यति देवदत्तहन्तृहतन्यायात्। यथा रामो देवदत्तं हतवान्। ततः परं श्यामो रामं हतवान्। रामस्य मृत्योः परं देवदत्तस्य पुनर्जन्म न भवति केवलं रामस्य मृत्युर्भवति। तथैवात्र अकारनाशक उकारः। उकारे असिद्धे अविद्यमानेऽपि अकारो न पुनर्जायते। तस्मादादेशोऽपि न भविष्यति ‘अमुष्मै’ इति न सिध्यति। शास्त्रासिद्धत्वपक्षे स्वीकृते अकारस्योकारादेशाभावाद् अकारः पूर्ववद्विद्यते। ततः स्मै-आदेशे ‘अमुष्मै’ इति रूपम्।

इदं सूत्रमेतत्परवर्तिनां सूत्राणामसिद्धत्वं बोधयति किन्तु स्वस्य न बोधयति। इदं सूत्रम् असिद्धस्य बोधको भवति। बोधकः कदापि बोध्यो न स्यात्। स्वयम् असिद्धं भवेच्चेद् अन्यस्य असिद्धोपस्थापने असमर्थः स्यात्। यथा ‘अहं सर्वं मिषा वदामि’ इति वाक्यम् इतरवाक्यानाम् असिद्धत्वं प्रतिपादयति। किन्तु प्रथमवाक्ये मिथ्यात्वं

प्रतिपाद्यते चेद् इतरवाक्यानां मिथ्यात्वं न सिध्यति। सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा इति कथयति चेत् त्रिपादीस्थानां सप्तमीपञ्चमीषष्ठीनिर्देशानाम् असिद्धत्वं स्वीकर्तव्यम्। तेन ''झलो झलि'' (८/२/२६), ''ह्रस्वादङ्गात्'' (८/२/२७), ''संयोगान्तस्य लोपः'' (८/२/२३) इत्यादिषु सप्तमीत्यादिनिर्देशेषु असिद्धत्वे स्वीकृते यथाक्रमं ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' (१/१/६६), ''तस्मादित्युत्तरस्य'' (१/१/६७), ''षष्ठीस्थाने योगा'' (१/१/४९) चेति परिभाषासूत्राणि त्रिपाद्यां न प्रवर्तन्ते इति शङ्का। शङ्कायाम् अस्यां नास्ति कोऽपि दोषः। 'कार्यकालं संज्ञापरिभाषम्' इति वचनसामर्थ्यात् सपादसप्ताध्यायीस्थानि संज्ञापरिभाषासूत्राणि त्रिपाद्याम् अपि प्रयुज्यन्ते। कार्येण काल्यते स्वसन्निधिं प्राप्यते इति कार्यकालम्। संज्ञापरिभाषासूत्राणि विधिसूत्रोपकारकाणि भवन्ति। अतो यत्र कार्यविधायकसूत्रं वर्तते तत्र संज्ञापरिभाषासूत्राणि उपतिष्ठन्ते। विधिसूत्राणां क्षेत्रमेव संज्ञापरिभाषाणां क्षेत्रममिति स्वीक्रियते। यथा– ''झलो झलि'' इत्यत्र ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' इति परिभाषासूत्रं विद्यते। 'कार्यकालं संज्ञापरिभाषम्' इति पक्षः स्वीक्रियते चेत् ''विप्रतिषेधे परं कार्यम्'' (२/४/२) इति परिभाषापि त्रिपाद्यां कृतकर्मा भविष्यति। विपूर्वकस्फुर्धातोः ''ऋहलोर्ण्यत्'' (३/१/१२४) इत्यनेन ण्यत्प्रत्यये 'वि स्फुर् ण्यत्' इति स्थिते ''पुगन्तलघुपदस्य च'' (७/३/८९) इति सूत्रेण गुणः प्राप्यते। अपि च, ''हलि च'' (८/२/७७) इति सूत्रेण हलि परे रेफान्तधातोः उपधाया दीर्घः प्राप्यते– इति सूत्रद्वयस्य मध्ये ''विप्रतिषेधे परं कार्यम्'' इति न्यायेन परत्वाद्दीर्घकार्ये 'विस्फूर्यम्' इत्यनिष्टरूपं स्यात् 'विस्फोर्यम्' इतीष्टरूपं न भविष्यतीति शङ्का। उत्तरत्वेन भाष्यकारः कथयति यत् समबलविशिष्टयोः सूत्रयोः विप्रतिषेधत्वं भवति। त्रिपाद्यां पूर्वशास्त्रं प्रति परशास्त्रस्य असिद्धत्वम्। तर्ह्यत्र सूत्रद्वयं विद्यमानं नास्ति। तस्मात् विप्रतिषेधत्वमत्र न प्राप्नोति।

## सूत्रस्यास्याधिकारत्वस्वीकारे प्रयोजनम्

''पूर्वत्रासिद्धम्'' इति सूत्रं स्वतन्त्रं विधिसूत्रं भवेच्चेत् सूत्रस्यार्थः 'सपादसप्ताध्यायीस्थं सूत्रं प्रति त्रिपादीस्थं सूत्रमसिद्धं भवति' इति स्यात्, 'त्रिपाद्यां पूर्वसूत्रं प्रति परसूत्रमसिद्धं भवति' इत्यर्थो न भवेत्। तर्हि 'गोधुङ्भ्यान्' इत्यादिषु सिद्धप्रयोगो न भवति। ''पूर्वत्रासिद्धमि''ति सूत्रस्य यदा अधिकारत्वं स्वीक्रियते तदा 'त्रिपाद्यामपि पूर्वसूत्रं प्रति परसूत्रमसिद्धं भवति' इत्यर्थो बुद्ध्यते।

तेन 'गोधुङ्मान्' इति प्रयोगोऽपि सिध्यति। अन्यथा प्रयोगेऽस्मिन् घत्व-जश्त्व-अनुनासिकत्वेभ्यः परं भष्भावो न भवति। 'गोदुह् मान्' इति स्थिते "दादेर्धातोर्घः" (८/२/३२), जश्विधायकं "झलां जशोऽन्ते" (८/२/३९) इति, अनुनासिकविधायकं "यरोऽनुनासिकेऽनुनासिकोवा" (८/४/४५) चेति सूत्रत्रयस्य प्राप्तिर्भवति। "दादेर्धातोर्घः" (८/२/३२) इत्यनेन झलि परे हकारस्य घकारादेशो भवति। एतेषु सूत्रेषु घत्वविधायकं "दादेर्धातोर्घः" इति सूत्रम् अपवादसूत्रम्। अपवादत्वात् ढत्वबोधकसूत्रं बाधित्वा घकारमादिशति। 'गोदुघ् मान्' इति स्थिते जश्त्वानुनासिकत्वभष्भावविधायकानां सूत्राणां प्राप्तिर्भवति। "एकाचो बशो भष् झषन्तस्य स्ध्वोः" (८/२/३७) इति भष्भावविधायकसूत्रमस्ति त्रिपाद्याम्। जश्विधायकं 'झलां जश् झशि' इति सूत्रं बाधित्वा भष्भावं प्राप्यते असिद्धत्वात्। भष्भावमपि परत्वान्नित्यत्वाच्च बाधित्वा अनुनासिकत्वं विधीयते। अनुनासिके विहिते झषन्ताभावात् भष्भावः न भवति। गोधुङ्मान् इत्यत्र 'घत्वजशत्वानुनासिकेषु भष्भावानापत्तिः' इति वचनस्य तात्पर्यम्। वस्तुतस्तु गोदुह् मान् इति स्थिते हकारस्य घकारे "झयः" (८/२/१०) इति सूत्रेण मतुपः मकारस्य वत्वापत्तिः भवति। भष्भावानापत्तिदोषो नास्त्यत्र। यतो हि घत्वान्ते अपवादत्वात् जश्विधायकं "झलाम्" (८/२/३९) इति सूत्रम् अन्तरङ्गत्वाच्च 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रं बाधित्वा भष्भावः भवितुमर्हति। किन्तु घत्वे कृते "झयः" इत्यनेन मकारस्य वकारेऽभीष्टसिद्धिः न भवेत्। एतदर्थं 'पूर्वत्रासिद्धमि'ति सूत्रस्याधिकारत्वं स्वीकर्तव्यम्। अधिकारे स्वीकृते 'त्रिपाद्यामपि पूर्वं प्रति परत्वाद् असिद्धमि'ति न्यायेन "झयः" इत्यस्य दृष्ट्या "दादेधातोर्घः" (८/२/३२) इति सूत्रमसिद्धं भवति। तेन झयन्ताभावात् वत्वापत्तिर्न भवति। 'गोदुह्मानि'ति स्थिते भष्भावसूत्रं "झलां जशोऽन्ते" इति सूत्रं प्रबाधते। यतो हि पदान्तस्थितौ भष्भावो जश्त्वस्यापवादो भवति। भष्भावानुनासिकयोर्मध्ये परत्वाद् अनुनासिकस्यासिद्धत्वं भवति। अनेन प्रकारेण आदौ भष्भावः भवति। ततः पुनरसिद्धत्वात् जश्त्वं भवति। ततः अनुनासिकत्वविधानात् गोधुङ्मान् इति प्रयोगः सिध्यति।

भाष्यकारमते 'पूर्वत्रासिद्धमि'ति सूत्रस्याधिकारत्वं स्वीक्रियते चेत् सपादसप्ताध्यायीसमुदायं प्रति त्रिपादीसमुदायस्यासिद्धत्वं बोधयिष्यति। तस्मादिष्टरूपं न सिध्यति अधिकञ्च अनिष्टमपि इष्टं भवितुमर्हति। यथा गोधुङ्मान् इत्यत्र 'गोदुह् मान्' इति स्थिते "दादेर्धातोर्घः" इति सूत्रेण हकारस्य घत्वे, घस्य

"झलां जश् झशि" इति सूत्रेण गकारे 'गोदुग् मान्' इति जाते जश्त्वस्यासिद्धत्वात् "एकाचो बशो भष् झषन्तस्य स्ध्वोः" (८/२/३८) इति सूत्रेण भष्भावे, "प्रत्यये भाषायां नित्यम्" (८/४/२५) इति सूत्रपठितवार्तिकेन परसवर्णे कृते 'गोधुङ्मान्' इति रूपं सिध्यति। अत्र "हो ढः" (८/२/३१) इति सूत्रेण हकारस्य ढकारादेशे 'गोदुढ् मान्' इति स्थिते "झयः" इति सूत्रदृष्ट्या जश्त्वादीनाम् असिद्धत्वात् मतुपः मकारस्य वत्वप्राप्तिर्भवति। अधिकारे स्वीकृते त्रिपाद्यां प्रतिपूर्वसूत्रदृष्ट्या प्रतिपरसूत्रम् असिद्धं भवतीति न्यायेन "झयः" इति सूत्रदृष्ट्या "दादेर्धातोर्घः" इति सूत्रस्यासिद्धत्वात् झय्परकत्वाभावाच्च "झयः" इति सूत्रस्य प्रवृत्तिर्न भवति।

प्रसङ्गत उल्लेख्यं यत् "पूर्वत्रासिद्धीयमद्वित्वे" इति एका परिभाषा। "पूर्वत्रासिद्धम्" इत्यधिकारे भवम् पूर्वत्रासिद्धीयमिति। अधिकारेऽस्मिन् यानि सूत्राणि सन्ति तेषु सूत्रेषु 'अद्वित्वे' इति पदमुपस्थाप्यते। अतः परिभाषाया अस्या अर्थो भवति– 'द्वित्वभिन्ने पूर्वशास्त्रस्य कर्तव्ये परशास्त्रमसिद्धं भवती'ति। नागेशेनोक्तम्– "द्वित्वभिन्ने पूर्वत्र कर्तव्ये परमसिद्धमित्यर्थः' इति। "पूर्वत्रासिद्धम्" (८/२/१) इत्यधिकारभवं शास्त्रम् अस्या लिङ्गम्"[३] इति। अस्याः परिभाषायाः 'पूर्वशास्त्रकर्तव्ये परमसिद्धम्' इत्यर्थस्य स्थाने 'कर्तव्ये पूर्वत्रासिद्धमि'ति सूत्रमप्रवृत्तं स्यादि'ति अर्थात् 'त्रैपादिकमसिद्धं न भवती'ति भवितुं नार्हति। परिभाषाया अर्थो 'द्वित्वभिन्ने पूर्वशास्त्रस्य कार्ये परशास्त्रमसिद्धं न भवती'ति चेद् 'दिव् भ्याम्' इति स्थिते "अनचि च" (८/४/४७) इत्यनेन द्वित्वे 'दिव् व् भ्याम्' इति जाते "दिव उत्"[४] (६/१/१३१) इत्यनेन वकारस्य उत्वे उकारस्य पूर्ववकारश्रवणं भविष्यति। तर्हि 'दिवुभ्याम्' इति भवति, 'द्युभ्याम्' इति रूपं न सिध्यति 'पूर्वत्रासिद्धम्' इत्यप्रवृत्तत्वात् "दिव उत्" इति सूत्रं प्रति "अनचि च" इत्यस्यासिद्धत्वाच्च। अतः परिभाषा अस्या एतादृशार्थो न सङ्गच्छते। द्वित्वभिन्नकार्यविधायकस्य पूर्वशास्त्रस्य कर्तव्ये परशास्त्रमसिद्धं भवति इत्यर्थस्वीकारे कुत्रापि दोषो न विद्यते। अतो द्युभ्यामित्यत्र द्वित्वभिन्नवकारविधायकसूत्रं "दिव उत्" इति सपादसप्तमाध्यायेऽस्ति। तत्प्रति द्वित्वमसिद्धं भवति। इत्थं नास्ति काप्यसङ्गतिः।

---

[३]नागेशः– ४५३

[४](दिवः पदस्य उकारादेशो भवति– इति काशिका) आर्येन्द्रशर्मा– ६३० (अन्तादेश इति। अलोन्त्यसूत्रलभ्यम्। पदान्त इति। पदान्तादित्युनुवृत्तं सप्तम्या विपरिणम्यत इति भावः।– इति बालमनोरमा।) गोपालदत्तपाण्डेयः प्रथमः खण्डः– २१९

‘पूर्वत्रासिद्धम्’ इत्यधिकारान्तर्गतानि यानि सूत्राणि सन्ति तेष्वेव सूत्रेषु परिभाषाया अस्याः प्रवृत्तिर्भवति। यत्र सिद्धत्वासिद्धत्वयोः फलविशेषतास्ति तत्रैवेयं परिभाषा प्रवर्तते। यथा ‘दिव् भ्याम्’ इत्यस्मात् ‘दिवुभ्यामि’ति असिद्धरूपं ‘द्युभ्याम्’ चेति सिद्धरूपं प्राप्येते। अनयोर्मध्ये द्युभ्यामिति ईप्सितरूपसिद्ध्यर्थं परिभाषायाः प्रवृत्तिर्भवति। किञ्च, द्रुह्धातोः तृच्प्रत्यये कृते हकारस्य “वा द्रुहमुहष्णुहष्णिहाम्” (८/२/३३) इति सूत्रेण वैकल्पिकघकारादेशे ‘द्रोग्धा’ इति स्थिते, ततः “हो ढः” (८/२/३१) इति सूत्रेण हकारस्य ढत्वे ‘द्रोढा’ इति रूपद्वयं भवति। अत्र “नित्यवीप्सयोः” (८/१/४) इति सूत्रेण वीप्सार्थे द्वित्वे सति ‘द्रोग्धा द्रोग्धा’ ‘द्रोढा द्रोढा’ चेति द्वित्वविशिष्टानि रूपाणि भवन्ति। अत्रैका शङ्का वर्तते। ‘वा द्रुहमुहे’ति ‘हो ढः’ चेति सूत्रद्वयं त्रिपादीस्थम्। एतदर्थं “नित्यवीप्सयोः” इति सपादसप्ताध्यायीस्थं प्रति घत्वं ढत्वं चोभे असिद्धे भवतः। तर्हि ‘द्रोह्ता’ इत्यत्र द्वित्वे कृते एकत्र घत्वे अपरत्र ढत्वे आपत्तिः स्यात्। घत्वविशिष्टं ढत्वविशिष्टं वा द्वित्वरूपं न भविष्यति, एकरूपं केवलं भविष्यतीति शङ्का। एतस्याः शङ्कायाः दूरीकरणाय इयं परिभाषा प्रवर्ततेऽत्र। द्वित्वाद्भिन्नकार्यविधायकस्य पूर्वशास्त्रस्य कार्ये परशास्त्रम् असिद्धं भवतीति परिभाषाया अस्या अर्थः। ‘द्रुह् तृच्’ इत्यत्र द्वित्वाद्भिन्नविधायकपूर्वशास्त्रं नास्ति। तर्हि असिद्धप्रसङ्गः अपि नागच्छति। ‘द्युभ्याम्’ इत्यत्र द्वित्वाद्भिन्नं वकारादेशविधायकं “दिव उत्” इति सूत्रमस्ति। तत्सूत्रं प्रति “अनचि च” (८/४/४७) इति सूत्रम् असिद्धमेव। ततः ‘दिव् भ्याम् >दि उ भ्याम् >द्युभ्याम्” इति रूपं सिध्यति।

## मुग्धबोधव्याकरणेऽसिद्धत्वम्

त्रयोदशशताब्द्यां वोपदेवरचितेषु व्याकरणविषयकेषु दशसु ग्रन्थेषु मुग्धबोधव्याकरणम् (अद्यावधिः मुग्धबोधव्याकरणं, कविकल्पद्रुमं, काव्यकामधेनु श्चेति ग्रन्थत्रयं प्राप्तम्) अन्यतमम्। व्याकरणशिक्षा हरिनामसंकीर्तनञ्चेति युगपत् प्राप्येतेऽत्र। एतदर्थमेव अयं व्याकरणग्रन्थः पठनीयः–

गीर्व्वाणवाणीवदनं मुकुन्दसङ्कीर्त्तनञ्चेत्युभयं हि लोके।
सुदुर्ल्लभं तच्च न मुग्धबोधान्न लभ्यतेऽतः पठनीयमेतत्॥[५]

ग्रन्थेऽस्मिन् वैचित्र्यं किञ्चित् दृश्यते। पादचतुष्टयात्मके दशाध्यायात्मके

[५]वोपदेवः– २८७

च पञ्चाशित्यधिक-शताधिकसहस्त्रं (११८५) संख्यकानि सूत्राणि समुपलभ्यन्ते। बहुलप्रचलितेषु व्याकरणग्रन्थेषु मुग्धबोधः स्वल्पकायः प्राप्यते निर्माणशैल्याः संक्षिप्ततावशात्। उदाहरणम्– "गोतृणमेधादन्तकाण्डद्युबलबलिपर्व्वचूडाफेन-लोमपामप्रज्ञामधुकेशरजः फलोणाश्रृङ्गनिद्राशोर्वातादेर्मिन् सेरोरेरमोले भतलेलशनणरवबलेनय्वारकाल्वकिन् वा" (४४७) मुग्धबोधीयसूत्रेण ( ४/२/८०, ५/२/९६, ९९, १००, १०१, १०६, १०७, १०८, १०९, १११, ११२, ११४, १२३, १२७, १२९, १३९, १४०)[६] सप्तदशपाणिनीयसूत्राणां कार्याणि सम्पाद्यन्ते। किञ्च याद्यादेशविधायकेन "यलायवायावोऽचीचः" (३५) इति सूत्रेण "इको यणचि" (६/१/७६), "एचोऽयवायावः" (६/१/७७/) चेति पाणिनीयसूत्रद्वयस्य कार्यं सिध्यति। "लुपि न सन्ध्याद्यविधौ" (१५) इति संज्ञाविधायकसूत्रम्, अच्सन्धिवषयकेषु सूत्रेषु "अयं य्वोर्लुव्वा" (३८) चेति सूत्रद्वयमत्रालोचयामि।

"लुपि न सन्ध्याद्यविधौ "इति सूत्रेण लुपिति शब्देन कस्यचित् वर्णस्य लोपसंज्ञा क्रियते चेत् लुप्तवर्णात् पूर्ववर्णेन साकं परवर्णस्य सन्धिः न भवति। किञ्च आदिवर्णस्य स्थाने किमपि विधानं न प्रयुज्यते इति सूत्रकाराशयः।[७] "अयं य्वोर्लुव्वा"[८] इति (३८) सूत्रेण पदस्थितानाम् अय्-अव्-आय्-आव् इत्येतेषां यवयोर्लोपः विकल्पेन भवति। यथा– हरे एहि = हर एहि, हरयेहि। सूत्रसंख्यासंक्षिप्तकरणं सर्वथा सुखकरं शुभजनकं च न। सन्धेरालोचनायामस्याम् "अयं य्वोर्लुव्वा" इत्यनेन लोपविधानात् परं पुनः सन्धिः स्यान्न वेति विषयकं सूत्रं नास्ति। अतः असिद्धत्वमस्मिन् व्याकरणे सर्वथा अनुसृतं नाभवदिति वक्तुं शक्यते।

अष्टाध्यायी भागद्वयविशिष्टा– सपादसप्ताध्यायी त्रिपादी चेति वक्तुं शक्यते। "पूर्वत्रासिद्धमि"ति सूत्रेण एव विभागोऽयं सम्भवतीति शम्।

---

[६]देवशर्मा (चक्रवर्ती)– २८६

[७]वोपदेवः– ५

[८]तदेव– ११

# कर्मस्वरूपम्

जयदेवदिण्डा*

## ०. उपोद्घातः

वेदानां रक्षकत्वात्, वेदार्थावबोधने सहायकत्वात्, प्रकृतिप्रत्ययोपदेशपुरस्सरं पदस्वरूपप्रतिष्ठापकत्वात्, अर्थनिर्णयसाधनेषु अन्यतमत्वाच्च व्याकरणं नाम वेदाङ्गं नितान्तमेव महनीयं श्रेष्ठञ्च। न केवलं षड्सु वेदाङ्गेष्वन्यतममपि तु वेदपुरुषस्य मुखत्वेनापि विश्रुतम्। उक्तं हि–

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।[१] इति।

अतः परं व्याकरणं तुभ्यं वेदमुखाभिधं कथयिष्ये।[२] इति।

व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्ययादयो यत्र येन वा तद्व्याकरणम्। वर्णोच्चारणप्रक्रियादिनिरूपकं शब्दानां प्रकृतिप्रत्ययनिरूपणद्वारा साधुशब्दनिगमन-शास्त्रभूतं शाब्दबोधविधिविज्ञानं च व्याकरणम्। व्याकरणं नाम लौकिकानां वैदिकानाञ्च शब्दानां समान्यतया भाषायाश्चानुशासनम्। संस्कृतवाङ्मये शब्द-साधुत्वविषये व्याकरणस्य प्राधान्यं सुविदितमस्ति। तथा हि वाक्यपदीयकारो भर्तृहरिः स्वकीये ग्रन्थे व्याकरणस्य स्मृतित्वमङ्गीचकार। कथितवांश्च 'शब्दसाधुत्वविषया सैषा व्याकरणस्मृतिः' इति। शब्दसाधुत्वप्रतिपादकेऽस्मिन् व्याकरणशास्त्रे कारकस्य माहात्म्यमनस्वीकार्यम्। अधः प्रबन्धेऽस्मिन् किं नाम कारकं किञ्च कर्मकारकस्वरूपम् इति समासेन प्रस्तूयते।

## १. प्राचीननये कारकार्थविचारः

कृधातोः कर्तरि ण्वुल्प्रत्यये कारकम् इति निष्पन्नम्। आदौ तावज्जिज्ञासा उत्पद्यते यत् कारकस्य अभिधा का। कारकस्याभिधाविषये सन्ति वैयाकरणानां बह्वः विप्रतिपत्तयः।

कलापव्याकरणे 'क्रियानिमित्तत्वं कारकत्वम्' इति दुर्गसिंहः। लक्षणेऽस्मिन् अतिव्याप्तिरव्याप्तिश्च दोषद्वयमापतति इति लक्षणमिदं त्यक्तव्यम्। 'चैत्रस्य तण्डुलं पचति' इत्यादौ चैत्रस्य पचनक्रियायां निमित्तत्वेन सम्बन्धस्यापि कारकत्वापत्तिः।

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य

[१]पाणिनीयशिक्षा– ४२।

[२]नारदीयपुराणम्– ५१।१५८।

अव्याप्तिः यथा निमित्तस्य कार्यात्पूर्ववर्तित्वं तत्कारणत्वे आवश्यकत्वात्, 'घटं करोति' इत्यादौ घटस्य निर्वर्त्यकर्मत्वात्, क्रिययैव घटस्य निर्माणसम्भवात् पूर्ववर्तित्वम् असम्भवमिति।

काशिकाकृन्मते– "कारकशब्दश्च निमित्तपर्यायः। कारकं हेतुरित्यर्थान्तरम्। कस्य हेतुः? क्रियायाः" इति। एतन्मतञ्च अतिव्याप्तिदोषदुष्टम्। कारकस्य क्रियाप्रेरकनिमित्तत्वे हि 'चैत्रस्य तण्डुलं पचति' इत्यादौ चैत्रस्यापि भावान्तरस्य कारकत्वं स्यात्। यथा हि सम्प्रदाने दानानुमतिप्रकाशनद्वारा दातरि सम्प्रदानं भवति तथैव सम्बन्धिनो हि चैत्रस्यापि क्रियानिमित्तत्वं तु भवत्येव। षष्ठ्यर्थो हि नामार्थेनान्वेति न तु क्रियया। तत्र क्रियान्वयाभावान्न षष्ठ्यर्थस्योपपदविभक्तेश्च कारकत्वं सिध्यति।

'क्रियान्वयित्वं कारकत्वम्' इति भट्टोजिदीक्षितः। अन्वयश्च विभक्त्यर्थमभ्यन्तरीकृत्य बोध्यः। तेन 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इत्यादौ ब्राह्मणस्य न कारकत्वं, पुत्रेणान्यथासिद्धा क्रियोत्पादकत्वाभावात्।

## २. नागेशमते कारकार्थविचारः

नागेशमते तु 'क्रियान्वयित्वं कारकत्वम्' इति दीक्षितमतं न साधु। एतत्स्वीकारे 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इत्यादौ ब्राह्मणस्यापि कारकत्वापत्तिः, तस्य क्रियान्वयित्वात्। तन्मते तु "क्रियाजनकत्वं कारकत्वम्। भाष्ये 'करोति क्रियां निवर्त्तयति' इति व्युत्पत्तिदर्शनात्"[३] इति। अर्थात् क्रियानिष्ठजन्यतानिरूपितजनकतावत्त्वं कारकत्वम् इति। "कर्तृकर्मादिव्यपदेशान् करोति इति कारकम्" इति व्युत्पत्तिदर्शनात् कारकशब्दः क्रियापरः, जनकमित्यध्याह्रियते, सप्तम्यर्थो निरूपितत्वं, तस्य जनकशब्दार्थैकदेशजनकतायामन्वयः। एतेनापि 'क्रियाजनकत्वं कारकत्वम्' इति प्रसिध्यति। क्रियाजनकत्वस्य च जन्यजनकभावघटितक्रियाकारकभावसम्बन्धेन क्रियान्वयित्वमित्यर्थः। सर्वेषां च कारकाणां स्वस्वान्तरक्रियाद्वारा प्रधानक्रिया-निष्पादकत्वम्। किञ्च परमलघुमञ्जूषायाम्– 'क्रियानिष्पादकत्वं कारकत्वम्' इति। अर्थात् क्रियोत्पादकरूपार्थयुक्तत्वं कारकत्वम्। 'कारके' [१।४।२३] इति सूत्रभाष्येऽप्युक्तम्– "कारक इति महतीयं संज्ञा क्रियते, संज्ञा च नाम यतो न लघीयः। कुत एतत्? लघ्वर्थं हि संज्ञाकरणं, तत्र महत्याः संज्ञायाः करणे

[३] लघुशब्देन्दुशेखरः, पृ०– ६८३।

एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायते, करोतीति कारकम्'' इति।[४] कारकानि हि स्वस्वव्यापारेण अवान्तरक्रियाद्वारेण वा केनापि रूपेण प्रधानक्रियोत्पत्तौ सहायकानि वा भवन्ति। अतः सर्वेषामेव कारकाणां प्रधानक्रियायामन्वयः। भर्तृहरिणा अप्युक्तम्–

निष्पत्तिमात्रे कर्तृत्वं सर्वत्रास्ति कारके।
व्यापारभेदापेक्षायां करणत्वातिसम्भवः॥ [वाक्यपदीयम्– ३।७।१८]

## ३. कारकभेदः

क्रियया नामार्थस्य सम्बन्धः कारकम्। वाक्ये क्रियया नामार्थस्य सम्बन्धः व्याकरणशास्त्रे कारकमित्युच्यते। नामार्थस्य क्रियया सह सम्बन्धोऽयं प्रधानतया साक्षात् भवति, किन्तु कदाचित् उपकारः सामर्थ्याधारेण परम्परयापि भवितुमर्हति। द्विविधाभ्यां सम्बन्धाभ्यां नामार्थः क्रियायाः सिद्धौ सहायको भवति। एवं क्रियया सम्बन्धं नामार्थं स्वस्याश्रयं भावयित्वा कारकत्त्वं वर्तमानं भवति। क्रिया साध्या, कारकञ्च साधनम्। तच्च कारकं षड्विधम्। कारकाणि कानि इत्यत्र नागेशेन प्रोक्तम्–

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानाधिकरणमित्याहुः कारकाणि षट्॥[५] इति।

कर्ता, कर्म, करणं, सम्प्रदानम्, अपादनम्, अधिकरणम् इति कारकाणि षट्। भर्तृहरिणा साधनसमुद्देशे कर्तृकर्मकरणसम्प्रदानापादानाधिकरणरूपव्यपदेशभेदेन षट् कारकशक्तयः पुनश्च सम्बन्धविशेषस्तु 'षष्ठी शेषे' [पाणिनिसूत्रम्– १।४।२३] इति सप्त साधनशक्तयः प्रतिपादिताः–

सामान्यं कारकं तस्य सप्ताद्या भेदयोनयः।
षट् कर्माख्यादिभेदेन शेषभेदस्तु सप्तमी॥ [वाक्यपदीयम्– ३।७।४४]

## ४. कर्मलक्षणम्

एतेषु कर्मकारकं फलाश्रयत्वेन क्रियायाम् अन्वेति। यथा हि कौण्डभट्टेन प्रोक्तम्– "आश्रये त्विति– फलाश्रये, व्यापाराश्रये चेत्यर्थः। फलाश्रयः कर्म, व्यापाराश्रयः कर्ता"[६] इति। कर्मकारके च 'कर्मणि द्वितीया' [पाणिनिसूत्रम्– २।३।२] इत्यनेन द्वितीयाविभक्तिः भवति। आश्रयत्वं द्वितीयार्थः।

---

[४]महाभाष्यम्– १।४।२३

[५]परमलघुमञ्जूषा, पृ० २५२

[६]वैयाकरणभूषणसारः, पृ० १८।

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः॥ [भूषणकारिका– २४]

कर्मत्वं च– "प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेन-उद्देश्यत्वम्"[७] इति। प्रकृतधात्वर्थप्रधानीभूतो यो व्यापारः तत्प्रयोज्यं यत् प्रकृतधात्वर्थफलं तत्फलाश्रयत्वेनोद्देश्यत्वं कर्मत्वम्। यथा 'हरिं भजति' इत्यादौ प्रकृतधातुः भज्-धातुः, तदर्थप्रधानीभूतव्यापारः भजनानुकूलव्यापारः तत्प्रयोज्यं धात्वर्थफलं, प्रीतिरूपं फलं तदाश्रयत्वेनोद्देश्यत्वं हरेरिति भवति तस्य कर्मसंज्ञा। तच्च 'कर्तुरीप्सिततमं कर्म' [१।४।४९] इत्यनेन सूत्रेण विधीयते। सूत्रेऽस्मिन् ईप्सितशब्दः क्रियापरो नाभिप्रेतपरः रूढः, कर्तुरिति 'क्तस्य च वर्तमाने' [२।३।६७] इति कर्तरि षष्ठी। सन्नन्ताद् आप् धातोः 'मतिबुद्धिपूजार्थेभ्यश्च' [३।२।८८] इति वर्तमाने कर्मणि क्तप्रत्ययः। मतिर्नाम इच्छा। एवञ्च कर्त्रा आप्तुमिष्यमाणं कर्मेत्यर्थः। आप्तिश्चात्र सम्बन्धः, स च कर्तृद्वारकविशेषीभूतव्यापारद्वारक एव, उपस्थितपरित्यागेन अनुपस्थितकल्पने मानाभावात्। फलस्य व्यपदेशिवद्भावेन फलसम्बन्धित्वात् कर्मत्वम्। अत एव तत्समानाधिकरणे 'स्तोकं पचति' इत्यादौ कर्मत्वसिद्धिः। 'कर्तुरीप्सिततमं कर्म' [१।४।४९] इत्यस्मिन् सूत्रे ईप्सिततमत्वञ्च "प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्" इति। व्यापारस्य फले स्वप्रयोज्यत्वं स्ववाचकधातुवाच्यत्वमुभयसम्बन्धेनान्वयः।

## ४.१. प्रयोज्यत्वनिवेशफलम्

लक्षणमस्तु "प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यप्रकृतधात्वर्थफलाश्रयत्वेन-उद्देश्यत्वम्" इति। जन्यत्वनिवेशेनैव 'ग्रामं गच्छति' इत्यादौ संयोगरूप-फलाश्रयत्वाद् ग्रामस्य कर्मत्वसिद्धेः किमर्थः प्रकृतलक्षणे प्रयोज्यत्वनिवेशः। शङ्कानिरासनाय उच्यते 'गां दोग्धि पयः' इत्यादौ पयसः कर्मत्वसिद्धये कर्मलक्षणे प्रयोज्यत्वनिवेशः। प्रयोज्यत्वनिवेशात् 'गां पयो दोग्धि' इत्यादौ विभागानुकूलव्यापारानुकूलव्यापारार्थकदुहियोगे पयसः कर्मत्वसिद्धिः। प्रायस्तु धात्वर्थरूपव्यापारात् फलस्य साक्षादेवोत्पत्तिः, परन्तु कदाचित् तत्परम्परयापि उत्पत्तिः दृश्यते। 'गां दोग्धि पयः' इत्यादौ धात्वर्थभूतव्यापाररूपगोपात्त प्रत्यक्षतः विभागरूपफलोत्पत्तिः अपि तु गोव्यापारेण गवि व्यापारोत्पत्तिः

[७] परमलघुमञ्जूषा, पृ० २६०।

गोव्यापारादेव पयसो विभागरूपफलोत्पत्तिरिति न ह्यत्र धात्वर्थव्यापारस्य फलजनकत्वमपि तु प्रयोजकत्वम्। जन्यत्वं नाम साक्षादुत्पाद्यत्वं, प्रयोज्यत्वं च परम्परया साक्षाद्वा साध्यत्वम्। एवञ्च विभागरूपफलस्य गोपनिष्ठधात्वर्थप्रधानीभूतव्यापारजन्यत्वाभावात् पयसः कर्मत्वं न स्यात् तस्मात्साक्षात् परम्परासाधारणं वा प्रयोज्यत्वं निवेशनीयम्। अतः पयसः कर्मत्वसिद्धये प्रयोज्यत्वनिवेशः, जन्यत्वनिवेशे तन्न स्यात्।

## ४.२. प्रकृतधात्वर्थफलनिवेशफलम्

"प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यधात्वर्थफलाश्रयत्वेनोद्देश्यत्वं कर्मत्वम्" इत्यनेन एव 'ग्रामं गच्छति' इत्यादौ ग्रामस्य प्रकृतधात्वर्थप्रधानीभूत-व्यापारप्रयोज्योत्तरदेशसंयोगरूपफलाश्रयत्वेनोद्देश्यत्वात् कर्मत्वसिद्धेः प्रकृते प्रकृत-धात्वर्थफलम् इति किमर्थं चेदुच्यते– "प्रयागात्काशीं गच्छति इत्यादौ प्रयागस्य कर्मत्ववारणाय प्रकृतधात्वर्थफलम्"[८] इति। अत्र हि प्रकृतधात्वर्थः तावत् उत्तरदेशसंयोगः न तु विभागः। तस्मात् विभागरूपफलाश्रयस्य प्रयागस्य प्रकृतधात्वर्थफलाश्रयत्वाभावात् न कर्मत्वं परन्तु उत्तरदेशसंयोगस्य प्रकृतधात्वर्थत्वात् तत्फलाश्रयत्वाच्च काशीमित्यस्य कर्मत्वम्। प्रयागस्य अनुयोगिविशिष्टसम्बन्धस्य फलतावच्छेदकसम्बन्धेन फलाश्रयत्वेनोद्देश्यत्वाभावात् न कर्मत्वम्।

## ४.३. उद्देश्यत्वनिवेशफलम्

पुनरत्र शङ्कोत्पद्यते यत् लक्षणेऽस्मिन् प्रकृतधात्वर्थत्वग्रहणेनैव 'प्रयागात्काशीं गच्छति' इत्यादौ प्रयागे विभागस्य प्रकृतधात्वर्थफलाश्रयत्वाभावात् कर्मत्वनिवृत्तिसम्भवे उद्देश्यत्वनिवेशः किमर्थः। अर्थात् 'कतुरीप्सितं कर्म' इत्येव सूत्रमस्तु। प्रकृतधात्वर्थफलाश्रयत्वपर्यन्तमेव लक्षणं विधेयं, सूत्रे तमब्ग्रहणञ्च मास्तु इत्याशयः।

उच्यते उद्देश्यत्वग्रहणाभावे 'काशीं गच्छन् पथि मृतः' इत्यादौ गम्धात्वर्थभूतसंयोगरूपफलाश्रयत्वाभावात् काश्याः कर्मत्वं न स्यात्। उद्देश्यत्वनिवेशे च नायं दोषः। काश्याः संयोगरूपफलाश्रयत्वाभावेऽपि फलाश्रयत्वेवोद्देश्यत्वात् कर्मत्वम् इति परिभाषायामुद्देश्यत्वपदं प्रयोजनमूलकम्।

---

[८]परमलघुमञ्जूषा पृ– २३५।

तच्च नागेशेन– "प्रकृतधात्वर्थत्वग्रहणेनैवात्र वारणादुद्देश्यत्वनिवेश किमर्थमिति चेन्न। तस्यासाधारणं प्रयोजनं 'काशीं गच्छन् पथि मृतः' इति काश्याः फलाश्रयत्वाभावेऽपि फलाश्रयत्वेनोद्देश्यत्वसत्त्वात् कर्मत्वम्"[९] इति।

ननु काशीं गच्छति चैत्रे 'चैत्रः काशीं गच्छति न प्रयागम्' इत्यादौ प्रयागस्य धात्वर्थभूतसंयोगरूपफलाश्रयत्वेन उद्देश्यत्वविरहान्न कर्मत्वम्। अत्रोच्यते 'कर्तुरीप्सिततमं कर्म' [पाणिनिसूत्रम्– १।४।४९] इत्यत्र कर्मलक्षणे ईप्सिततमपदस्य स्वार्थविशिष्टयोग्यताविशेषे लक्षणा स्वीकर्तव्या। तेन "प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यता-विशेषशालित्वं कर्मत्वम्"[१०] इति लक्षणे प्रयागस्यापि उद्देश्यत्वविशेष-योग्यताशालित्वात् किञ्चित् कारणवशात् तत्रागमनेऽपि कर्मत्वसिद्धिः।

किञ्च उद्देश्यत्वस्य उद्देश्यत्वयोग्यताविशेषशालित्वव्याख्यानेन कार्यान्तरं कुर्वति चैत्रे 'किं ग्रामं गच्छति अथवा ओदनं पचति' इति प्रश्ने 'न ग्रामं गच्छति न ओदनं पचति' इत्यादावपि ग्रामे ओदने च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यता-विशेषसत्त्वात् अनयोः कर्मत्वं, किञ्च एतादृशप्रयोगाणां साधुत्वम्।

ननु विषस्यानुद्देश्यत्वेन ईप्सिततमत्वाभावात् विषं भुङ्क्ते इत्यादौ विषस्य कथं कर्मत्वम् इति चेन्न, ताडनादिना पराधीनतया विषभोजनादिकं तत्र विषस्य प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वात् कर्मत्वं सूग्रहमेव। भक्षिते विषे सद्यः पीडाकरात् ताडनादितः मुक्तिर्भविष्यतीति तत्राप्युद्देश्यत्वमक्षतमेवेति विषस्य कर्मत्वम्। अत एव "आतश्च विषमीप्सितं तद् भक्षयति ताडनात्"[११] इति सङ्गच्छते।

## ४.४. विशेषपदनिवेशफलम्

"प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्व-योग्यताशालित्वम्" इत्येव कर्मलक्षणमस्तु किमर्थं कर्मलक्षणे विशेषपदोपादानम्। कालत्रये काशीगमनशून्ये चैत्रे 'काशीं गच्छति चैत्रः' इति वारणाय विशेषपदोपादनम्। अर्थात् कदापि काशीगमनरहिते चैत्रे, काश्याः

[९]परमलघुमञ्जूषा पृ० २६२।

[१०]तत्रैव,पृ० २६२।

[११]महाभाष्यम्– १।४।४०।

कर्मत्ववारणाय प्रकृते विशेषपदोपादानम्। विशेषस्तु कर्तुर्व्यापारकाले फलाश्रयतारूपेणाभीष्टे वर्तते यो हि तटस्थस्यैव विषयो नान्यस्य। उक्तवाक्ये च प्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यतासत्त्वात् कर्मत्वं प्राप्नोति किन्तु तत्र योग्यताविशेषत्वाभावान्न कर्मत्वमिति। 'काशीं न गच्छति' इत्यत्र योग्यतासत्त्वेऽपि निषेधस्य अनुभवसिद्धत्वात् इदमुपपन्नमेव।

कैश्चित्तु अत्र विशेषपदस्य प्रयोजनं न मन्यते। कारणं हि काशीगमनशून्ये न हि 'काशीं गच्छति' इति प्रयोगः। पक्षेऽस्मिन् तु 'काशीं न गच्छति' इत्यनेन एव सिद्धेः 'काशीं गच्छति' इत्याद्यनुपपन्नमेव।

## ५. अनीप्सितकर्मविचारः

'ग्रामं गच्छन् तृणं स्पृशति', 'अन्नं भक्षयन् विषं भुङ्क्ते' इत्यादौ विषतृणयोः उद्देश्यत्वाभावात् प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थ-फलाश्रयत्वेनोद्देश्यत्वयोग्यताविशेषशालित्वाभावात् कथं कर्मत्वम्। कृतं चात्र लक्षणान्तरम् 'तथायुक्तं चानीप्सितम्' [१।४।५०] इति। उक्तं च भट्टोजिदीक्षितेन– "ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्"[१२] इति। अनीप्सितकर्मत्वञ्च "प्रकृतधात्वर्थप्रधानीभूतव्यापार-प्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वम्"[१३] इति। तथायुक्तत्वञ्च "समभिव्याहृतधात्वर्थ-प्रधानव्यापारप्रयोज्यतत्तद्धात्वर्थफलाश्रयत्वरूपम्" इति। विषमित्यत्र तु प्रकृतधात्वर्थगलःविलाधसंयोगरूपफलाश्रयत्वात् कर्मत्वं किञ्च तृणमित्यत्र प्रकृतधात्वर्थस्पर्शनरूपफलाश्रयत्वात् कर्मत्वं निर्बाधम्।

## ५.१. प्रकृतधात्वर्थनिवेशफलम्

अनीप्सितकर्मस्वरूपपरिशीलनकाले शङ्का उदेति किमर्थं लक्षणे प्रकृत-धात्वर्थपदमुपात्तम्। अत्र प्रकृतधात्वर्थग्रहणाभावे प्रयागात् 'काशीं गच्छति' इत्यत्र विभागरूपफलाश्रयत्वात् प्रयागस्य कर्मत्वापत्तिः। तन्निराकरणाय प्रकृतधात्वर्थ इति पदमुपात्तम्। उपादाने च प्रयागस्य प्रकृतधात्वर्थसंयोगरूपफलाश्रयत्वाभावात् न कर्मत्वापत्तिः, विभागाश्रयत्वात् अवधित्वाच्चापादनत्वमेव। "अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति अपादानसमभिव्याहारे विभागोऽपि

---

[१२]सिद्धान्तकौमुदी, सूत्रम्– ५३८।

[१३]परमलघुमञ्जूषा, पृ० २६५।

धात्वर्थः इति बोध्यम्"[१४] इति शेखरोक्तिदिशा तु विभागस्य फलत्वेऽपि फलतावच्छेदकसम्बन्धेन तदाश्रयत्वाभावान्न प्रयागस्य कर्मत्वम्। इदं लक्षणं द्वेष्योदासीनकर्मसंग्रहार्थम्। द्वेष्यकर्मणः उदारहणं तावत् 'चोरान् पश्यति' इति। विषयेन्द्रियसम्बन्धात् दृश्यमानापि न दर्शनोद्देश्या, अपि तु अनिष्टदर्शनैव। उदासीनकर्मणः उदारहणं तावत् 'गङ्गां स्पृशन् तृणं स्पृशति' इति। अत्र दृश्यमानस्य गङ्गादेः स्पर्शादिजन्यसंयोगादिफलाश्रयत्वं यथा तथैव तृणादेरपि प्रकृतस्पर्शादिधात्वर्थभूतसंयोगरूपफलाश्रयत्वात् कर्मत्वम्।

## ६. द्विकर्मकविचारः

दुहादीनां द्विकर्मकधातुनां कर्मसंज्ञाविधायकं सूत्रम् 'अकथितञ्च' [१।४।५१] इति। द्विकर्मकधातवश्च–

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।

कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥[१५] इति।

व्यापारद्वयार्थकत्वपक्षे तु सूत्रमिदं निरर्थकम्। 'गां पयो दोग्धि' इत्यादौ गौः पयस्त्यजति, देवदत्तो गवा पयस्त्याजयतीत्याद्यर्थस्यापि प्रतीत्या पयोनिष्ठविभागानुकूलगोनिष्ठव्यापारानुकूलव्यापारादिर्दुहादिधात्वर्थः। अस्मिन् पक्षे फलद्वयोपादानात् 'कर्तुरीप्सिततमं कर्म' [१।४।४९] इत्यनेनैव गोः पयसश्च कर्मत्वं सिद्धम्। "गां दोग्धि इत्यादौ गौः पयस्त्याजयति इतियाद्यर्थप्रतीत्या कर्तुरीप्सिततमम् इत्येव कर्मत्वं सिद्धम्"[१६] इति लघुशब्देन्दुशेखरः। परन्तु एकव्यापारपक्षे यदा गोनिष्ठव्यापारादेः प्रतीत्यभावेऽपि दुहादेः प्रयोगो दृश्यते तदा पयोनिष्ठविभागानुकूलव्यापारादिरेव दुहधात्वर्थः। अस्मिन् पक्षे अपादानत्वाद्यविवक्षायां शेषत्वेन या सम्बन्धार्थे गोपदे 'षष्ठी शेषे' [१।४।२३।] इत्यनेन षष्ठीं प्राप्नोति तस्य बाधनाय 'अकथितञ्च' [१।४।५१।] इति सूत्रमाश्यकमेव। एकव्यापारपक्षे तु सम्बन्धषष्ठीबाधनार्थम्। तत्पक्षे कर्मसम्बन्धित्वे सति अपादानादिविशेषाविवक्षिततत्वमकथितकर्मत्वमिति तृतीयलक्षणेन 'गां पयो दोग्धि' इत्यादौ गामित्यस्य कर्मत्वसिद्धिः।

[१४]परमलघुमञ्जूषा, पृ० २३४।

[१५]सिद्धान्तकौमुदी, सूत्रम्– ५३९।

[१६]लघुशब्देन्दुशेखरः, पृ० ९४।

अन्तःस्थितद्रवद्द्रव्यविभागानुकूलव्यापारो दुहेरर्थः। अत्र गोरपादानत्वाविवक्षायाम् 'अकथितञ्च' [१।४।५१] इत्यनेन कर्मत्वं, तद्विवक्षायां तु पञ्चम्येव। एतल्लक्षणस्वीकारेणैव गामित्यस्य कर्मत्वसिद्धिरन्यथा न स्यात्।

## ७. सकर्मकत्वाकर्मकत्वविचारः

कर्मसम्बन्धमभिलक्ष्य धातवः द्विधा विभक्ताः, सकर्मकधातवः अकर्मकधातवश्चेति। किं तावत् धातोः सकर्मकत्वं चेदुच्यते नागेशेन– "सकर्मकत्वञ्च फलव्यधिकरणव्यापारवाचकत्वम्"[१७] इति। अर्थात् फलाधिकरण-भिन्नाश्रयव्यापारबोधकत्वं सकर्मकत्वम्। यदुच्यते भूषणकारिकायां दीक्षितेन 'फलव्यापारयोर्धातु आश्रये तु तिङस्मृतः'[१८] इति तु प्रायोवादः। न हि सर्वे धातवो व्यापारेण सह फलस्यापि वाचकाः। तेन एवोक्तं धात्वर्थे व्यापारस्य प्राधान्यत्वम्। व्यापारो हि क्रिया। तस्य वाचकत्वे एव धातोः सकर्मकत्वम्। फलं तु धातोः द्वितीयोऽर्थः न हि फलस्य वाचकत्वमेव धातोः सकर्मकत्वम्। सकर्मकत्वम् इति तु फलव्यधिकरणव्यापारवाचकत्वे सत्येव धातोः। एवं फलव्यापारयोः अधिकरणभेदे भिन्नभिन्नाधिकरणवृत्तितायां सत्यां धातुः सकर्मको भवति, फलव्यधिकरणव्यापारबोधकत्वं सकर्मकत्वमिति फलितार्थः। यथा 'देवदत्तः पचति' इत्यत्र फलं विक्लित्तिः सा तण्डुलेषु विद्यते, व्यापारस्तदनुकूलः स च देवदत्ते। अत्र फलव्यापारयोः भिन्नाधिकरणत्वात् 'डुपचष् पाके' इति धातुः सकर्मकः। वस्तुतस्तु शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम्।

किं तावद् धातोः अकर्मकत्वं चेदुच्यते नागेशेन– "फलसमानाधिकरण-व्यापारवाचकत्वम् अकर्मकत्वं व्यापारमात्रवाचकत्वं वा अकर्मकत्वम्"[१९] इति। अर्थात् फलाधिकरणाभिन्नाधिकरणव्यापारबोधकत्वम् अकर्मकत्वम् इति यावत्। 'अद्य देवदत्तो भवति' इत्यत्र उत्पद्यते इत्यर्थे विद्यमानस्य भूधातोः अकर्मकत्वम्। भूधातुः उत्पत्तिरूपफलबहिर्निस्सरणरूपव्यापारयोः वाचकः किन्तु तयोरुभयोः देवदत्तनिष्ठत्वेन धातोरकर्मकत्वम्। तथा हि अभियुक्तवचनम्–

> फलव्यापारयोरेकनिष्ठतायामकर्मकः।
> धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः॥ इति। [भूषणकारिका– १३।]

---

[१७] परमलघुमञ्जूषा, पृ० २७०।

[१८] भूषणसारकारिका– २।

[१९] परमलघुमञ्जूषा, पृ० २७०।

फलस्य गतिनिवृत्त्यादिरूपस्य, व्यापरस्य गतिनिवृत्त्यनुकूलव्यापारादिरूपस्य च एकनिष्ठायाम् एकाधिकरणवृत्तितायां सत्यां धातुरकर्मको भवतीत्यर्थः। यथा– 'ष्ठा गतिनिवृत्तौ' अत्र फलं गतिनिवृत्तिः व्यापारस्तदनुकूल इति फलं व्यापारश्चोभयं 'देवदत्तः तिष्ठती'त्यत्र देवदत्तरूपैकाधिकरणे वर्तते। अतः 'स्था'धातुरकर्मकः। वस्तुतस्तु अकर्मकत्वञ्च शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थानन्वय्यर्थकत्वम्।

अर्थभेदेन उपसर्गसमभिव्याहारेण च सकर्मकत्वम् अकर्मकत्वं वा भवितुमर्हति। 'जि जये' इति धातुः सर्वोत्कर्षस्थित्यर्थे अकर्मकः– 'देवदत्तः जयति' इति। स एव पराभवार्थे सकर्मकः– 'रामः रावणं जयति' इति। 'भू सत्तायाम्' इति धातुरकर्मकोऽपि सुखमनुभवतीत्यादिषु उपसर्गसमभिव्याहारात् सकर्मकः। अत एव धातुपाठेषु प्रदर्शितेऽर्थे तस्य धातोः कर्मान्वययोग्यतायां सकर्मकत्वनिर्देशः। अन्यथा अकर्मकत्वम्।

अर्थान्तरे हि वर्तमानस्य अकर्मकस्यापि धातोः सकर्मकत्वं सिद्ध्यति। किञ्च कालाध्वभावदेशापेक्षया सर्वे धातवः सकर्मकाः भवन्ति। यथा– मासस्मास्ते, गोदहमास्ते, मासमास्ते इत्यादयः। अर्थान्तरे वर्तमानाद्धातोः सकर्मकस्यापि अकर्मकत्वं सिद्ध्यति। यथा भारं वहति उद्यच्छदीत्यर्थः, नदी वहति स्त्रवतीत्यर्थः। कर्मणो धात्वर्थान्तःप्रवेशादकर्मकत्वम्। यथा– 'जीव प्राणधारणे' जीवति इत्यत्र। अत्र प्राणाख्यं कर्म धात्वर्थेनैव क्रोडीकृतम्। कर्मणः प्रसिद्धत्वात् धातोः अकर्मकत्वं सिद्ध्यति। यथा– 'वृषू सोचने' इति धातुः। कर्मणोऽविवक्षातोऽपि धातोरकर्मकत्वं सिद्ध्यति। यथा– नेह पच्यते, नेह भुज्यते इत्यादयः। कर्मणोऽविवक्षा चौदासीन्यनिवृत्तिमात्रपरतया प्रयोगात्। यदाह भर्तृहरिः–

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥[२०] इति।

धातूनां सकर्मकत्वाकर्मकत्वविषये यदाह वाचस्पत्यम्– 'सर्वेऽपि धातवः सकर्मकाकर्मकभेदेन द्विविधाः'[२१] इति।

## ७.१. सकर्मकत्वम्

सकर्मकधातवः एककर्मकद्विकर्मकभेदेन द्विधा विभक्ताः। यथा च वाचस्पत्ये– सकर्मकाश्च द्विविधाः एककर्मका द्विकर्मकाश्च। एककर्मान्वित-

[२०]वाक्यपदीयम्– ३।७।८८।
[२१]वाचस्पत्यं, पृ० ३८६९।

स्वार्थबोधकाः गम्यादयः एककर्मकाः। द्विकर्मका अपि द्विविधाः द्विकर्मान्वितैक-व्यापारर्थकाः द्विकर्मान्वितद्विव्यापारार्थकाश्च। तत्राद्या दुह्यादयः। न च ते सिद्धान्ते द्विव्यापारार्थकाः। तथात्वे ईप्सिततमाभ्यामेव कर्मभ्यां व्यापारद्वयेऽन्वयसम्भवेन द्वितीयाद्युत्पत्तौ 'अकथितञ्चेति' सूत्रेण दुह्यादीनां कारकान्तरसंज्ञानापन्नस्याकथितस्य कर्मसंज्ञाविधानानौचित्यात्। दर्शयिष्यते च दुह्यादीनामेकव्यापारार्थकता। यदा पुनस्तेषां द्विव्यापारार्थकता विवक्षिता तदा ईप्सिततमसूत्रेणैव कर्मसंज्ञायां जातायां द्विकर्मान्वितद्विव्यापारार्थका एव ते णिजन्तादिवदिति बोध्यम्। द्विकर्मान्वितद्विव्यापारार्थकाश्च णिजन्ताः तत्र च धातुना एकव्यापारोऽभिधीयते। द्वितीयस्तु णिचा, तद्यापारद्वये च ईप्सितकर्मणः प्रयोज्यकर्तृरूपकर्मणश्च यथाक्रममन्वयः। तथात्वञ्च गम्यादीनामिति बोध्यम्। पाच्यादीनां तु नैवं, तद्योगे प्रयोज्यकर्त्तुः कर्मसंज्ञाभावेन व्यापारद्वये कर्मद्वयान्वयाभावात्। न वा पाच्यादेः क्रियाफलाश्रयत्वेनोद्देश्यतया प्रयोज्यकर्त्तुः कर्मसंज्ञा भवितुमर्हति गन्तादिधातुयोगे एव तन्नियमात्। उक्तञ्च हरिकारिकायां "सुखक्रियायां स्वातन्त्र्यं प्रधाने कर्मतां गतम्। नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते" इति नियमात् गतिबुद्ध्यादिसूत्रेण तदितरेषां निषेधात् स्वातन्त्र्यं कर्तृत्वमेव स्वधर्मेण तृतीययाऽभिधीयते इति तदर्थः। वस्तुस्तु प्रयोज्यकर्त्तुरीप्सिततमत्वेऽपि परत्वात् कर्तृसंज्ञया तस्य बाधात् कर्मत्वाप्रसक्तौ गत्यादिसूत्रेण अप्राप्तप्रापकतारूपविधित्वाश्रयेण गम्यादेः कर्मत्वं विहितं न पच्यादेरिति द्रष्टव्यम्। उक्तञ्च हरिणा "परत्वादन्तरङ्गत्वादुपजीव्यतथाऽपि च। प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितोचितेति"। परत्वात् "विप्रतिषेधे परं कार्यम्" इत्युक्तेः "अपादानसम्प्रदानकरणाधारकर्मणाम्। कर्त्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्त्तते" इति चोक्तेः "अन्तरङ्गत्वात् पच्यादिरूपप्रकृत्याकाङ्क्षितकर्तृसंज्ञारूपकार्यम् "अन्तरङ्गं बलीय" इति न्यायात् पाच्याद्याकाङ्क्षितकर्मसंज्ञायाः प्रत्ययाश्रितत्वेन दुर्बलत्वादिति भावः। उपजीव्यतया उपजीव्यजातीयतया सर्वेषामेव कारकाणां कर्तृप्रयोज्यत्वेन कर्तुरुपजीव्यजातीयत्वादिति फलितोऽर्थः तेन पाच्याद्यपेक्षया तस्योपजीव्यत्वाभावेऽपि न क्षतिः। एवं पाच्यादियोगे प्रयोज्यस्य कर्मसंज्ञाया एवाप्रवृत्तेः न द्विकर्मकत्वं तेषामिति।[२२]

[२२]वाचस्पत्यं, पृ० ३८६९।

## ७.२. अकर्मकत्वम्

अकर्मकत्वस्य विवरणं वाचस्पत्ये[२३]– अकर्मका अपि धातवः हेतुचतुष्टयाधीनाकर्मकक्रियार्थत्वात् चतुर्विधाः। अकर्मकक्रियात्वे हेतवश्च चत्वारः हरिणा प्रदर्शिता यथा "धातोर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति"। धातोः स्वबोधकधातोरर्थान्तरे स्वसजातीयभिन्ने वृत्तेः सामर्थ्यात् स्वविजातीयार्थबोधकत्वादित्येकः। यथा जानातिः ज्ञानं वदन् सकर्मकः प्रवृत्त्यादिकं बोधयन्नकर्मकः। न तु गतिवाची गम्यादिः ज्ञानाद्यर्थेऽप्यकर्मकः तयोर्द्वयोरप्यर्थयोः सकर्मकत्वेन स्वसजातीयत्वात्। धात्वर्थेनोपसंग्रहादिति द्वितीयः। कर्मणो धात्वर्थेन उपसंग्रहात् स्वशरीरे प्रवेशनात् यथा जीवत्यादीनां प्राणधारणानुकूलव्यापाररूपक्रियार्थतया तत्कर्मणः प्राणादेर्धात्वर्थे एव प्रवेशः। प्रसिद्धेः सत्तालज्जादिरूपाणामकर्मकत्वेन प्रसिद्धेः। सक्षादिकश्चानुपदं प्रदर्श्यते तेषां फलसमानाधिकरणव्यापारबोधकत्वादित्यर्थः। इति तृतीयो हेतुः। कर्मणोऽविवक्षातः अकर्मकः ४।

## ८. कर्मभेदाः

यद्यपि तत्त्वतः कर्म एकप्रकारं भवति, तथापि व्यावहारिकभेदस्य आधारेण इदं कर्म तु गौणमुख्यभेदेन सह सप्तधा। यथोक्तं हरिणा–

> निर्वर्त्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्।
> तच्चेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्॥
> ओदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।
> संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्॥ [वाक्यपदीयम्– ३।७।४५– ४६]

मुख्यरूपेण कर्म द्विविधं भवति– ईप्सितम् अनीप्सितं च। ईप्सितकर्म पुनः त्रिधा विभक्तम्– निर्वर्त्यविकार्यप्राप्यं चेति। अनीप्सितकर्म तु चतुर्विधम्– उदासीनद्वेष्यसंज्ञान्तरैरनाख्यातान्यपूर्वकञ्चेति। तत्र यदविद्यमानमनुत्पाद्यते विद्यमानं वा जन्मादिना प्रकाश्यते तन्निर्वत्यम्।[२४] यथा– 'कटं करोति', कटः सकृदेव क्रियते। यदभिनिर्वृत्तमेव प्रकृत्युच्छेदेन गुणान्तराधानेन वा

[२३]वाचस्पत्यं, पृ० ३८६९।

[२४]तत्र निवर्त्त्यं यदसदैवोत्पद्यते इति न्यासः, ३।२।१।

विकारमापद्यते तद्विकार्यम्।[२५] विकार्यं च कर्म द्वेधा व्यवस्थितम्।[२६] यथा प्रत्यक्षगम्यविकार्यकर्म, शास्त्रगम्यविकार्यकर्म। यदा विकार्यं प्रत्यक्षगम्यं भवति तदा तत्तु प्रत्यक्षगम्यविकार्यम्। पुनः हरिमतानुसारेण इदं तु द्विप्रकारकं भवति, प्रकृतिनाशोत्पन्नप्रत्यक्षगम्यविकार्यं, प्रकृतिगुणान्तरप्रत्यक्षगम्यविकार्यम्। उक्तं च कौण्डभट्टेन– "अत्र काष्ठसुवर्णयोः परिणामित्वविवक्षाविवक्षयोः अपि भस्मकुण्डलरूपकर्मणोर्निर्वर्त्त्यतैव। काष्ठसुवर्णयोः विकार्यत्वमित्यभिधेयम्" इति। प्रथमस्य उदारहणं भवति 'काष्ठानि भस्म करोती'ति। अत्र काष्ठानां भस्मकरणे प्रकृतेः नाम काष्ठानां भस्मोत्पन्ननाशरूपकार्यं तु प्रत्यक्षगम्यविकार्यम्। द्वितीयस्य उदारहणं तावत् 'सुवर्णं कुण्डलं करोती'ति। अत्र प्रकृतेः अर्थात् सुवर्णस्य कुण्डलरूपगुणान्तरप्राप्तिः खलु प्रकृतिगुणान्तरप्रत्यक्षगम्यविकार्यम्। पुनः विकार्यकर्मणः द्वितीयभेदः भवति शास्त्रगम्यविकार्यकर्म। यथा शास्त्रादेव विकार्यकर्म लभ्यते, तदा शास्त्रगम्यविकार्यकर्म भवति तत्। अस्य उदारहणं तावत् 'ब्रीहिन् प्रोक्षती'ति। अत्र प्रोक्षणेन ब्रीहिषु कश्चिदतिशयो जन्यत इति शास्त्रादेव गम्यते। प्राप्यं यत्र व्याप्तिव्यतिरेकेण क्रियाकृताः विशेषाः न विभाव्यन्ते।[२७] यथा– 'देवदत्तः घटं पश्यति', न हि दृशिक्रियया व्याप्यमानस्य घटस्य क्रियाकृतविशेष उपलभ्यते। औदासीन्यञ्च उदासीनत्वेऽपि तृणादीनां यत्र फलाश्रयत्वम्। यथा– 'ग्रामं गच्छन् तृणं स्पृशति' इत्यत्र ग्रामगमनसमये तृणस्पर्शनम् अनायासेन भवति। तस्मात् तृणस्य उदासीनत्वेऽपि स्पर्शादिजन्यसंयोगादिफलाधारत्वात् कर्मत्वम्। द्वेष्यञ्च कर्तुरनीप्सिरतत्वेऽपि यत्र कर्मत्वम्। यथा– 'ओदनं भुञ्जानो विषं भुङ्क्ते' इत्यत्र विषस्य द्वेष्यतया ईप्सिततमत्वाभावेऽपि 'ओदनं भुङ्क्ते' इत्यादौ भुज्यमानस्य ईप्सिततमस्य ओदनादेरिव क्रियाजन्यगलविवरप्रवेशात्मकफलाश्रयत्वात् कर्मत्वमिति। तथा च संज्ञान्तरैः अर्थात् अपादानादिसंज्ञाभिः अविवक्षितं कारकं कर्मसंज्ञं भवति तच्च संज्ञान्तरैरनाख्यातम्। अकथितकर्मणः क्रियान्वयित्वभावहेतोः कारकत्वव्यवहारः शास्त्रे दृश्यते। अत्र आदिपदेन अपादानेन सह सम्प्रदान-अधिकरण-कर्म-करण-कर्ता-हेतूनां च ग्रहणं भवति इति केचित्। पुनः इह आदिपदेन अपादानेन सह

---

[२५]यस्य तु सत एव कश्चिद्विकारः क्रियते तद्विकार्यम् इति पदमञ्जरी, ३।२।१।

[२६]स च विकारः क्वचित्प्रत्यक्षगम्यः, क्वचिच्छास्त्रगम्यः इति पदमञ्जरी, ३।२।१।

[२७]प्राप्यं नसत एवोत्पादनं क्रियते, नासि सत एव विकाराधानं, केवलं क्रियासम्बन्धमात्रं प्रतीयते इति न्यासः, ३।२।१।

सम्प्रदानाधिकरणयोः ग्रहणं भवति इति नागेशः।[२८] यथा– 'गां दोग्धि पयः' इत्यत्र गोः अपादानत्वाविवक्षया कर्मत्वविवक्षा। कर्मभिन्नकारकत्ववाचकादीनां उपसर्गादिभिः कर्मवाचकत्वम् अन्यपूर्वकं कर्म। यथा– 'हरिम् अभिक्रुध्यति' अत्र हरेः सम्प्रदानत्वेऽपि अभ्युपसर्गेण हरेः कर्मत्वम्।

## ९. उपसंहृतिः

प्रबन्धेऽस्मिन् आदौ कारकस्वरूपविषये प्राचीनमतानि उपन्यास्तानि। तेषु क्रियानिमित्तं कारकं, क्रियान्वयित्वं कारकत्वम् इति इति मतद्वयं दुष्टमिति प्रतिपादितम्। ततो महाभाष्यकैयटप्रामाण्यप्रदर्शनपुरःसरं नागेशप्रोक्तं क्रियाजनकत्वं कारकत्वम् इति प्रतिपादितम्। सर्वाण्येव कारकानि स्वस्वावान्यरव्यापारद्वारा प्रधानक्रियानिष्पादक्त्वात् क्रियाजनकत्वेन तेषां कारकत्वम्। भर्तृहरिमते षड्कारकाणि प्रतिपादितानि। षड्सु कारकेष्वन्यतमं कर्मकारम्। नागेशमते कर्मलक्षणं प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम् इति परिष्कारपूर्वकं प्रपञ्चितम्। प्रायः समेषां व्याकरणाचर्याणां मते फलाश्रयस्यैव कर्मसंज्ञा भवति। ततः सकर्मत्वाकर्मकत्वं प्रतिपाद्य भर्तृहरिनये कर्मत्वस्य सप्त भेदाः वर्णिताः। एवं समासेन कर्मस्वरूपं प्रतिपादितमिति शम्।

[२८]एवञ्च अपादानादीत्यादिशब्देनापादानसम्प्रदानाधिकरणान्येव। करणन्तु न गृह्यते हस्तादेः करणस्य पय आदिकर्मयुक्तवाभावात् इति लघुशब्देन्दुशेखरः, १।४।५१।

# आदेशागमलोपपरिपूरकाणां हरिनामामृतव्याकरणगतसंज्ञानां विमर्शः

नित्यानन्दमान्ना*

## ०.०. उपोद्घातः

संसारे प्रवृत्तानां सर्वासामपि विद्यानां मूलं भगवतो निःश्वासभूताः परमपूताः वेदाः एव। वेदस्य षडङ्गेषु व्याकरणं प्रधानम्। पाणिनीयशिक्षायाम् अपि तदेव प्रतिपादितम्– 'शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्' इति। व्याकरणं प्रातिशाख्यमूलम्। वेदानां प्रतिशाखम् आश्रित्य ये व्याकरणग्रन्थाः आसन् ते प्रातिशाख्यग्रन्थाः इति उच्यन्ते।

संस्कृतेतरभाषासु विद्यमानव्याकरणशास्त्रापेक्षया संस्कृतव्याकरणस्य माहात्म्यं सर्वाधिकं वर्तते। यतो हि अन्यासां भाषाणां व्याकरणग्रन्थाः केवलं वाग्व्यवहाराय अर्थज्ञानाय च उद्दिष्टाः। परन्तु संस्कृतव्याकरणग्रन्थाः पुण्यार्जनेन सम्बद्धाः। तथा चोक्तं महाभाष्यकारेण– प्रयोजनं विवृतमस्ति। तद्यथा श्रीहरिनामसंकेतादिभिर्विघ्नध्वंसपूर्वकं परमानन्दावाप्तिः। वैष्णवसंप्रदायिनः सर्वदा सर्वत्रापि कृष्णैकप्राणाः भवन्ति। वैष्णवानां दिनचर्यायाम् एकः मुहूर्तः तादृशः न स्यात्, यत्र हरिनामस्मरणं न भवेत्। कलियुगे हरिनामकीर्तनेन विना गत्यन्तरं नास्तीति बृहन्नारदीयवचनं ते स्वीकुर्वन्ति। इतरव्याकरणानि निर्जलप्रदेशसदृशानीति वर्णयित्वा तेषामध्येतृन् मरुप्रदेशे जललुब्धकैः तोलयित्वा तेषां तृष्णानिवारणार्थमेतत् श्रीहरिनामरूपामृतपानं तत्रोपदिश्यते। अस्य श्रीहरिनामामृतव्याकरणस्य स्वरवर्णाश्रितप्रत्याहारपरिपूरकसंज्ञाविमर्शः एव मम प्रबन्धस्य विषयः।

## १.१. ग्रन्थकर्तृपरिचयः

वैष्णवसम्प्रदाये षड्गोस्वामिनः बहुप्रसिद्धाः सन्ति। जीवगोस्वामी एषु षड्गोस्वामिषु अन्यतमः। एते षड्गोस्वामिनः तावत्– रूप-सनातन-जीव-रघुनाथदास-रघुनाथभट्ट-गोपालभट्टाः इति। अयं जीवगोस्वामी मुकुन्दस्य

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य

प्रपौत्रः, कुमारस्य पौत्रः, अनुपमस्य पुत्रः, रूपसनातनयोः भ्रातुष्पुत्रश्चासीत्। श्रीजीवगोस्वामिविरचितायां श्रीमद्भागवतस्य दशमस्कन्धस्य लघुतोषिणीटीकायां स्ववंशपरिचयः कैश्चिच्छ्लोकैः लिखितः अस्ति।

श्रीहरिनामामृतव्याकरणस्य रचयिता जीवगोस्वामी वल्लभस्य पुत्रः आसीत्। वल्लभस्य भ्रातरौ अमरसन्तोषौ स्वविद्वत्तया वङ्गदेशस्य महम्मदीयराज्ञः हुसेन्साहस्य मन्त्रिपदं प्राप्तवन्तौ। चैतन्यदेवस्य दर्शनानन्तरं इमौ द्वौ भ्रातरौ मन्त्रिपदं परित्यज्य सर्वस्वं च परित्यज्य वृन्दावनं प्रस्थितवन्तौ। तत्र तौ श्रीचैतन्यदेवस्य शिष्यत्वं स्वीकृत्य वैष्णवधर्ममते दीक्षितौ सन्तौ संन्यासिरूपेण जीवनमतिवाहितवन्तौ।

श्रीमधुसूदनवाचस्पतिः जीवगोस्वामिनः विद्यागुरुः आसीत्। बाल्यादारभ्य जीवगोस्वामी श्रीमद्भागवतानुरागी आसीत्। अत्यल्पकाले स व्याकरणकाव्यालङ्कारादिषु शास्त्रेषु पारङ्गतः अभवत्। स नैकान् ग्रन्थान् विरचय्य वैष्णवसाहित्यं सुसमृद्धं कृतवान्। तस्य वैष्णवत्वप्रतिपादने श्रीहरिनामामृतव्याकरणं प्रमुखसाधनं भवति।

## १.२. ग्रन्थपरिचयः

ग्रन्थेऽस्मिन् चतुरशीतिः श्लोकाः द्विनवत्यधिकैकशताधिकत्रिसहस्रं (३१९२) सूत्राणि वर्तन्ते। सप्त प्रकरणानि च सन्ति। तानि प्रकरणानि तावत् क्रमशः १. संज्ञासन्धिप्रकरणम्, २. विष्णुपदप्रकरणम्, ३. आख्यातप्रकरणम्, ४. कारकप्रकरणम्, ५. कृदन्तप्रकरणम्, ६. समासप्रकरणम्, ७. तद्धितप्रकरणञ्चेति। तत्र मङ्गलाचरणे चत्वारः श्लोकाः वर्तन्ते।

## २.०. आदेशागमलोपानपरिपूरकसंज्ञाविमर्शः

श्रीहरिनामामृतव्याकरणे आदेशस्य विरिञ्चिरिति संज्ञा, आगमस्य विष्णुरिति संज्ञा, लोपस्य हर इति संज्ञा च कृता विद्यते। एताः आदेशागमलोपानपरिपूरकसंज्ञाः क्रमशः आलोच्यन्ते।

## २.१. विरिञ्चिः

'आदेशो विरिञ्चिः'[१] इत्यनेन भगवता जीवगोस्वामिना आदेशस्य विरिञ्चिसंज्ञा कृता। स्वोपज्ञवृत्तौ भगवान् जीवगोस्वामी निगदति- 'विरिञ्चिर्ब्रह्मा यथैकं

[१]ह.सू. १.३९।

वस्तूपादाय अन्यत् करोति, तथा यो विधिः प्रवर्तते, स आदेशः, विरिञ्चिः चोच्यते' इति। पदद्वयात्मके अस्मिन् सूत्रे आदेशः प्रथमैकवचनान्तं पदम्। विरिञ्चिः इत्यपि प्रथमैकवचनान्तं पदम्। षड्विधसूत्रेषु संज्ञासूत्रमिदम्। विरिञ्चिः इति संज्ञापदम्। आदेशः इति संज्ञिपदम्। सूत्रार्थः तावत्– प्राचाम् आदेशपदवाच्यस्य विरिञ्चिसंज्ञा भवतीति। पाणिनीयव्याकरणे आदेशशब्दस्य प्रयोगो दृश्यते किन्तु तद्विधायकसूत्रं न विद्यते। तत्र कारणं तावत् आदेशशब्दस्य बहुलप्रसिद्धिः। तर्हि श्रीहरिनामामृतव्याकरणे तद्विधायकसूत्रस्यापि आवश्यकता नास्ति खलु इति चेदुच्यते अस्य व्याकरणस्य अक्षरलाघवं सूत्रलाघवं न उद्देश्यम् अपि तु हरिस्मरणमुद्देश्यम्।

विरिङ्क्ते सूत्रे इति विरिञ्चिः। ब्रह्मा यथैकं वस्तु गृहीत्वान्यत् करोति अन्याकारेण परिणामयति तत्साम्यात् यो विधिः प्रवर्तते यत्किञ्चिदवलम्ब्य तदेवान्यत्वेन विदधाति तस्य विरिञ्चिसंज्ञाविधानं सार्थकम्। अमृतास्वादिनीटीकाकारः लिखति– 'किञ्च 'तत्सृष्ट्वा तदेवानुप्राविशदिति'[२] श्रुतेर्ब्रह्मणो यथा जगत् सृष्ट्यनन्तरं तदन्तर्भवनमुपलभ्यते, तथास्य विरिञ्चेरपि सूत्ररूपेण यत् किञ्चिदुपदेशानन्तरं स्वयं तदादेशस्वरूपेण चाविर्भवनं दृश्यते। तथा च कर्तव्यत्वेनोपदेशो विधिरित्यनेन विधानात्सूत्रस्य विरिञ्चित्वम्, ईदृशो विधिः विरिञ्चिरित्यनेनादेशरूपकार्यस्य च विरिञ्चित्वं प्रतिपाद्यते स्वयमेव ग्रन्थकृद्भिः अत्र आदेशसंज्ञा प्राचाम्' इति। विविधसहस्रनामस्तोत्रेषु हरिनामत्वेन विरिञ्चिपर्यायः ब्रह्मा इति शब्दः पठितः। तद्यथा कृष्णसहस्रनामस्तोत्रे ६४[३], पद्मपुराणे उत्तरखण्डे एकसप्ततितमे अध्याये विष्णुसहस्रनामस्तोत्रे १७४[४] इत्यस्मिन् श्लोके ब्रह्माशब्दः पठितः। तत्रैव १७८[५] चतुर्वेदप्रवर्तक इति भगवतः नाम पठितम्। यद्यपि अत्र भगवतो मत्स्यावतारस्यैव कथा वर्ण्यते तथापि चतुर्वेदप्रवर्तकत्वेन भगवतः ब्रह्मणः कथनं न दोषाय। भगवान् ब्रह्मा हि वेदप्रवर्तकत्वेन पुराणेषु अपि स्तूयते। स हि चतुर्भिरास्यैः चतुरो वेदान् ऋषिभ्य उपदिदेश इति कथा तत्र तत्र श्रूयते।

---

[२]तै.उ. २.६.१।

[३]स्मितेक्षाहर्षितब्रह्मा भक्तवत्सलवाक्प्रियः। ब्रह्मानन्दाश्रुधौतांघ्रिर्लीलावैचित्र्यकोविदः॥

[४]आद्यः कविर्हयग्रीवः सर्ववागीश्वरेश्वरः। सर्वदेवमयो ब्रह्मा गुर्वागीश्वरीपतिः॥

[५]मत्स्यदेवो महाशृङ्गो जगद्बीजवहित्रदृक्। लीलाव्याप्ताखिलाम्भोधिश्चतुर्वेदप्रवर्तकः॥

१४९[६] इत्यस्मिन् श्लोके सृष्टिस्थित्यन्तकृच्छब्दः पठितः। सृष्टिकर्तृत्वेन ब्रह्मणः प्रसिद्धिः। अवधेयम् इदं यद् वैष्णवसम्प्रदायस्य सिद्धान्तानाम् आचाराणां च प्रमाणभूतग्रन्थत्वेन पद्मपुराणस्य वर्तते महान् आदरः। तत्र बहुषु स्थानेषु वैष्णवाचारादिसम्बन्धीनि बहूनि तत्त्वानि विधृतानि। गौडीयवैष्णवसम्प्रदायस्य आचार्याणां ग्रन्थेषु च पद्मपुराणस्य उद्धरणं भूरिश उपलभ्यते। तादृशस्य पद्मपुराणस्य क्रियायोगसारे द्वितीये अध्याये प्रथमतः षड्श्लोकेषु प्रतिपादितं यत् सृष्टेरादौ महाविष्णुरेव सृष्टि-स्थिति-संहारकर्तृत्वेन आत्मानं त्रिधा विभज्य स्थितः। तेन विष्णुरेव ब्रह्मा विरिञ्चिः वा इत्यत्र नास्ति संशयः। एवञ्च स एव महेश्वरः हरः वा। तद्यथा–

सृष्टेरादौ महाविष्णुः सिसृक्षुः सकलं जगत्।
स्रष्टा पाता च संहर्ता त्रिमूर्तिरभवत् स्वयम्॥
सृष्ट्यर्थमस्य जगतः ससर्ज ब्रह्मसंज्ञकम्।
दक्षिणाङ्गज आत्मानमात्मना श्रेष्ठपूरुषः॥
ततस्तु पालनार्थाय जगतो जगतीपतिः।
विष्णुं ससर्ज वामाङ्गान्निजांशं केशवं मुने॥
अथ संहरणार्थाय जगतो रुद्रमव्ययम्।
मुने ससर्ज मध्याङ्गात् हृत्पद्मनिलयः प्रभुः॥
रजः सत्त्वं तमश्चेति पुरुषं त्रिगुणात्मकम्।
यदस्ति केचिद् ब्रह्माणं विष्णुं केचिच्च शङ्करम्॥
एको विष्णुस्त्रिधा भूत्वा सृजत्यत्ति च पाति च।
तस्माद्भेदो न कर्तव्यस्त्रिषु देवेषु सत्तमैः॥

विपूर्वकात् रौधादिकाद् विरेचनार्थाद् रिचिर्-धातोः इनि-प्रत्यये विरिञ्चिशब्दः निष्पन्नः इति आप्टेमहाभागेन स्वकोशे उक्तम्। तद्वचनं हि– वौ रिञ्चेः इन् नुम् च इति। ईदृशव्युत्पत्तेः प्रमाणं नोपलब्धमस्माभिः। अमरकोषस्य सुधाव्याख्याने विरिञ्चिशब्दस्य निष्पत्तिरित्थं प्रदर्शिता– विपूर्वकात् प्रतियत्नार्थाद् रचधातोः स्वार्थण्यन्तात् अच इः[७] इति औणादिकेन सूत्रेण इप्रत्यये विरिञ्चिशब्दः। अत्र रच

---

[६]सृष्टिस्थित्यन्तकृच्चक्री शार्ङ्गधन्वा गदाधरः। शङ्खभृन्नदकी पद्मपाणिर्गरुडवाहनः॥

[७]उणादिषु चतुर्थे पादे १३८ सूत्रम्, आरम्भतः ५७८ सूत्रम्।

इत्यत्र रेफोत्तरवर्तिनः अकारस्य इत्वं नुमागमश्च पृषोदरादित्वात्[८]।

व्युत्पत्त्यनुसारं विरिञ्चि-शब्दः विरेचकार्थः प्रतियत्नकर्त्रर्थको वा स्वीकार्यः। आदेशो नाम काचन प्रक्रिया यया प्रक्रियया एकस्य स्थाने अपरः प्रसज्यते। अत्र प्रक्रियायाम् एकस्य वर्णस्य प्रतियत्नः क्रियते इति वक्तुं युज्यते। प्रतियत्नशब्दः नानार्थकः। प्रतियत्नो नाम सतो गुणान्तराधानम् इति भरतकोषे विद्यते इति शब्दकल्पद्रुमाद् ज्ञायते। आदेशे सतः प्रसङ्गे अन्यस्य आधानं क्रियते। सतः वर्णस्य गुणान्तरम् आधीयते।

वस्तुतस्तु अत्र ब्रह्म-धात्रादिशब्दानां प्रयोगः अपि कर्तुं शक्यते स्म। किन्तु ग्रन्थकृत् विरिञ्चिशब्दस्य यौगिकम् अर्थम् एव विरिञ्चिसंज्ञायाः प्रयोगे विनिगमनाम् अकल्पयद् इति वयं मन्यामहे। यतः सतः वस्तुनः गुणान्तराधानरूपार्थः साक्षाद् विरिञ्चिशब्दस्य यौगिकार्थेन सङ्गच्छते। अत्र सुधियः प्रमाणम्

अपि च गौडीयवैष्णवसम्प्रदायस्य प्रमाणभूते श्रीलरूपगोस्वामिविरचिते लघुभागवतामृतग्रन्थे ब्रह्मविष्णुशिवानां गुणावतारता उच्यते। तत्र ब्रह्मवाचकत्वेन विरिञ्चिशब्दस्य शिववाचकत्वेन च हरशब्दस्य प्रयोग एव श्रीलरूपगोस्वामिपादैः कृत[९] इति विरिञ्चिशब्दस्य प्रयोगे विनिगमनान्तरं कल्पयितुं शक्यते। तथाहि–

> सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्-
> युक्तः परः पुरुष एक इहास्य धत्ते।
> स्थित्यादये हरिविरिञ्चिहरेतिसंज्ञाः
> श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः॥

अत्र साक्षादेव विरिञ्चि-हर-संज्ञयोः कथनं ग्रन्थकारेणाकारि इति सम्प्रदायप्रसिद्ध एवायं शब्दः।

विरिञ्चिसंज्ञायाः त्रीणि प्रयोगस्थलानि विद्यन्ते। तेषु द्वयमत्र उल्लिख्यते– ईश्वर-हरिमित्र-क-ङेभ्यः प्रत्यय-विरिञ्चि-सस्य षो, नुम्-विष्णुसर्ग-व्यवधानेऽपि, न तु विष्णु-पदाद्यन्त-सातीनाम् (ह.सू. २.२३), अत्र-पाद-दन्त-मास-युष इत्येतेषां पद्-दत्-मास्-युषन्-इत्येते विरिञ्चयो यदुषु वा (ह.सू. २.२८)

## २.२. विष्णुः

श्रीहरिनामामृतव्याकरणे भगवता जीवगोस्वामिना 'आगमो विष्णुः' (ह.सू.

---

[८] अमरकोषस्य प्रथमकाण्डे स्वर्गवर्गे १७ श्लोकस्य व्याख्याने द्रष्टव्यम्।

[९] लघुभागवतामृतस्य ३१ श्लोकः।

१.४०) इत्यनेन विष्णुसंज्ञा विहिता। पदद्वयात्मके अस्मिन् सूत्रे आगमः इति प्रथमैकवचनान्तं पदम्। विष्णुः इत्यपि प्रथमैकवचनान्तं पदम्। षड्विधसूत्रेषु संज्ञासूत्रमिदम्। विष्णुः इति संज्ञापदम्। आगमः इति संज्ञिपदम्। सूत्रार्थः तावत् एवं भवति– प्राचीनैः प्रयुक्तस्य आगमवाचकस्य विष्णुसंज्ञा भवति। वृत्तिस्तावत्– 'विष्णुर्यथा मध्यतः स्वयमाविर्भूय पोषको भवति, तथा यो विधिः प्रवर्तते स आगमः, विष्णुः चोच्यते' इति। अस्याः संज्ञाया एकमपि प्रयोगसूत्रं न विद्यते। आगमशब्दस्य बहुलप्रसिद्धत्वात् पाणिनीयव्याकरणे आगमशब्दस्य बहुलप्रयोगः दृश्यते किन्तु तद्विधायकसूत्रं नास्ति। परन्तु श्रीहरिनामामृतव्याकरणे हरेः स्मरणार्थं सूत्रं विरचितम्।

ग्रन्थकारेणैव संज्ञायाः अस्याः सार्थकता प्रतिपादिता तथापि सरलतया वक्तव्यमिति चेदुच्यते विष्णुः यथा सृष्टिप्रलययोः मध्यतः स्वयमाविर्भूय पोषको भवति अर्थात् सृष्टिं पालयति। तथा प्रकृतिप्रत्यययोः मध्ये स्वयमाविर्भूय तयोः पोषको निर्वाहको यो विधिः प्रवर्तते स प्रचीनैः आगमशब्देन उच्यते। एतत्साम्यात् विष्णुशब्दस्य च भगवद्वाचित्वात् आगमस्य विष्णुसंज्ञाविधानं सार्थकम्। विविधसहस्रनामस्तोत्रेषु हरिनामत्वेन विष्णुशब्दः पठितः। तद्यथा विष्णुसहस्रनामस्तोत्रे १४[१०], कृष्णसहस्रनामस्तोत्रे १६४[११], लक्ष्मीनृसिंहसहस्रनामस्तोत्रे ७४[१२], गोपालसहस्रनामस्तोत्रे ७५[१३]। पद्मपुराणे उत्तरखण्डे एकसप्ततितमे अध्याये विष्णुसहस्रनामस्तोत्रे १४१[१४], १९९[१५], २८४[१६]– इत्येषु श्लोकेषु विष्णुशब्दः पठितः।

## २.३. हरः

भगवता पाणिनिना अष्टाध्याय्याम् 'अदर्शनं लोपः' (पा.सू. १.६.६०) इत्यनेन लोपसंज्ञा कृता विद्यते। तस्याः लोपसंज्ञायाः 'लोपो हरः' (ह.सू. १.४१) इत्यनेन

---

[१०]विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः। भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः॥

[११]नारायणो मधुपतिर्माधवदोषवर्जितः। गोविन्दः पुण्डरीकाक्षो विष्णुश्च मधुसूदनः॥

[१२]लसद्दीप्ताय लिप्ताय विष्णवे प्रभविष्णवे। वृष्णिमूलाय कृष्णाय श्रीमहाविष्णवे नमः॥

[१३]अच्युतः केशवो विष्णुर्हरिः सत्यो जनार्दनः। हंसो नारायणो लीलो नीलो भक्तिपरायणः॥

[१४]वश्यश्रीर्निश्चलः श्रीदो विष्णुः क्षीराब्धिमन्दिरः। कोस्तुभोद्भासितोरस्को माधवो जगदार्त्तिहा॥

[१५]सुब्रह्मण्यो वलिध्वंसी वामनोऽदितिदुखहा। उपेन्द्रः नृपतिर्विष्णुः कश्यपान्वयमण्डनः॥

[१६]नक्षत्रेशो रविस्तेजः श्रेष्ठः शुक्रः कवीश्वरः। महर्षिराट् भृगुर्विष्णुरादित्येशो वलिः स्वराट्॥

श्रीहरिनामामृतव्याकरणे भगवता जीवगोस्वामिना हरसंज्ञा कृता। पदद्वयात्मके अस्मिन् सूत्रे लोपः इति प्रथमैकवचनान्तं पदम्। हरः इत्यपि प्रथमैकवचनान्तं पदम्। षड्विधसूत्रेषु संज्ञासूत्रमिदम्। हरः इति संज्ञादलम्। लोपः इति संज्ञिदलम्। सूत्रार्थः तावत्– प्राचीनैः व्यवहृतलोपसंज्ञकस्य हरसंज्ञा भवतीति। स्वोपज्ञवृत्तौ निगदितं– 'हरो यथा नाशहेतुर्भवति, तथा यो विधिः प्रवर्तते, स लोपः हरः चोच्यते। तत्र हरो द्विधा भवेत्– तत्रादर्शनमात्रहेतुर्हरः, आत्यन्तिकलयहेतुर्महाहरः, लुग् इत्यन्ये' इति।

हरति संसारं नाशयति इति हरः। यथा जगतः नाशस्य प्रलयस्य हेतुः हरः रुद्रः। तथा अयं लोपः अपि वर्णनाशहेतवे प्रवर्तते। अपि च यथा हरो नाशं कारयन् अपि स्वयं न नश्यति तथैव अनेन लोपरूपहरविधिना प्रत्ययस्य लोपः अदर्शनमात्रं भवति, परन्तु तज्जनितकार्यं भवत्येव।[17] अत एव तत्र अदर्शनमात्रहेतुः हरः इति वृत्तौ लिखितं ग्रन्थकारेण। वैष्णवाः हरिहरयोः अभेदं स्वीकुर्वन्ति। तत्र ते प्रमाणं दर्शयन्ति यथा–

यो हरिः स शिवः साक्षाद्यः शिविः स स्वयं हरिः।
एतयोः भेदमातिष्ठन् नरकाय भवेन्नरः॥ (दे.भा. ३.६.५५) इति।

यः हरिः स हरः स एव विरिञ्चिः इति विरिञ्चिसंज्ञाव्याख्यानप्रसङ्गे व्याख्यातम्। तैत्तिरीयारण्यकस्थनारायणसूक्तवचनं तावत्– 'स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्' (तैत्तिरीयारण्यकम्– ४, प्रपाठकः– १०, अनुवाकः– १३) इति। तस्मात् शिवरूपहरस्य लोपरूपहरस्य कार्यगतसाम्यत्वात् हरशब्दस्य च भगवद्वाचित्वात् लोपस्य हरसंज्ञाविधानं सार्थकम्। विविधसहस्रनामस्तोत्रेषु हरिनामत्वेन हरशब्दः पठितः। तद्यथा गोपालसहस्रनामस्तोत्रे ६३[18], पद्मपुराणे उत्तरखण्डे एकसप्ततितमे अध्याये विष्णुसहस्रनामस्तोत्रे १३५[19]– इत्यस्मिन् श्लोके महारुद्रशब्दः पठितः, १९५[20]– इत्यस्मिन् श्लोके रुद्रशब्दः पठितः, विविधसहस्रनामस्तोत्रेषु हरिनामत्वेन रुद्रशब्दः

---

[17]प्रत्ययलोपे प्रत्ययलक्षणम् (पा.सू. १.१.६२)।

[18]हरिर्हरो नरो नारो नरोत्तम इषुप्रियः। गोपालीचित्तहर्ता च कर्ता संसारतारकः॥

[19]अनुल्लङ्घ्यश्चित्रगतिर्महारुद्रो दुरासदः। मूलप्रकृतिरानन्दः प्रद्युम्नो विश्वमोहनः॥

[20]योगिनीचक्रगुह्येशः शक्रारिपशुमांसभुक्। रुद्रो नारायणो मेषरूपशङ्करवाहनः॥

पठितः। तद्यथा विष्णुसहस्रनामस्तोत्रे २६[२१], लक्ष्मीनृसिंहसहस्रनामस्तोत्रे ५९[२२], गोपालसहस्रनामस्तोत्रे ५८[२३], पद्मपुराणे उत्तरखण्डे एकसप्ततितमे अध्याये विष्णुसहस्रनामस्तोत्रे १६८[२४]– इत्यस्मिन् श्लोके सदाशिवशब्दः पठितः, १९७[२५]– इत्यस्मिन् श्लोके महाशिवशब्दः पठितः, २८५[२६]– इत्यस्मिन् श्लोके शङ्करशब्दः पठितः।

अत्रापि हरशब्दस्य यौगिकार्थः लोपार्थेन सङ्गच्छते इति हरशब्दस्य प्रयोगे बीजम् इति मन्यामहे वयम्।

हरसंज्ञायाः बहूनि प्रयोगसूत्राणि सन्ति। तेषु द्वयमत्र उल्लिख्यते– अव्यक्तानुकरणशब्दानामद्धागस्य हर इतो, हरिगदानिषेधश्च (ह.सू. १.१२६), दशावतारादम्शसोररामहरः (ह.सू. २.९)

## ३.०. उपसंहृतिः

ग्रन्थोऽयं वैष्णवसम्प्रदायस्य वैष्णवसिद्धान्तानाञ्च परिपोषकः, दार्शनिकदृष्ट्यापि ग्रन्थस्यास्य महदवदानं विद्यते। विद्यमानासु बह्वीषु व्याकरणपरम्परासु स्थितास्वपि जीवगोस्वामिना नवीनेयं परम्परा किमर्था समारब्धा, कथञ्च नूतनयानया परम्परया वैयाकरणराद्धान्ताः दृढीकृताः, इमे तु महद्विचारयोग्याः विषयाः। तस्माद्ग्रन्थस्यास्य सम्यगध्ययनं करणीयमिति धिया प्रबन्धविषयत्वेन ग्रन्थोऽयं स्वीकृत इति। संक्षेपेणात्र श्रीहरिनामामृतव्याकरणस्य आदेशागमलोपपरिपूरकसंज्ञानां विमर्शः कृतः।

[सङ्केताक्षरसूची– तै.उ.– तैत्तिरीयोपनिषत्, दे.भा.– देवीभागवतं, पा.सू.– पाणिनीयसूत्रं, ह.सू.– श्रीहरिनामामृतव्याकरणसूत्रम्]

---

[२१] रूद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः। अमृतः शास्वतः स्थाणुर्वरारोहो महातपाः॥

[२२] कण्ठीरवाय लुण्ठाय निःशठाय हठाय च। सत्त्वोद्रिक्ताय रुद्राय ऋग्यजुःसामगाय च॥

[२३] शिवो रुद्रो नलो नीलो लाङ्गली लाङ्गलाश्रयः। पारदः पावनो हंसो हंसारूढो जगत्पतिः॥

[२४] सदानन्दः सदाभद्रः सदाशान्तः सदाशिवः। सदाप्रियः सदातुष्टः सदापुष्टः सदार्चितः॥

[२५] महाशिवः शिवारूढो भैरवैककपालध्वक्। किल्ली चक्रेश्वरः शत्रुदिव्यमोहनरूपदः॥

[२६] वायुर्वह्निः शुचिः श्रेष्ठः शङ्करो रुद्रराट् गुरुः। विद्वत्तमश्चित्ररथो गन्धर्वाग्र्यः क्षरोत्तमः॥

# संस्कृतदृश्यकाव्यवर्णनधारा तथा तस्याः विवर्तनम्

विप्लवचक्रवर्ती*

प्रबन्धेऽस्मिन् मया मुख्यतः आलङ्कारिकाणां मतानुसारं लिखितानां दृश्यकाव्यानां केषांश्चित् वर्णनधारा वर्णिता तथा तस्याः धारायाः विंशशतकस्य दृश्यकाव्ये एकविंशशतकस्य दृश्यकाव्येषु च विवर्तनं पर्यालोचितम्।

दृश्यकाव्येषु नाटकस्य प्राधान्यमित्यतः नाटकस्य लक्षणविषये आदौ आलङ्कारिकाणां मतमुच्यते। नाटकस्य लक्षणविषये विश्वनाथकविराजेन साहित्यदर्पणे उक्तं- 'नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्'[१] इति। अर्थात् नाटकस्य वृत्तं पुराणेतिहासप्रसिद्धवृत्तानि समाश्रित्य भवेत्। यथा अभिज्ञानशकुन्तलनाटकस्य वृत्तं महाभारतप्रसिद्धम्। ततश्च मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्षसन्धिः तथा निर्वहनसन्धिश्च इति पञ्चसन्धयः नाटके स्युः।

यत्र बहुविधैः वृत्तान्तैः शृङ्गारादिभिश्च रसैः आरम्भनामकावस्थया संयुक्तः सन् बीजस्योत्पत्तिः भवति तत्र मुखसन्धिः स्यात्। यथा रत्नावल्याः प्रथमेऽङ्के दृश्यते उदयनेन सह सागरिकारूपिण्याः रत्नावल्याः परिणयरूपस्य मुख्यफलस्य सहायकः बीजभूतः अनुरागः अस्ति। यस्मिन् सन्धौ मुखसन्धिसमारब्धस्य प्रधानफलस्य सामान्यरूपेण प्रकाशः दृश्यते स प्रतिमुखसन्धिः। यथा रत्नावल्याः द्वितीयेऽङ्के दृश्यते वत्सराजसागरिकासमागमहेतोरनुरागबीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसङ्गताविदूषकाभ्यां ज्ञायमानतया किञ्चिल्लक्ष्यस्य वासवदत्तया चित्रफलवृत्तान्तेन किञ्चिदुन्नीयमानस्योद्देशरूप उद्भेदः। यत्र नाटकस्य मुख्यप्रयोजनस्य वारं वारं ह्रासः तथा अन्वेषणयुक्तोद्भेदः दृश्यते स गर्भसन्धिः इति। यथ स्वप्नवासवदत्तायां स्वप्नदृश्यद्वारा मुख्यप्रयोजनस्य राज्योद्धारान्तरनायकनायिकयोः मिलनस्य क्वचित् ह्रासः क्वचिद्वा उद्भेदः भवति इत्यतः गर्भसन्धिः। यत्र पुनः अभिशापादिद्वारा गर्भसन्धितः अपि अधिकरूपेण विघ्नितः प्रधानवृत्तप्रवाहः भवति स विमर्षसन्धिः।

---

*सहायकाचार्यः, संस्कृतविभागे, सरोजिनी-नायडु-महिला-महाविद्यालयस्य

[१]साहित्यदर्पणस्य ६/६

यथा अभिज्ञानशकुन्तलम् इति नाटके दृश्यते यत् चतुर्थाङ्के कोपनस्वभावस्य ऋषेः अभिशापेन दुष्यन्तशकुन्तलयोः मिलनरूपस्य मुख्यफलस्य विघ्नः भवति इति विमर्षसन्धिः। यत्र अन्येषु सन्धिषु निविष्टाणां विषयाणां मुख्यफलस्य सिद्धये निवेशः भवति स निर्वहनसन्धिः।

नाटके पञ्चतः अधिकाः किन्तु दशपर्यन्तमङ्काः स्युः। प्रख्यातवंशजातः, ऋषितुल्यः गुणवान्, धीरोदात्तः तथा प्रतापशाली दिव्योऽथवा दिव्यादिव्यः गुणवान् जनः एव नाटकस्य नायकः स्यात्। शृङ्गारः वीरः इत्यनयोः एकः अङ्गी रसः स्यात्। केचन पुनः करूणरसमपि केचन वा शान्तरसं प्रधानरसरूपेण आमनन्ति। अन्ये रसाः सहायकरूपेण स्यात्। एवं नाटकस्य सामान्यसूचना प्रदत्ता।

अधुना विंशशतकस्य ड. रमाचौधुरीमहाभागया विरचितस्य 'युगजीवनम्' इति दृश्यकाव्येन आलङ्कारिकसम्मतानां दृश्यकाव्यानां सादृश्यं वैसादृश्यं च पर्यालोच्यते। आदौ विचार्यं दृश्यकाव्यमिदं नाटकं वा प्रकरणं वा। यद्यपि दृश्यकाव्यस्यादौ ग्रन्थकात्री युगजीवनमिति लेखित्वा नाटकमिति लिखति तथापि नाटकशब्दोऽयं दृश्यकाव्यसामान्ये तत्रभवत्या व्यवहृतः न वेति चिन्तनीयः। दृश्यकाव्येऽस्मिन् दश दृश्यानि सन्ति। नाटके यथा पञ्चतः दशसंख्यकाः अङ्काः भवन्ति तथैव प्रकरणे दश अङ्का भवन्ति। युगजीवनेऽपि दशाङ्काः सन्ति। प्रकरणलक्षणविषये उक्तं प्रकरणस्य विषयः लौकिकः कविकल्पितः वा स्यात्। शृङ्गारः एवात्र अङ्गी रसः स्यात्। अत्र नायकः विप्रः, अमात्यः वनिक् वा भवति। नायकश्च धीरप्रशान्तः स्यात्। धीरप्रशान्तस्य लक्षणं हि- 'सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्' इति। युगजीवनस्य नायकः दक्षिणेश्वरमातृमन्दिरस्य पूजकः विप्रः। अतः अत्र प्रकरणेन सादृश्यमस्ति। किन्तु रसदृष्ट्या कुत्र अस्य अन्तर्भावः स्यात् तत्तु विचार्यमेव। अस्य दृश्यकाव्यस्य अङ्गी रसः हि भक्तिरसः। तथा हि दृश्यकाव्यस्यास्य प्रस्तावनायां सूत्रधारेण उक्तं- 'श्रीरामकृष्णपरमहंसदेवमाश्रित्य रचितं किञ्चन श्रद्धाश्रितं भक्तिभरितं प्रीतिप्रसन्नं संस्कृतनाटकं नाट्ये प्रयोक्तव्यमिति'[२]। यद्यपि कान्ताविषयकरतिः शृङ्गारः अपरतः भगवद्विषयकरतिः भक्तिरसः। अपरतः अभिनवगुप्तस्य मतमाश्रित्य वक्तुं शक्यते सर्वेषां रसानां शान्ते एव पर्यावसानं भवति। शान्तरस्य स्थायिभावः हि निर्वेदः। उक्तञ्च मम्मटेन काव्यप्रकाशस्य चतुर्थे अध्याये– निर्वेदस्थायिभावोऽस्ति शान्तोऽपि रसः:' इति। अपरतः भक्तिरसस्य विचारे कृते स्थायिभावरूपेण निर्वेदः एव

[२]युगजीवनस्य प्रस्तावनायाम्

आयाति। अतः प्रकरणे युगजीवनस्य अन्तर्भावः भवितुमर्हति। एवं विचारे कृते युगजीवनं प्रकरणमिति वक्तुं शक्यते। पुनश्च सूक्ष्मतया विचारे कृते नाटकमध्ये अप्यस्य अन्तर्भावः स्यात्। यतो हि अत्र नाटाकानुरूपमेव नायकः दिव्यः। तथा हि श्रीरामकृष्णपरमहंस आसीत् विष्णोः अवतारः इत्यतः युगजीवनस्य नाटकेऽपि अन्तर्भावः भवितुमर्हति।

अधुना विंशशतकस्य युगजीवनमिति दृश्यकाव्येन सह आलङ्कारिकसम्मतानां प्रचीनदृश्यकाव्यानां सादृश्यानि वैसादृश्यानि च समुपस्थाप्यते। युगजीवने आदावेव निर्विघ्नग्रन्थसमाप्त्यर्थं नान्दी मङ्गलाचरणं वास्ति। तथा हि ग्रन्थादौ समुपन्यस्तम्–

धरावतंसं परात्मवंशं प्रणमामि परमहंसम्।<br>
जितकलिकंसं हृतवलिदंशं धूतधार्मिकध्वंसम्॥ इति।

द्वितीयतः आलङ्कारिकानां निर्देशानुसारम् आदौ सूत्राधारस्तथा नटी प्रस्तावनया दृश्यकाव्यस्यास्य सूचनां करोति। प्रस्तावनयां नटनट्योः अभिनयद्वारा नाटकारम्भं सूचयता उक्तं साहित्यदर्पणस्य षष्ठेऽङ्के–

नटी विदूषको वापि पारिपार्श्विक एव वा।<br>
सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥<br>
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।<br>
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥[३] इति

युगजीवनेऽपि तथैव दृश्यते। वस्तुतः अस्य दृश्यकाव्यस्य प्रस्तावनायाम् अभिज्ञाननाटकस्य प्रभावोऽस्ति इति वक्तुं शक्यते। शाकुन्तले यथा सुत्रधारस्य नाटकोपस्थापनसमये उद्वेगः उपस्थापितः तथैवात्रापि।

तृतीयतः यथा प्राचीनदृश्यकाव्येषु दीर्घकायवाक्यानां प्रयोगः आसीत् दृश्यकाव्येऽस्मिन् तथैव श्रीरामकृष्णस्य मुखात् हृदयरामस्य मुखात् तथा अन्येषामपि मुखात् सुदीर्घवाक्यानि श्रुयते।

चतुर्थतः प्रायशः दृश्यकाव्येषु अङ्कानामादौ सङ्गीतस्य व्यवहारोऽस्ति। यथा शाकुन्तले पञ्चमेऽङ्के हंसपदिकायाः गीतद्वारा प्रारम्भः जातः। तद्वत् युगजीवनस्य प्रायः सर्वेषु एवाङ्केषु आदौ गीतमस्ति। अत्र दिङ्मात्रमुपस्थप्यते चतुर्थदृश्यस्य गीतम्–

---

[३]साहित्यदर्पणस्य ६/१६

मनस्त्वं कृषिविद्याहीनम्।
ईदृङ्मानवक्षेत्रं स्थितं पतितं
कर्षणेन भवेत् स्वर्णप्रदम्॥
देहि कालीनाम वेष्टनजालं
भवेन्न हृतं शस्यं श्यामलम्।
मुक्तकेश्याः प्राचीरं दृढं
न याति यमोऽमि तत्र सभयम्॥ इति।

पञ्चमतः नाटकसन्धीनाम् अनेकेषाम् एव प्रयोगप्रयासः अत्र ग्रन्थकर्त्रीभिः कृतः। दृश्यकाव्यस्य पञ्चमेऽङ्के यदा भैरव्याः तथा गोरिपण्डितस्य वचनात् ज्ञायते यत् श्रीराममकृष्णः हि अवतारः तदा मुखसन्धेः सूचना जाता। तथा हि भैरवी वदति– 'अयं श्रीगदाधरः न केवलं कलियुगावतारेषु गरिष्टः परन्तु सर्वयुगावतारश्रेष्ठः'[४] इति। पुनश्च गौरीपण्डितः वदति– विरमतु, विरमतु। न वाञ्छामो वयं प्रमाणानि। साक्षात् परमेश्वर एवाविर्भूतः अस्मत्सम्मुखे परमकृपया'[५] इति।

प्रतिमुखसन्धेः प्रकाशो दृश्यते षष्ठेऽङ्के यदा तोतापुरीमहोदयरदत्तया दीक्षया दिवसत्रयेनैव निर्विकल्पसमाधिलाभः कृतवान् गदाधरः। साधारणस्य जनस्य कृते एतन्न सम्भवेदिति गदाधरः न साधारणजनः। एवं श्रीरामकृष्णस्य अवतारत्वं किञ्चित् प्रकाशितम्। तथा हि तोतापुरी वदति– आश्चर्यं महाश्चर्यम्! सुदीर्घचत्वारिंशद्वत्सरव्यापिसाधनया यदहं लब्धवान् तदयं जनः प्राप्तवान् अनायासेन दिवसत्रयेण केवलम्'[६] इति। साक्षाद्रूपेण गर्भसन्धेः प्रयोगः नास्ति। विमर्शसन्धेः प्रयोगः अस्ति। तथा हि तृतीयाङ्के यदा देवमन्दिरे पार्थिवविषयचिन्तायां रतायाः रासमणिदेव्याः गण्डदेशे चेपटाघातमकरोत् श्रीरामकृष्णदेवः। तथा हि चेपटाघातानन्तरमेव मन्दिरस्य कर्मचारिणः तथा मथुरानाथः श्रीरामकृष्णदेवोऽपरि क्रुद्धाः अभवन्। तदा यदि क्रोधवशात् मथुरानाथः श्रीरामकृष्णदेवं पूजकपदात् अपसार्य दण्डं ददाति स्म तर्हि दृश्यकाव्यास्यास्य मुख्यं फलं विघ्नितं स्यात्। अतः तृतीयेऽङ्के मुख्यफलविघ्नसम्भावनारूपः

---

[४]युगजीवनस्य पञ्चमाङ्के
[५]तत्रैव
[६]तत्रैव, षष्ठेऽङ्के

विमर्शसन्धिरस्ति। निर्वहनसन्धेः प्रयोगः दृश्यते दशमेऽङ्के यदा यावन्ति मतानि तावन्तः मार्गाः इति प्रचारं कृत्वा सारदामातुः उपरि धर्मप्रचारभारं दत्तवान् श्रीरामकृष्णदेवः।

आलङ्कारिकैः उक्तं यत्, नाटकस्य एकेन अध्यायेन सह अपरस्य अध्यायस्य निविडतया सम्बन्धः तिष्ठति। साहित्यदर्पणस्य मतानुसारं– 'गोपुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्तितम्' इति। युगजीवनेऽपि तथैवास्ति। एवं विचारे कृते वक्तुं शक्यते युगजीवनम् एकं सार्थकं दृश्यकाव्यम्।

अधुना युगजीवनेन सह आलङ्कारिकसम्मतानां प्रचीनदृश्यकाव्यानां वैसादृश्यानि उपस्थाप्यन्ते। प्रथमतः युगजीवने अङ्कशब्दस्य स्थले दृश्यमिति शब्दस्य व्यवहारः दृश्यते।

द्वितीयतः स्त्रीणां, शुद्राणां तथा द्वाररक्षकाणां भाषा साधारणतः प्रसिद्धेषु दृश्यकाव्येषु प्राकृतभाषा अस्ति। किन्तु युगजीवने द्वाररक्षकाणां, स्त्रीणां तथा शुद्राणां सर्वेषामेव भाषारूपेण संस्कृतभाषा एव व्यवहृता।

तृतीयतः प्रसिद्धदृश्यकाव्यानि इव अत्र नायकस्य नर्मसहचरस्य विदूषकस्य उपस्थितिः नास्ति। यद्यपि अत्र नायकस्य श्रीरामकृष्णदेवस्य सहचरः तस्य भाग्नेयः हृदयरामः। किन्तु तस्य हृदयरामस्य चरितं न विदूषकतुल्यम्। यतो हि संस्कृतदृश्यकाव्येषु दृश्यते विदूषकचरित्रे आलस्यमस्ति, भोजनप्रियतास्ति, किन्तु धनलोभः नास्ति। किन्तु हृदयरमस्य चरित्रे आलस्यादीनामभावे सत्यपि धनलोलुपता दृश्यते। तथा हि द्वितीये दृश्ये हृदयः रामकृष्णदेवं प्रति वदति– 'भग्नविग्रहविषयकविधानालाभार्थं राज्ञ्या रासमणिदेव्या आहूता महती पण्डितसभा एका। तत्र समवेताः पण्डिताः तया बहुदक्षिणादानेन पूजिताः। ततो मातुल आगच्छ तत्र त्वमपि बहुधनानि प्राप्स्यति'[७]। पुनश्च प्रसिद्धदृश्यकाव्येषु कुत्रापि न दृश्यते यत् विदुषकः साक्षात् नायकं भर्त्सयति कटुवचसा पीडयति वा। किन्तु युगजीवने हृदयरामः साक्षात् नायकं भत्र्सयति कटुवचसा पीडयति च। तथा ह्यत्र चतुर्थदृश्यात् हृदयरामवचनं दिङ्मात्रमुदहृयते– 'अहो मम दुर्भाग्यम्! वातुलेन सह वातुलायाः सम्मेलनमेतत्। एको वातुल एवासहनीयः वतुलयुग्मस्य का कथा?'[८] इति।

[७]तत्रैव, प्रथमेऽङ्के

[८]तत्रैव, चतुर्थेऽङ्के

अधुना एकविंशशतके मुद्रिते 'रङ्गमञ्चे संस्कृतम्' इति पुदुचेरीस्थितात् श्रीअरविन्दाश्रमात् प्रकाशिते ग्रन्थे विधृतानां नाटकानां विषये पर्यालोचना क्रियते। पुस्तकेऽस्मिन् षट् दृश्यकाव्यानि सन्ति- ऋणमुक्तिः, ब्राह्मणो भोजनप्रियः, सार्धैकमित्रं, भक्त्या लभ्यः, अङ्गुलिमालः, भाग्यनिर्णयः चेति। एतेषु नाटकेषु प्रायः आलङ्कारिकैः प्रदत्तानि नाटकलक्षणानि न स्वीकृतानि। एतेषु नाटकेषु आदौ कुत्रापि मङ्गलश्लोकः मङ्गलवाचको वा शब्दो नास्ति। एतेन यद्यपि वक्तुं न शक्यते मङ्गालचारणं दृश्यकाव्यकर्तृभिः न कृतम्। यतः वाचिकं मङ्गलं विहायापि शारीरिकं मङ्गलं मानसिकं मङ्गलञ्चेति मङ्गलाचारणस्य विभागद्वयमस्ति। यौ विभागौ काव्यादौ न दृश्येते। अतः शारीरिकमङ्गलाचरणं मानसिकमङ्गलाचरणं कविभिः न कृतमिति साक्षात् न वक्तुं शक्यते।

एतेषु दृश्यकाव्येषु प्रायः सर्वत्रैव लघुकायवाक्यानि सन्ति। सर्वेषां च पात्राणां भाषा संस्कृतमस्ति। सर्वत्रैव अङ्कशब्दस्य स्थले दृश्यमित्यस्य व्यवहारः दृश्यते।

ऋणमुक्तिः इति प्रथमे दृश्यकाव्ये नाटकसन्धीनां प्रयोगः दुर्लभः एव। नायकः कपटी अमात्यः शशीधरः। नायकस्य चरित्रे नास्ति धीरोदात्तत्वं न वा धीरललितत्वम्।

ब्राह्मणो भोजनप्रियः इति दृश्यत्रयात्मके दृश्यकाव्ये नायकः लम्बोदरः इत्याख्यः भोजनप्रियः ब्रह्मणः। किन्तु तस्य ब्राह्मणस्य चरित्रं तत्र विदूषकतुल्यमस्ति। अन्येषां नाटकसन्धीनां स्पष्टतः प्रकाशस्य अभावे सत्यपि विमर्शसन्धेः साक्षात् प्रयोगः अस्ति। यतः दृश्यकाव्यस्य तृतीयेऽङ्के अतिभोजनात् लम्बोदरः प्रायः चेतनरहितः अभवत्तथा चिकित्सकस्य सेवयां स्वस्थः सन् पुनः भोजनाय प्रवृत्तः। सार्धैकमित्रमिति दृश्यकाव्यस्य नास्ति काचित् विशेषता।

भक्त्या लभ्यः दशदृश्यात्मकं दृश्यकाव्यं प्रकरणलक्षणयुक्तम् अस्ति। यतो हि अत्र ब्राह्मणबालः नायकः भक्तिरसश्च अस्ति। भक्तिरसस्य शान्ते अन्तर्भावः स्वीकरणेन अस्य प्रकरणत्वे नास्ति कापि क्षतिः।

अङ्गुलिमालः इति विंशतिदृश्यात्मकस्य दृश्यकाव्यस्य नायकः हि विप्रः रसः शान्तः च। अत्र प्रायः सर्वे नाटकसन्धयः सन्ति इत्यतः इदं सार्थकं प्रकरणम्।

भाग्यनिर्णयः द्वादशाङ्कात्मं वीररसप्रधानं दृश्यकाव्यं नायकः राज्ञः ब्राह्मणामात्यः। इदमपि सार्थकं दृश्यकाव्यमिति शम्।

# भारतीयसंस्कृतौ विवाहसंस्कारः


## अनन्यासरकारः*


## १. उपोद्घातः

संस्कृतभाषा भारतस्य महत्तमशेवनिधिः अस्ति। सभ्यतायाः उषाकालाद् एव अस्माकं जातीयजनजीवने अपरिमितः प्रभावः अस्याः भाषायाः। अस्माकं वेदानाम् उपनिषदां रामायणमहाभारतयोः गीतायाः भागवतस्य स्मृतिशास्त्राणां च आभारतं परिस्पन्दनं विद्यते। अस्माकं देवालयेषु तीर्थेषु च उपासनाविधिः संस्कृतम् अनुरुध्या एव विश्वेऽस्मिन् भारते प्रचलति। वेदमूलकं समग्रं धार्मिकं संस्कृतिकं च कृत्यजातं तु संस्कृते वर्तते एव। संस्कृते एव षोडशसंस्काराणां विवरणं सविस्तरेण प्राप्यते। अस्माकं षोडशसंस्काराणाम् अमूल्यं निधानं संस्कृते एव उपनिबद्धमस्ति। संस्काराः कस्मिंश्चिदपि वस्तुनि उत्कर्षाधायकाः शोभाधायकाः माङ्गल्यसाधकाश्च इति कस्य अविदितं सचेतसो मानवस्य। एतैश्च षोडशसंख्याकैः संस्कारैः संस्कृताः मानवाः षोडशकलत्वं प्राप्य स्वाभिख्यां चरितार्थयन्ति।

## २. संस्कारभेदः

संस्कारसंख्याविषये विदुषां सन्ति बहूनि मतानि– आश्वलायनगृह्यसूत्रे एकादशसंस्काराः कथिताः। पारस्करगृह्यसूत्रे त्रयोदशसंस्काराः वर्णिताः। बौधायनगृह्यसूत्रे अपि त्रयोदश संस्काराः उक्ताः। वैखानसगृह्यसूत्रे अष्टादशसंस्काराः कथिताः। गौतमधर्मसूत्रे चत्वारिंशत् संस्काराः निर्दिष्टाः।[१] यद्यपि संस्काराणां बह्व्यः संख्याः निरूपिताः विभिन्नेषु गृह्यसूत्रेषु तथापि एतेषां मध्ये षोडशैव संस्काराः सर्वत्र प्रसिद्धाः व्यवहारपथम् च आयान्ति। ते च– १.गर्भाधानम्, २.पुंसवनम्, ३.सीमन्तोन्नयनम्, ४.जातकर्म, ५.नामकरणम्, ६.निष्क्रमणम्, ७.अन्नप्राशनम्, ८.चूडाकरणम्, ९.कर्णवेधः, १०.विद्यारम्भः, ११.उपनयनम्, १२.वेदारम्भः, १३.केशान्तः, १४.समावर्तनम्, १५.विवाहः, १६.अन्त्येष्टिश्च। एतेषु विवाहसंस्कारः अधः प्रबन्धेऽस्मिन् समासेन आलोच्यते।

---


*शोधच्छात्रा, संस्कृतविभागे, कलिकाताविश्वविद्यालयस्य


[१]हिन्दुशास्त्रमते विवाह (वङ्गभाषीयो ग्रन्थः) पृ० १।

## ३. विवाहशब्दार्थविचारः

वहनं वाहः, विशिष्टो वाहः विवाहः इति व्युत्पत्त्या ज्ञायते यत् परिणयेन जम्पती किमपि वहतः स च विशिष्टो भवति। वि-पूर्वकात् वह-प्रापणे इति धातोः घञ्प्रत्ययेन विवाहः इति शब्दो निष्पद्यते। विवाहशब्दस्य प्रतिशब्दत्वेन अमरकोषे उपनयः, परिणयः, उद्वाहः, उपयामः पाणिपीडनम् इत्यादयः शब्दाः प्रयुक्ताः वर्तन्ते। शब्दकल्पद्रुमे विवाहशब्दस्य उद्वाहः पाणिपरिग्रहः च शब्दौ प्रयुक्तौ स्तः। ऋग्वेदे 'हस्तग्राभः' (१०।१।१८।८), 'वहतुम्' (१०।२।१७।१) इत्यादयः शब्दाः प्रयुक्ताः दरीदृश्यन्ते। हस्तग्राभः इत्यस्य सायनकृतार्थस्तावत् 'पाणिग्रहिता' इति। किञ्च वहतुम् इत्यस्य अर्थः कृतः विवाहम् इति। भर्यात्वसम्पादकज्ञानं विवाहः इति उद्वाहतत्त्वे रघुनन्दनः। तस्माद् विवाहे अस्मिन् दम्पती धर्मार्थकामसाधनाय परस्परं दायित्वं वहतः, तद्धि सृष्टिप्रक्रियायाः कल्यानाय भवति।

## ४. विवाहाधारः

'एकोऽहं बहु स्याम्' इति कामनाबीजेन संसृष्टा इयं सृष्टिः स्त्रीपुरुषयोः एकत्वेन एव प्रवर्तते। यतो हि मूलं कारणं सृष्ट्या ईश्वरस्य बहुत्वकामना विद्यते, अत एव तस्यैवा अंशभूतः मानवः विवाहेन सृष्टिप्रक्रियाम् इमां विस्तारयति। स्त्रियः पुरुषस्य, पुरुषस्य च स्त्रियः कामना तु सर्वथा स्वाभाविकी प्रकृतिप्रदत्ता च विद्यते। परस्परसाहाय्येन एव धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयानां सिद्धिः भवति। उक्तं च–

विवाहादेव सत्सृष्टिः सत्सृष्ट्यैव जगत्त्रयम्।
चतुर्वर्गफलावाप्तिस्तस्मात्परिणयः शुभः॥ इति।

भारतीयसंस्कृतिः कदापि भोगेच्छाम् ऐश्वर्यकामनां वा दोषत्वेन न मन्यते परन्तु मानवाः पशवः यथा न स्युः तस्मादेव नितियुक्ताम् एकां व्यवस्थां निर्माति। अस्यैव निदर्शनमस्ति ईशावास्योपनिषदि 'तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्'[२] इति। अर्थात् अनैतिकतां कर्महीनतां च परित्यज्य संयमपूर्वकं भोगमाचर। अत एव पुरुषार्थेषु कामार्थयोः अपि स्थानं विद्यते। विवाहेन देव-ऋणात् यज्ञानुष्ठानैः पितृ-ऋणात् सन्ततिभिः मुक्तिः प्राप्यते। पितरः तृप्ताः भवन्ति, नित्यनैमित्तिकयज्ञानुष्ठानैः देवाः तृप्तिं प्राप्नुवन्ति। अपि च सम्पूर्णं भूतं सर्वे चाश्रमाः

[२]ईशावास्योपदिषत्– १।

गृहस्थाश्रमाः भवन्ति। पुरुषार्थत्रयाणां सिद्धिरपि विवाहं विना न सम्भाव्यते इत्युक्तं 'पन्ती धर्मार्थकामानां कारणं प्रवरं स्मृतम्'[३] इति। एतस्मात् सर्वेषां मानवानां विवाहः आवश्यकः तस्य च सर्वथा साफल्याय शास्त्रोक्तनिर्देशः परमावश्यकः।

## ५. विवाहप्रकाराः

देशकालानुसारेण समये समये विवाहस्य अनेके प्रकाराः प्रचलिताः। विभिन्नेषु स्मृतिशास्त्रेषु विवाहस्य नैके प्रकारा अपि वर्णिताः। मानवगृह्यसूत्रे ब्राह्मः, शौल्कः (आसुरः) इति द्वौ एव विवाहप्रकारौ वर्णितौ। आपस्तम्बधर्मसूत्रे ब्राह्मो, दैवः, आर्षः, आसुरः, गान्धर्वः, राक्षसः इति षट् विवाहप्रकाराः उक्ताः। वसिष्ठधर्मसूत्रेऽपि एते षट् एव विवाहाः उल्लिखिताः विद्यन्ते।[४] मनुस्मृतौ, बौधायनगृह्यसूत्रे, महाभारतस्य आदिपर्वे, विष्णुधर्मसूत्रे, नारदस्मृतौ, कौटिल्यस्य अर्थशास्त्रे च विवाहस्य अष्टौ भेदाः वर्णिताः। एतेभ्यः मन्ये भिन्नः प्रकारः न सम्भवति। विवाहस्य इमे अष्टौ भेदाः मनुस्मृतौ कथिताः। ते च–

ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥ इति। [मनुस्मृतिः– ३।२१]

एतेषु उपरितनाः चत्वारः प्रशस्ताः अधस्तनाश्च अप्रशस्ताः मन्यन्ते। अष्टानां शास्त्रसम्मतत्त्वेऽपि याज्ञावल्क्यादीनां मते तु न सर्वे उत्कृष्टाः। एते प्रकाराः यथा–

### ५.१. ब्राह्मः

वरम् आहूय वस्त्रं आच्छाद्य च सद्गुणसम्पन्नाय श्रुतिशीलवते च पितभ्यां कन्यायाः दानं यस्मिन् सः ब्राह्मविवाहः इत्यभिधया अभिधीयते। यथोक्तं मनुना–

आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम्।
आहूय दानं कन्याया ब्रह्मो धर्मः प्रकीर्तितः॥ इति। [मनुस्मृतिः– ३।२७]

### ५.२. दैवः

ज्योतिष्टोमादियज्ञेषु पुरोहिताय कन्यायाः दानं यस्मिन् विवाहे विधीयते स विवाहः दैवविवाहः इत्याख्यया प्रसिद्धः। यथोक्तं मनुस्मृतौ–

यज्ञे तु वितते सम्यग् ऋत्विजे कर्म कुर्वते।
अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते॥ इति। [मनुस्मृतिः– ३।२८]

---

[३]याज्ञवल्क्यस्मृतिः– १।५१

[४]हिन्दुशास्त्रमते विवाह (वङ्गभाषीयो ग्रन्थः), पृ० १४।

किञ्च उक्तं च बौधायनगृह्यसूत्रे– 'दक्षिणासु दीयमानास्वन्तर्वेदि यदृत्विजे स दैवः'[५] इति।

## ५.३. आर्षः

यज्ञादौ अवश्यकर्तव्यवशात् वरात् गौः स्वीक्रियते परन्तु तस्मै सुता प्रदीयते सा विवाहः आर्षविवाहः इत्यभिधया प्रसिद्धः। यथा हि मनुस्मृतौ–

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते॥ इति। [मनुस्मृतिः– ३।२९]

## ५.४. प्राजापत्यः

'उभौ चरतां धर्ममिति वाचानुभाष्य च'[६] यस्मिन् विवाहे वराय कन्या प्रदीयते सः प्राजापत्यः इत्याख्यातः। अथवा धनादिना यस्मिन् वरपक्षस्य आनुकूल्यं स्वीक्रियते स प्राजापत्यविवाहः। स्मृतिशास्त्रादौ विवाहोऽयं सर्वापेक्षया उत्कृष्टरूपेण वर्णितः। वर्णितं च मनुस्मृतौ–

सहाभौ चरतां धर्ममिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥ इति। [मनुस्मृतिः– ३।३०]

## ५.५. आसुरः

स्वेच्छानुसारेण कन्यायाः पित्रे स्वजनेभ्यः वा यथाशक्ति अर्थं प्रदीय यस्मिन् विवाहे वरः कन्यायाः ग्रहणं करोति स विवाहः आसुरविवाहः। अस्मिन् विवाहे कन्यायाः अर्थैः क्रयणं भवति तस्मात् विवाहः अयं न उत्कृष्टत्वेन स्वीक्रियते। उक्तं च मनुना–

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः।
कन्याप्रदानं स्वाच्छान्द्यादासुरो धर्म उच्यते॥ इति। [मनुस्मृतिः– ३।३१]

## ५.६. गान्धर्वः

गृहस्थजनानां सम्मतिम् अनपेक्ष्य एव नारीपुरुषौ यदा अनुरागवशात् मैथुनेच्छावशात् विवाहं कुरुतः स च गान्धर्वविवाहः इति कथ्यते। इदानीं काले च गान्धर्वविवाहस्य एव आधिक्यं परिलक्ष्यते। निगदितं च मनुस्मृतौ–

इच्छयान्यन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्वः स तु विज्ञेयो मैथुन्यःकामसम्भवः॥ इति। [मनुस्मृतिः– ३।३२]

---

[५] बौधायनगृह्यसूत्रम्– १।२।२०।

[६] मनुस्मृतिः– ३।३०।

## ५.७. राक्षसः

बलात् यदा विवाहे बाधकत्वेन उपस्थितान् कन्यापक्षान् हत्त्वा छित्त्वा च कन्याम् अपहृत्य विवाहः क्रियते स राक्षसः इत्याख्यया आख्यायते। यथा हि मनुस्मृतौ–

हत्त्वा छित्त्वा च भित्त्वा च क्रोशन्ती रुदतीं गृहात्।
प्रसह्य कन्यां हरतो राक्षसो विधिरुच्यते॥ इति। [मनुस्मृतिः– ३।३३]

## ५.८. पैशाचः

निद्राभिभूतां मत्तां रोगादिवशात् प्रमत्तां वा कन्यां सम्भोगकारणात् यः विवाहः भवति स पैशाचविवाहः इति प्रख्यातः। अष्टसु विवाहेषु पैशाचविवाहः अयं सर्वापेक्षया निकृष्टतमः। उक्तं च मनुस्मृतौ–

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः॥ इति। [मनुस्मृतिः– ३।३४]

## ६. औचित्यविचारः

विवाहप्रक्रिया पूर्णतो गम्भीरा दायित्वपूर्णा चास्ति। शास्त्रेषूक्तान् प्रकारान् विहाय अन्येषां तु सामाजिकी स्वीकृतिः नास्ति। कारणं हि हठात् कामावेशाद् धनलोभाच्च कृतो विवाहः यथायथ सामञ्जस्य अभावात् दीर्घसूत्रतां न गच्छति। विशेषं प्रयोजनम् अभिलक्ष्य जाताः विवाहाः तत् प्रयोजनं तु पूरयन्ति परन्तु मूलम् उद्देश्यं पूरयितुं न क्षमन्ते। यथा राजनीतिम् उद्दिश्य क्षत्रियेषु प्राचीनकाले विवाहः प्रचलितः आसीत्। एवमेव कामपूर्तिम् अभिलक्ष्य गान्धर्वविवाहः संस्कृतकाव्येषु नाटकेषु बहुत्र प्रतिपादितः परन्तु वर्तमानकाले गान्धर्वविवाहस्य कुपरिणाम एव दृष्टिपथम् आयाति। आसुरे विवाहे कन्यायै यद्धनं प्रदीयते स्म तस्य एव परिवर्तितं रूपं वर्तमानकालिकं यौतुकम्। विवाहप्रसङ्गे यथा कथञ्चिदपि धनस्य आदानं प्रदानं वा कर्तव्यम्। तथा करणे तु दम्पत्योः परस्परं विश्वासः नोत्पद्यते। अतः एव प्रशस्तेऽपि आर्षे विवाहे यज्ञाय दीयमानं धनं मनुना निन्दितम्। विवाहे वराय कन्यायाः दानं भवति तस्य च महत् पुण्यं कल्प्यते तत्र न कश्चित् विनिमयः न शोभायुक्तः। सर्वैः स्मृतिकाराः तु ब्राह्मदैवार्षप्राजापत्यान् एव विवाहान् प्रशस्तविवाहत्वेन स्वीकृतवन्तः। यथा हि मनुस्मृतौ–

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः।
राक्षसं क्षत्रियस्यैकम् आसुरं वैश्यशूद्रयोः॥ इति। [मनुस्मृतिः– ३।२४]

एतन्मते तु ब्राह्मणानां ब्राह्मदैवार्षप्राजापत्याः एव चतस्त्रः विवाहाः समीचीनाः। क्षत्रियाणां तु राक्षसविवाहः एव प्रशस्तः। वैश्यशूद्रयोः तु आसुरविवाहस्तु प्रशस्तः। तस्मात् विधिपूर्वकः एव विवाहः कर्तव्यः। विधिं विना कन्यायाः भार्यात्वं वरस्य च पतित्वमेव न स्यादिति प्रोक्तं याज्ञवल्क्यस्मृतौ– 'पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे' इति।[७]

## ७. वयोविचारः

हिन्दुशास्त्रज्ञाः बहुधा चिन्तयन्तः अपि विवाहस्य समुचितं कालं निर्णेतुम् अशक्याः सञ्जाताः। मनुमते त्रिंशद्वर्षियः पुरुषः द्वादशवर्षीयां कन्यां विवाहं करोति। किञ्च चतुर्विंशतिवर्षीयः पुरुषः अष्टमवर्षीयां कन्याम्। अर्थात् विवाहकाले वरस्य वयः कन्यापेक्षया त्रिगुणम् अधिकं भवेत्।[८] उक्तं च मनुस्मृतौ–

त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥ इति। [मनुस्मृतिः– ९।९४]

विष्णुपुराणेऽपि विवाहस्य वयःसम्बन्धीयं वचनम्– 'वर्षैरेकगुणानां भार्यामुद्वहेत् त्रिगुणः स्वयम्'[९] इति। अर्थात् विवाहमनाः वरः स्वापेक्षया त्रिगुणन्यूनां कन्यां स्वीकरोति। ऋग्वेदानुसारं सूर्यायाः विवाहः तदा अभवत् यदा सा पतिं कामयमाना आसीत्। विवाहविषये जानन्ती एव कन्या पतिं कामयते, सा च ऋतुमती भवति यतः ऋतुदर्शनेन कामपूर्तये पतिकामना जायते। अतः ऋतुदर्शनात् पूर्वम् उतः वा ततो त्रिवर्षाभ्यन्तरम् एव विवाहस्य कालो निर्धार्यते। वरश्च वयसः प्रथमभागं गुरुकूलेऽधीत्य पञ्चविंशद्वर्षीयो गृहस्थाश्रमं प्रवेष्टुकामः स्यात्। वसयः निर्धारणं स्वास्थ्यविज्ञानसम्मतं विवाहाय च सर्वोत्तमं विद्यते।

## ८. वरवध्वोः उत्तमता

धर्मशास्त्रेषु स्मृतिग्रन्थेषु च वरवध्वोः योग्यताविचारकाले उत्तमता निर्णिता वर्तते। वरः ब्रह्मचारी विद्वान् कुलशीलसम्पन्नः च भवेत्। कन्या च सर्वतः सौन्दर्ययुक्ता शुशीला कुलसम्पन्ना च भवेत्। यथा मनुना वरवध्वोः योग्यताविषये उक्तम्–

---

[७] याज्ञवल्क्यस्मृतिः– १।३६।

[८] हिन्दुशास्त्रमते विवाह (वङ्गभाषीयो ग्रन्थः), पृ० ३२।

[९] विष्णुपुराणम्– ३।१०।१६।

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्।
तनुलोमकेशवदनां मृद्वङ्गीमुद्वहेत् स्त्रियम्॥ इति। [मनुस्मृतिः– ३।१०]

अर्थाद् अङ्गवैकल्यहीनां सौम्यनाम्नीं हंससदृशां हस्तिसदृशां वा मृदुगामिनीं दीर्घलोमदन्तकेशविहीनां कन्यां च विवाहं कुर्यात्। विशेषतो वरस्य विद्वत्त्वं पौरुषः कुलम् आचारः, कन्यायाश्च रूपं स्त्र्युचितसौम्यलक्षणं प्रजननक्षमता शीलञ्च परिक्ष्यते। एते गुणसम्पन्नाः विवाहाय उत्तमाः भवन्ति। अद्यत्वे केवलं वरस्य धनराशिः कन्यायाः रूपम् एव परीक्ष्यते येन कदाचिद् अद्यतनीयेषु विवाहेषु सुखस्य लेशमात्रम् अपि न दृश्यते। तस्मात् विवाहकाले वरवध्वोः योग्यताविचारेण उत्तमता निर्णेया, येन वैवाहिकं सुखं चिरं तिष्ठेत्।

## ९. सवर्णविवाहः

वर्तमानकाले आधुनिकेषु सवर्णसगोत्रियपरीक्षाविषये महान् विवादो विद्यते किन्तु शास्त्राकाराणाम् अत्र स्पष्टः निर्देशः वर्तते। गीतायां युद्धस्य कुपरिणामं गणयन् अर्जुनो वदति– 'स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंङ्करः।'[१०] इति।

तस्माद् असवर्विवाहः न कार्यः। ब्राह्मणानां ब्राह्मणकन्या एव विवाहनीया। तथैव अन्येषामपि वर्णानाम्। स्मृतिधर्मशास्त्रकाराः सर्वदा सवर्णविवाहस्य एव प्रशस्तिं कृतवन्तः। परन्तु असवर्णविवाहः सर्वदा शास्त्रकारैः निषिद्धः आसीत् इति तु वक्तुम् अशक्यम्। मनुस्मृतौ एव उक्तम् अस्ति–

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्माणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः॥ इति। [मनुस्मृतिः– ३।१२]

अर्थाद् ब्राह्मण-क्षत्रिय-वैश्यानां द्विजातीयानां तु प्रथमे विवाहे सवर्णा एव प्रशस्ता। यदि सा सवर्णीया पुत्रोत्पादने अक्षमा भवति तर्हि असवर्णविवाहः शक्यः। परन्तु धनलोभात् कामात् योऽसवर्णविवाहः पातकारकत्वेन गण्यते। उक्तं च मनुस्मृतौ–

हीनजातिस्त्रियं मौहादुद्वहन्तो द्विजातयः।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम्॥ इति। [मनुस्मृतिः– ३।१५]

वस्तुतो वर्णव्युत्क्रमे संस्कृति-सभ्यता-आचार-विचारव्युत्क्रमो भवति येन स्वभावस्य वैषम्यं जायते तेन च उभयोः मध्ये सम्यक्तया सामञ्जस्यं न तिष्ठति।

---
[१०] श्रीमद्भगवद्गीता– १।४१।

सन्तानेषु अपि नकारात्मकः प्रभावो भवति। तस्मात् शास्त्रेषु असवर्णविवाहस्य एव प्रशस्तिं कृतवन्तः शास्त्रकाराः।

## १०. असगोत्रीयविवाहः

न केवलं भारतवर्षेऽपि तु विश्वस्य सभ्यासभ्यबर्बरेषु अपि जातिषु सगोत्रीयः विवाहः सर्वथा निषिद्धः अस्ति। गोत्रप्रवर्तकाश्च अष्टौ ऋषयः वर्तन्ते। एतेषाम् पुत्रादयः एव गोत्रनाम्ना अभिधीयन्ते।[११] यत्र जातिः नास्ति तत्र धार्मिकचिह्नद्वारा गोत्रनिर्णयो भवति। शास्त्रेषु अपि सगोत्रीयविवाहस्य महान् विरोधः वर्तते। नारदस्मृतौ अविवाह्याः सगोत्राः स्युः समानप्रवरास्तथा[१२] इति उक्तम् अस्ति। प्रवरस्तु गोत्रप्रवर्तकस्य मुनेः व्यावर्तको मुनिगण इति माधवाचार्यः। परन्तु आश्वलायगृह्यसूत्रे पराशरगृह्यसूत्रे च समानगोत्रविषयकविवाहस्य उल्लेखः नैव विद्यते।[१३] स्वगोत्रविवाहे तु पौरुषं क्षीणतां गमिष्यति। आधुनिकानामपि प्राणिशास्त्रीयाणां मतमस्ति यद् अन्तः विवाहेन वंशस्य द्वितीये तृतीये वा क्रमे मानवस्य आकृतेः विकारं लभते तथा शारीरिकसंरचनायाः महती क्षतिः भवति। स्मृतिचिन्तामणिनामके ग्रन्थे हरिदाससिद्धान्तवागीशः अपि सगोत्रीयविवाहं निराकृतवान्। यथा हि तेन उक्तम्–

> पित्रादीनां सप्तानां प्रत्येकतः सप्तमीपर्यन्ता कन्या नोद्वाह्या।
> मातामहादीनां पञ्चानां प्रत्येकतः पञ्चमीपर्यन्ता कन्या नोद्वाह्या॥ इति।

## ११. मुहूर्तविचारः

हिन्दुधर्मे तु विवाहे मुहूर्तविचारस्य स्थानं महत्तमम्। ज्योतिःशास्त्रे, आयुर्वेदशास्त्रे, कामशास्त्रे च विवाहस्य मुहूर्तविषयिका महती आलोचना विद्यते। गुरु-शुक्र-बुध-सोमवासरेषु च विवाहः प्रशस्तो भवति। अमावास्या-चतुर्थी-नवमी-चतुर्दशी चेति तिथयो विवाहे अशुद्धाः भवन्ति। रेवती-उत्तरफल्गुनी-उत्तराषाढा-उत्तरभाद्रपदा-रोहिणी-मृगशिरा-मूला-अनुराधा-मघा-हस्त-स्वाति-प्रभृतीनि नक्षत्राणि विवाहे शुभानि विद्यन्ते। मार्गशीर्ष (अग्रहायण)-माघ-फाल्गुन-वैशाख-ज्येष्ठमासाः च संप्रशस्ताः स्वीक्रियन्ते। कन्यायाः जन्ममासः शुभत्वेन स्वीकृतः

---

[११] एतेषां यानि अपत्यानि तानि गौत्राणि मन्यन्ते इति स्मृतेः इति उद्वाहतत्त्वं, पृ० २३।

[१२] नादरस्मृतिः, स्त्रीपुंसंयोगः, ७।

[१३] हिन्दुशास्त्रमते विवाह (वङ्गभाषीयो ग्रन्थः), पृ० २५।

परन्तु वरस्य तु अशुभत्वेन स्वीकृतः। विवाहः दिने न भूत्वा रात्रौ एव भवेत्। तदेव कालानुसारं श्रेष्ठतरं भवति। दिवा विवाहे सन्तानसुखस्य लाभालाभशङ्का व्यक्ता भवति। सत्येव अद्यतीयाः ये केचित् समाजसुधकराः महाशयाः निशाविवाहस्य विरोधं, दिवाविवाहस्य च अनुरोधं प्रकटयन्ति, तैरस्य कुपरिणामे अवधानं देयम्।

## १२. विधयः

हिन्दुविवाहपद्धत्याः प्रमुखाङ्गं भवति कन्यादानम्। यथाकालं शुभमुहूर्ते द्वयोः पक्षयोः बन्धुजनैः यथाशक्यं निरीक्षणोत्तरं वाग्दानं, ततः ऊर्ध्वं च विवाहवेद्यां शान्तिपूर्वकम् अग्निसाक्ष्यादिकतिपतदेशीयप्रथाभिः सह वैदिकविवाहप्रक्रिया समारभ्यते। कन्यादानावसरे पिता ईश्वरं देवान् प्रकृतिश्च साक्षीकृत्य– 'तुभ्यं विप्र मया दत्ता पुत्रपौत्रविवर्धिनी'[१४] इति वदति। एतेन स्पष्टं भवति यत् कन्यादानं सृष्टिप्रक्रियायाः विस्ताराय भवति सा च पूर्णतो नैसर्गिकी प्रक्रिया। सनातनहिन्दुधर्मस्य विवाहे च केचन विधयः परिपाल्यन्ते–

### १२.१. अग्निप्रज्वलनम्

विवाहे प्रमुखः विधिः भवति अग्निप्रज्वलनम्। अग्निश्च विवाहेषु साक्षिरूपेण तिष्ठति। वराय कन्यादानं च वंशसंरचनाय भवति। अग्निः ऊष्मायाः अधिष्ठातृदेवः भवति, स्त्रीषु संक्रमणेन सन्तानोत्पत्तिक्षमतां विकाशयति। अत्र प्रमाणमपि विद्यते– 'वसन्ति अग्नयो यस्मिन् कालेऽसौ वसन्तः' इति। ऋतौ अस्मिन् सर्वत्र पञ्चाग्नीनां प्रवाहो भवति येन प्रकृतिस्वरूपे नावीन्यं नौतन्यम् आयाति। एतच्च सत्यं यत् अग्निः स्त्रीषु गर्भधारणक्षमताम् आदधाति। एतस्मादेव विवाहे अग्नेः साक्षित्वम् अग्निप्रदक्षिणं च परमम् आवश्यकं भवति, येन वरः अग्नितः कन्यां प्राप्य वंशवृद्धिम् इच्छति।

### १२.२. पादस्पर्शनम्

विवाहविधिषु अन्यतमं भवति वरेण कन्यायाः पादस्पर्शनम्। जीवने केवलम् एकवारं पतिः पत्न्याः पादं स्पृशति, तदपि कन्यायाः मनः स्वस्मिन् स्थीरिकर्तुं दृढीकर्तुं, वक्ति च वरः– 'आरोहेमम् अश्मानम् अश्मेव त्वं स्थिरा भव'[१५] इति। अर्थात् त्वं विपत्सु अपि विचलिता मा भव, स्थिरा तिष्ठ, चरणे स्पृष्ट्वा प्रार्थये।

[१४] पास्करगृह्यसूत्रम्– १।४।१४।
[१५] शाङ्खायनगृह्यसूत्रम्– १।८।१९।

## १२.३. हृदयस्पर्शः

मम व्रते ते हृदयं दधामि, मम चित्तमनुचित्तं तेऽस्तु इति हृदयं स्पृष्ट्वा वरः प्रतिजानीते यत् स्वसङ्कल्पेषु तव हार्दिकभावनानां समादरं विधास्यामि कदापि तव इच्छायाः विपरीतं निर्णयं न ग्रहीष्यामि, अथ त्वं मम चित्तानुगामिनी भव। मम निर्णयः तव निर्णयः अस्तु सर्वत्र ऐकमत्यं हार्दिकञ्च साहचर्यं स्यात् आवयोः।

## १२.४. मङ्गलसूत्रप्रदानम्

विवाहविधिषु अन्यतमं भवति वध्वोः गले मङ्गसूत्रप्रदानम्। इदानीं तु प्रायः सर्वत्र विवाहेषु अयं विधिः दृश्यते। परन्तु मन्ये अयं तु अस्माकं धर्मशास्त्रविहितं नास्ति। तथापि आधुनिकेषु विवाहेषु अस्य बहुलप्रचारः परिलक्ष्यते। कन्यायाः गले मङ्गलसूत्रदानेन विवाहः समाप्यते। एतेन कन्यावरयोः एकात्मत्वं स्थाप्यते। किञ्च सिन्दुरदानमपि विवाहस्य अन्यतमः विधिः।

## १२.५. सप्तपदी

कामनाप्रसङ्गे सप्तपदिविधेः बहुमहत्त्वम् अस्ति। उक्तं च पतित्वं सप्तमे पदे। पतित्वमपि कामना एका विद्यते या सप्तमे पदे काम्यते। विधौ अस्मिन् वरः एकैकं पदं कन्यया सह एकैकां कामनां कामयते। यथा एकमिषे विष्णुस्त्वा नयति इति ऐश्वर्याय प्रथमं पदम्। अस्मिन् पदे दम्पती भगवते खाद्याभावं प्रार्थयेते। एवम् ऊर्जसे द्वितीयं पदम्। अस्मिन् पदे यथा दम्पतिभ्यां भगवते मानसिकं शारीरिकं च शक्तिमत्त्वं प्रार्थ्यते। तृतीयं पदं च भूत्यै। पदम् इदं च दम्पत्योः आध्यात्मिकस्य दायित्वस्य परिपूर्तये। सुखेभ्यः चतुर्थं पदम्। अनेन पदेन दम्पत्योः सुखम् आयाति। पञ्चमं पदं च पशूनां परिपालनाय संरक्षणाय च। ऋतुभ्यः षष्ठं पदं निधाप्य– 'सखे सप्तपदा भव सा माम् अनुव्रता भव'[१६] इति सम्पमे पदे वरः कामयते। सर्वैः सह पत्नी पतिं प्रीणीयात् तथा जीवने तस्याः प्रत्येकं पदं पत्युः समुन्नत्यै स्याद् इति आशासे पतिः। अथ सर्वविधैः ऐश्वर्यैः सह महायज्ञे अस्मिन् सर्वतो रक्षायाः आरोग्यस्य अपि कामना विधीयते।

## १३. विवाहसंस्कारस्य उद्देश्यम्

षोडशसंस्कारेषु विवाहसंस्कारः अन्यतमः। अस्य उद्देश्यम् अपि महत्। धर्मार्थकामरूपत्रिवर्गसाधनं तु विवाहेन एव भवति। धर्मशास्त्रोक्तविवाहः एकः दायित्वपूर्णः संस्कारो विद्यते, येन भुक्तिः, मुक्तिश्च उभौ सिध्यतः। विवाहसंस्कारस्य

[१६]पारस्करगृह्यसूत्रम्– १।८।१।

मूलोद्देश्यस्य साधनाय धर्मशास्त्रकाराः स्मृतिधर्मग्रन्थेषु बहुधा उक्तवन्तः। विवाहसंस्कारस्य मुख्यम् उद्देश्यं तु यथा दम्पती उभौ मिलित्वा एव जीवनं यापयेताम्। उक्तं च मनुना–

अन्योन्यस्याव्यभिचारो भवेदामरणान्तिकः।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः॥ इति। [मनुस्मृतिः– ९।१०१]

जम्पत्योः कर्तव्यं तु आवैदिककालाद् एव वेदेषु उच्यते। ऋग्वेदे उक्तम्– 'संजानानो उप सीदन्नभिज्ञु पन्तीवन्तो नमस्यं नमस्यान्'[१७] इति। अर्थात् पुरुषाः तेषां स्त्रीन् अग्नेः समीपे देवतावत् पूजयेयुः। आपस्तम्भधर्मसूत्रे दम्पत्योः कर्तव्यविषये उक्तम्– 'जायापत्योः न विभागो दृश्यते। पाणिग्रहणात् तु सहत्वं कर्मसु। तथा पुण्यफलेषु द्रव्यपरिग्रहेषु च'[१८] इति। रामायणे अश्वमेधयज्ञे अपि सीतायाः निर्वासनकारणात् रामेण सीतायाः काञ्चनमूर्तिः निर्माता। यथा हि रामायणे–

काञ्चनीं मम पत्नीञ्च दीक्षायां ज्ञांश्च कर्मणि।
अग्रतो भरतः कृत्वा गच्छत्वग्रे महायशाः॥ [उत्तरकाण्डम्– ९१।२५]

एतेन सम्पत्योः सहधर्मत्वं ज्ञायते। तस्मात् पत्नी सहधर्मिणी इत्यधिभया अभिधीयते। तस्मात् मन्ये एतत् वक्तुं शक्यते यत् विवाहसंस्कारस्य प्रधानम् उद्देश्यं तु दाम्पत्यजीवनस्य परिपालनं रक्षणं च।

## १४. उपसंहारः

अनेन वैदिकस्मृतिशास्त्रीयविधिविधानेन सम्पद्यमानस्य हिन्दुविवाहस्य शास्त्रीयरीतिनितिनिरीक्षणपरिक्षणेन एतत् सर्वं विस्पष्टं भवति यत् विवाहंसंस्कारस्य मूलम् उद्देश्यं तु त्रिवर्गसाधनं पुत्रपौत्रविवर्धनं च। तस्मादेव रघुवंशीयानां गुणवर्णने कालिदासः वर्णयति– 'प्रजायै गृहमेधिनाम् इति। सन्तानाय एव दारपरिग्रहणं न तु भोगाय'[१९] इति। विवाहसंस्कारस्य भित्तिः एव पुत्रपौत्रविर्वधनम्। विवाहस्य आचाराः मन्त्राः दायित्वोद्बोधकाः भवन्ति। एतत् सर्वं धर्माचरणाय अनुष्ठीयते, अतः एव पन्ती धर्मपत्नी इति कथ्यते, न तु कामपत्नी। शास्त्रकाराः

---

[१७]ऋग्वेदः– १।७२।५।

[१८]आपस्तम्भधर्मसूत्रम्– २।६।१३।१७-१८

[१९]प्रजायै सन्तानाय गृहमेधिनां दारपरिग्रहणानां न तु कामोपभोगाय इति मल्लिनाथः, रघुवंशम्–१।७

स्मृतिकाराश्च विवाहप्रक्रियां मानवस्वभावम् अभिलक्ष्य सर्वतः कल्याणम् उद्दिश्य एव प्रतिपादयामासुः।

परन्तु अद्यत्वे तु अशान्तवातावरणे अनेकधा किल विसंगतीनां प्रादुर्भावः संप्रजातः। न्यायालयेषु माल्यं परिधाप्य लघुना उपायेन विवाहः सम्पद्यते पुनः कञ्चित् कालं भोगविलासौ विधाय न्यायालये एव सम्बन्धविच्छेदो विधीयते। यद्यपि पुरा अपि विवाहविच्छेदः आसीत्। हिन्दुविवाहेऽपि तस्य स्वीकारोऽस्ति। परं कस्यापि मनोरञ्जनाय कामाभिलाषाय वैयक्तिकसुखभोगाय वा नैव आसीत्। अद्यतनीयस्य विवाहविच्छेदस्य मूलहेतुस्तु बहुधा यौतुकलाभस्य मनोगतः स्वार्थभावः अस्ति। एतस्मात् एतादृशी जीवनशैली स्वीकरणीया यस्यां भौतिकताया आध्यात्मिकायाश्च समावेशः स्यात्। धर्मशास्त्रोक्तविवाहे उभयोः सर्वथा समादरो विद्यते अत एव प्राचीनकाले अद्यापि विवाहः असौ सफलः सार्थकश्च विद्यते इति शम्।

# तारापदभट्टाचार्यस्य कथाद्वादशः
# विहङ्गावलोकनम्


## प्रणवकुमारवरः*


## भूमिका

आधुनिकविश्वसाहित्ये "लघुकथा" नाम या धारणा सम्प्रति विकशिता सा धारणा किञ्चित् कालानुरोधात् किञ्चिदनुकरणात् सर्वोपरि पारस्परिकादानप्रदानाच्च कलेवरप्राप्ता। अद्य हि कथानकानां ये प्रकाराः लघुकथा[१] इत्याद्यभिधानैः सुपरिचितास्तेषां भारतीयसाहित्योद्याने प्रवेशो बङ्गीयसाहित्यद्वारेणैव जातः। प्रसङ्गेऽस्मिन् देवर्षेः कलानाथशास्त्रिणः 'आख्यानवल्लरी' इत्याख्ये स्वकीयग्रन्थस्य आमुखे समर्थनं प्राप्यते। बङ्गीयसाहित्ये चैतेषां प्रवेशः पाश्चात्यप्रभावादेवेति बहुजनमतसिद्धम्। के.वि.राघवन्महोदयेनापि स्वीकृतं यत्– लघुकथायां वर्तमानरूपमवलोक्य एतद्वक्तुं शक्यते यत् संस्कृतं पाश्चात्यसाहित्यस्य समीपे ऋण्यस्तीति[२] तथैवोचितमेव भाति। ऋताचट्टोपाध्यायः संस्कृतलघुकथाजगति तारापदः स्वयमेव शततुल्यः[३] इति प्रमाणयति। स्वल्पातिस्वल्पव्याप्त्यैव लघुकथा उन्नतं बृहत्तमं सत्यं प्रकाशयति। लघुकथा इत्युक्ते प्रतीतिः (Impression) जाता संक्षिप्ता गद्यकथा। यस्याः आशयः काञ्चिद्घटनां कञ्चित्परिवेशमुत कञ्चिन्मानसिकतामवलम्ब्य ऐक्यसांकट्यात् समग्रतालाभः।[४]

---


*शोधच्छात्रः, संस्कृतविभागे, पश्चिमवङ्गराज्यविश्वविद्यालयस्य


[१]काहानी (हिन्दी), छोटगल्प (बङ्गः), Short Story (आङ्गलम्), उपन्यासः (Novel), उपन्यासिका (Novelette)

[२]संस्कृतलिटरेचर- इनकन्टेम्परारीइन्डियान्लिटारेचर, वि.राघवन, साहित्यएकाडेमी, दिल्ली, 1957, पृ. 225

[३]"संस्कृत छोटगल्पेर जगते तारापद एकाइ एकशो" (बङ्गभाषीयो ग्रन्थः)– ऋता चट्टोपाध्यायः, छोटगल्प ओ नाटक , पृ– 25

[४]छोट गल्प हच्छे प्रतीति जात एकटि संक्षिप्त गद्य काहिनी यार एकतम व्यक्त ये कोन घटना वा कोन परिवेश वा कोन मानसिकताके अवलम्बन करे ऐक्य-संकटेर मध्य दिये समग्रता लाभ करे। साहित्ये छोटगल्प, नारायण गङ्गोपाध्याय, पृ– 173 (Impression)

## लघुकथाकारतारापदभट्टाचार्यस्य आत्मपरिचयः

सम्प्रति लेख्यमानेषु लेखकेषु अन्यतमः तारापदभट्टाचार्यः अविभक्तबङ्गदेशस्य[५] ढाकाविक्रमपुर इति जिलायां १९२५ तमे क्रीस्ताब्दे जातः। कलिकाताविश्वविद्यालयात् स्नातकोत्तराध्ययनं गवेषणां च साधितवान्। तस्य अध्यापनक्षेत्रं कलिकातायाः चारुचन्द्रमहाविद्यालयः रवीन्द्रभारतीविश्वविद्यालयश्च आस्ताम्। संस्कृतसाहित्यपरिषत्पत्रिकायां तस्य कथासमूहाः प्रकाशिताः। प्रायः चत्वारिंशद्वर्षाधिककालं यावत् सः कलिकातायाः भवानीपुरक्षेत्रे उषितवान् चेदपि तस्य कथायाः प्रेक्षापटः अवश्यमेव बङ्गीयग्रामः आसीत्। ग्रामस्य प्रकृतिः ग्राम्यजीवनस्य सारल्यं काठिन्यं जटिलता च ग्राम्यसंस्कृतेः गभीरता विस्तारं च तस्य कथायां वारं वारं प्रत्यागच्छन्ति। ग्रामकथां वक्तुमेव स सरलताम् अनुभवतीति भाति। मनुष्यः एव तस्य कथायाः केन्द्रबिन्दुः। कदापि नवमनस्तत्त्वमुपस्थापयति, कदापि दाम्पत्यजीवनस्य जटिलतां रहस्यं च उद्घाटयति, कदापि च समसामयिकसमस्यां निरूपयति। लघुकथायाः क्षुद्रपरिसरे कुत्रापि सूक्ष्माङ्कन्या, कुत्रापि स्थूलाङ्कन्या नूतनाङ्गिके गभीरव्यञ्जनया अङ्कितवान्नस्ति सुन्दराणि मनोहराणि चित्रवच्चिन्तनानि। तस्य रचनायाः प्रधानं वैशिष्ट्यमेव कथायाः प्राणप्राचूर्यत्वम्। कथासरितादिषु पत्रिकासु तस्य प्रकाश्यमानाः कथाः अधुनापि जनाभिरुचेः केन्द्रे एव तिष्ठन्ति।

## तारापदभट्टाचार्यस्य श्रेष्ठकृतिः कथाद्वादशः

कथाद्वादशः इत्यस्मिन् कथासंकलने द्वादशः कथाः २०११ क्रैस्ताब्दे संस्कृतसाहित्यपरिसत्, कलिकातातः सङ्ग्रहरूपेण प्रकाशिताः। संस्कृतपुस्तकभाण्डारात्, कलिकातातः मुद्रितश्च। तस्य कथाः आकृतिगतरूपेण क्षुद्राः बृहत्यः यद्वा भवन्तु नाम, वस्तुतः ताः स्वकीये वक्तव्ये बलिष्ठाः दृढाः सजीवाः च भवन्ति। भारतीयदर्शनं तस्य लीलाक्षेत्रम्। अतः कथाशरीरस्य शिराभिः धमनीभिः प्रवहति दार्शनिकतायाः स्रोतः। दर्शनस्य प्रवाहशीलः स्रोतः तस्य कथानाम् अस्थि-मज्जासु सर्वत्र प्रवाहशीलः। वस्तुतः तस्य कथा तु दर्शनमयशरीरधारिणी। तस्य कथाशैली हास्यव्यङ्गात्मिका दृढप्रत्ययिनी करुण-शृङ्गारमूला वा भवतु नाम, तस्य कथायां भारतीयदर्शनस्य निर्यासः निरन्तरप्रवाहशीलः तिष्ठति एव। कदापि तस्य एतादृशः प्रयोगः अप्रासङ्गिकः

---

[५] अधुना बांलादेशस्य

अवान्तरः वेति नानुभूतः। दृष्टान्तार्थं तावत्– लघुशिशवः क्रमशः वर्धते एव…कालस्य नियमः अयमेव। कथाकारः वदति दार्शनिकवचः– "षड्भावविकाराः इति वदति वार्ष्यायणिः। जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति। सर्वं कालस्य कर्म"[६] इति।

पुष्पशोभितपलाशशाखां दृष्ट्वा सोपलब्धस्य गोपालस्य मनः सानन्दम् अस्फुटेन स्वरेण उच्चारयति उपनिषन्मन्त्रः– "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति।" पराणस्य मित्रस्य चरणस्य उक्त्यां परिहासेन उच्चार्यते गीतायाः वाणी– "यं यं भावं स्मरन् कलेवरं त्यजति, जन्मान्तरे तमेव भावमाप्नोति"[७] इति।

जन्मगतप्रतिभा प्रगाढनिर्मलशास्त्रज्ञानं निरलसाभ्यासः चैते काव्यसम्पदः कारणानि।[८] संस्कृतपरिभाषानुसारेण लघुकथापि गद्यकाव्यत्वेन श्रव्यकाव्यमेव। अतः लघुकथालेखकोऽपि कविरेव। अतः कथाकारः तारापदोऽपि कश्चित्कविः। बहुनिर्मलश्रुतेन तस्य रचना व्याप्ता दीप्ता च परिश्रुतज्ञानछटया। सांख्य-योग-न्याय-वेदान्तानां दार्शनिकोक्तिभिः विभूषिताः तस्य कथाः। गीता-धर्मशास्त्र-व्याकरणादिप्रसङ्गाः अपि वारं वारं तस्य रचनायां समागच्छन्ति।

प्रासङ्गिकतया "मैत्रेयी" इति कथायाः मूषिकदम्पत्याः संवादः स्मरणीयः अत्र।[९]

कथायां संलापयोजने बह्वनां आपत्तिर्वर्तते। कदाचित् तस्मात् नाटकेन

---

[६]इयं पृथ्वी

[७]पट्टकाष्ठिका, कथाद्वादशः।

[८]आचार्येण दण्डिना उक्तं यत्– नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम्। अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥

[९]–अत्र 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी' इति कृष्णवचनं प्रमाणम्। –वयं तु छिद्रान्वेषिणः। अत्र मनुवचनमनुसराः– 'विद्याच्छिद्रं परस्यतु'। –किन्तु भद्रे, एवं रात्रौ जागृत्वा परेषां द्रव्यं यत् खण्डखण्डं कुर्मस्तत्र को लाभः? –आर्यपुत्र, यद्यपि तं पण्डितताया भर्ता तथापि स्वयं न पण्डितः। –मा लज्जां देहि। –भगवान् कृष्ण आह– 'सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ' –ईदृशी पण्डिता त्वं कथं जाता भामिनी! –'स्वाभाविकी ज्ञानबलक्रिया च।' –सम्प्रति यस्या वाराणसीशाटिकां कृन्तावः सा कल्यमुत्थाय कि करिष्यति तद् भावयामि। –'कर्मण्येवाधिकारस्तु मा फलेषु कदाचन।' –परस्य अनिष्टम्। –'स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्विषम् ' –एतानि खण्डानि कथमपि नास्माकं प्रयोजनं साधयेयुः। –मासाधयन्तु। किन्तु हे स्वामिन् , इदमस्माकं सहजं कर्म। यथाहस्मनवनीतलोलुपः– 'सहजंकर्मकौन्तेयसदोषमपिनत्यजेत्।'

पार्थक्यहीनतायाः भयादेव तथा चिन्तयन्ति प्रायः ते। नाटकीयत्वं प्रयोगत्वं वा तारापदस्य कथायाः गुणः एव। भट्टतौतेन उक्तं "प्रयोगत्वमनापन्ने काव्ये नास्वादसम्भवः" इति। तदेव नाटकीयत्वं प्रयोगत्वं वा प्रायः सर्वस्यां कथायां विद्यमानमस्ति। आलोचयामः तावत् कथाः–

## पट्टकाष्ठिका[१०]

हास्यकथा एव व्याङ्गेन प्रच्छन्नतया समाजे स्थिताः निर्दयस्वार्थपरता अवक्षयः मुल्यबोधसाङ्कट्यं इत्यादीनां काचित् प्रामाण्याभिलेखा जाता इयं कथा। स्वमुखे गङ्गाजलमादाय पराणमण्डलः यदा घडघडायते स्म, तदा पराणस्य मरणकालः आगतः इति विचिन्त्य पराणपत्नी बङ्गमोहिनी पराणस्य परममित्राय बाल्यमित्राय चरणाय सूचनां प्रेषयति। यथासूचितः चरणः विपण्याः पट्टकाष्ठिकामादाय उपस्थितः– शवदाहार्थं मित्रमुखाग्निनिमित्तं यथाविहितव्यवस्थापनार्थं च। ततः चरणः बङ्गमोहिनी च पराणस्य परलोकगमनाय प्रतीक्षमाने भवतः। आह्वनेनापि प्रत्युत्तरं न कृत्वा पराणः मरणाभिनयं नटयति, तस्मात् पत्युः देहान्तरं विचार्य पराणपत्नी विलपन्ती भवति– मां त्यात्त्वा कुत्र गतवान् इति। चित्कारात् सुप्तोत्थितः पराणः जलमिच्छति। ततः परं कपटमृत्युपथयात्री पराणः कदलीगुच्छं पनसं च इच्छति। आसन्नमरणपराणस्य ललाटे तुलसीपत्रं स्थापयति मित्रं, पत्नी पत्युः मृत्युः समागतः इति विचिन्त्य हविषान्नं संगृह्णाति। पराणः न तु मृतः। वैद्यः ज्योतिषकः सर्वे च समागच्छन्ति दक्षिणामादाय प्रतिगच्छन्ति च। पराणः तु मरणं न प्राप्नोति, तस्मात् क्रुद्धा विरक्ता पराणपत्नी उक्तवती– "अयं जीवने मां ददाह, मरणेऽपि धक्ष्यति।" मित्रपत्नै पट्टकाष्ठिकां समर्प्य निराशः भूत्वा चरणोऽपि प्रतिगच्छति। तत्रैव कथा समाप्ता भवति। कथां पठन्तः वाचकाः हसनात् उल्लासिताः भवन्ति। दृढा संवादयोजना तत्र दृष्टिगोचरः भवति।[११]

मानवीयजटिलमनस्तत्त्वम्, विशेषतया दाम्पत्यसमस्या, द्वान्द्विकसंघातः चेत्यादिषु विषयेषु अस्ति तस्य चमत्कारी लेखनप्रतिभा।

---

[१०]कथाद्वादशः, २००४

[११]"चरणः पराणनिकेतनुपनीतः। बङ्गमोहिनी द्वारमुद्घाट्य सहास्य जगौ– ठक्कुरपुत्र! पराणो मृतः? न अधुनापि। किन्तु मरिष्यति। कुत्रासौ? द्वितले। गन्तव्यं मया। अग्रे सर। अशौचे जाते भोजनं न भविष्यति इति मया तूर्णं तत् समाप्यते। अर्धं जग्धम्। अवशिष्टं खादित्वा आगच्छामि।...हस्ते किम् तत्? –पट्टकाष्ठिका इति। तव तुला नास्ति। यदनागतं किन्तु आगमिष्यति सदा तत्र तव नयनम्।

## विषमप्यमृतम्[१२]

अस्यां कथायां पश्यामः प्रलम्बः इति कश्चित् सुदीर्घैः हस्तपादैः अवसरे सति मशकान् शुनकान् मार्जारान् ताडयन् भवति। काले तेन सह मन्दाकिन्याः विवाहः सञ्जातः। आचरणवशात् मन्दाकिनी अपि ताडिता भवति। "ताडनं क्रमशः गुरुतरं जातम्" इति। ततः परं "गतास्मि" "रक्ष मां" इत्यादि ध्वनिना प्रतिवेशिनः तां रक्षितुमागच्छन्ति। तदा सा एव मन्दाकिनी वैपरित्येन व्यवहरति। तन्मते पतिः पत्नीं ताडयेत् तेन प्रतिवेशिभिः चिन्ता न करणीया। अपि तु "भार्याप्रहारे भर्तुरधिकारोऽस्ति" इति वादमपि उत्थापयति। तद्देशीयेन रमापण्डितेन उपदिष्टः सः प्रलम्बः पत्नीताडनात् विरमति। आश्चर्यतया मन्दाकिनी इदानीं विमर्शा। प्रहारेण विना तत्सविधेः पतिः क्लीव एव। सा तस्मात् प्रेमशून्यतामनुभवति। पितृगृहञ्च गच्छति। प्रलम्बगृहे काचित् गोधापदी नाम नवपरिचारिका आगच्छति। सा प्रलम्बस्य शय्यासङ्गिनी अपि भवितुमिच्छति, भार्यात्वम् अप्यात्मीकर्तुमिच्छति। अनया सूचनया विचलिता मन्दाकिनी पतिगृहं प्रत्यागच्छति। किन्तु मन्दाकिन्याः भाषा प्रलम्बाय दुर्बोद्धा एव, आदरे अनीहा प्रहारे आसक्तिः। पुनः प्रलम्बः पुर्वरूपं प्रत्यागच्छति। पत्युः प्रहाररूपविषमेव मन्दाकिन्याम् अमृतसमानम्। रमापण्डितेन उपदिश्यते "अथ यदि आहारे तस्यास्तुष्टिः दीयतामाहारः। यदि प्रहारे कुरु प्रहारम्। भूतानुरूपो वलिः।" इति। "दाम्पत्यजीवनं खलु काव्यमेव।" सत्यमेव उक्तं कथाकारेण– काव्यं व्यञ्जनया एव सिध्यते खलु।

## शैवली[१३]

काचित् रसोत्तीर्णा सफला कथा। नाट्यशास्त्रे भरतेनोक्तं– "नहि रसादृते कश्चिदप्यर्थः प्रवर्त्तते।" किमर्थं तन्न श्रव्यकाव्येऽपि प्रवर्तते। आचार्येण आनन्दवर्धनेन अभिनन्दगुप्तेनापि दृढतया प्रतिपादिता "रस इति कः पदार्थः? उच्यते आस्वाद्यत्वात्" इति। नाट्यशास्त्रे रसानां वर्णोऽपि पृथक्तया निर्देशितः, तत्र करुणरसस्य वर्णः धूसरः (कपोतः करुणश्चैव)। सेयं करुणरसात्मिका लघुकथा (श्रव्यकाव्यत्वेन) शैवली इति। कथायाः सर्वाङ्गे धुसरता, विषादमयता, करुणता च परिव्याप्ताः। शैवली इति कथां पठितुमारभ्यते चेत् आसमाप्तिं पठनीयं, समाप्य च पुनरारब्धव्यम्। तस्मादेव रसोत्तीर्णा सफला लघुकथा शैवली। कारुण्यं यस्याः

[१२] कथाद्वादशः, २००४

[१३] कथाद्वादशः, २००४

अङ्गीरसः एव। भवतु नाम करुणरसः "करुणादावपि रसे जायते यत् परं सुखम्। सचेतसामनुभवः प्रमाणं तत्र केवलम्।" सुखेन विना न कोऽपि कार्ये प्रवृत्तो भवति, करुणरसे ऐकान्तिकाग्रहं दृष्ट्वा तु एतेषां सुखमयत्वमेव स्वीकरणीयं भवति। कारुण्यं यदि अस्माकं दुःखस्य कारणं भवेत् तर्हि शैवलीसदृशी कथा न पठनीया। एतस्या व्यञ्जना गभीरा, सफलकामी प्रोयोगशैली, अहो नाटकीयताः सर्वाः वाचकानुकूलाः एव। "प्रयोगत्वमनापन्ने काव्ये नास्वादसम्भवः" तादृशस्य प्रयोगस्य प्रकाशः प्रत्येकं तारापदकथायां समुद्भास्यते। लघुकथायाः आरम्भः वेगेन लक्ष्याभिमुखधावमानेन ज्यामुक्तेन वाणेन सह तुलना सङ्गता भवति। यः कयापि भूमिकया विनैव स्रोतस्य अन्तः त्यक्तः। पश्यामः तावत् शैवल्याः प्रारम्भः– "आसीत् काचित् कन्यका शैवली नाम। केकरा, कृष्णा, खर्वा, च। विधाता यथा तिलोत्तमां सृजति तथा तिलाधमामपि, अन्यथा विभुत्वं व्याहन्यत्। तां माता निन्दति, नाभिनन्दति पिता। वर्धते च दिने दिने, न शुक्लपक्षे यथा शशी, किन्तु कृष्णायां निस्तारका अमानिशेव।" कथा आपतिता करुणारहितायां वास्तवतायां यस्या क्षणमपि स्थातुं अवसरः नास्ति। वाचकाः शैवल्याः उद्विकाशस्य प्रतीक्षावसाने सति एव तस्य वर्धनस्य विपरिणामस्य प्रतीक्षायां निमग्नाः भवन्ति। इदानीं द्वित्रा वाक्यं, त्रीणि चत्वारि आभासाः इङ्गितमेव अपेक्षितानि। शैवल्याः पिता मातरं वदति "सर्वं विक्रीणाति चेदपि शैवल्याः विवाहव्यायः न आगमिष्यति", माता वदति "कः ग्रहीष्यति एताम्? कथञ्चित् विवाहः तु भवतु, तदनन्तरं श्वशुरकुले दासीरूपेण एव जीवेत्।" लघ्वी शैवली किमपि नावगम्यापि उक्तवती "तिष्ठ तिष्ठ द्रक्षति यथाकालं राजपुत्रः आगम्य मां स्वीकृत्य गमिष्यति बहुदूरम्।" तदनन्तरं क्रन्दन्तः एव स्थास्यन्ति। कैशोरावस्थायां शैवली "तस्कर इव दण्डायते दर्पणस्य पुरतः" पाठकानामवगन्तुं विलम्बः एव न भवति "केकरा, कृष्णा, खर्वा च" शैवल्याः मनोदशा, सापि अवगच्छति आत्मगततया "हस्तेन मार्ष्टि ललाटकेशान्।" अपि सा विपरिणमते "अधुना तु न हसति किशोरी।" कालेन शैवली काचित् वधूः, गोविन्दः तस्य पतिः। आदिवसं कायिकपरिश्रमेणापि अक्लान्ता शैवली पतिगृहं स्वच्छं स्थापयितुं प्रयन्तशीला भवति। शैवली वस्तुतः भर्तुर्गृहे दासीरूपेण पर्यवसिता, इदानीं सा "भर्तुः पादुकां परिष्करोति",कदाचित् पतिः "अलमीदृशपरिश्रमेण" इति वदति, तदा "ईषज्जहास वधूः" इति विवरणं पश्यामः। पतिगृहं तस्मै मन्दिरमिव, किन्तु गोविन्दस्य प्रेम शैवल्यां न तिष्ठति। कृष्णया अपराजितया सः परितृप्तः न

भवति अधुना, एकदा तेन "शुक्ला" "चन्द्रमल्लिका" आदाय गृहमागम्यते। अत्रैव One Climax इत्यस्य चरमक्षणस्य आयोजनं सम्पन्नम्।"विरराम वर्षणम्। जहास काशः। काशा विनाशं गताः। शुशुभे पक्वं शालिधान्यम्। सोऽपि अन्तं जगाम हेमन्तः। आयात शीतः। भयेन चकम्पते आमलकी शाखा। पत्राणि व्यसृजद् भूमौ" स्वल्पातिस्वल्पेन शब्दैः गुरुतरार्थस्य प्रकाशः। गतिरपि अपारा। अनन्तरमेव परिणामनिमित्तम् अपेक्षा एवावशिष्टं तिष्ठति। अनादृता अपराजिता शैवली दिने दिने विशीर्णायते, गोविन्दस्य प्रश्नस्य उत्तरेण "म्लानं जहास"...अथ अन्तिमशय्यायां "स्मितमकरोत् शैवली।" अहो दुरन्तः विपरिणामः।

बङ्गप्रान्ते विद्यमानानां सहस्रानां कृष्णानां कन्यानां दुरवस्था न अश्रुतपूर्वा। नापि संस्कृतेतरभारतीयसाहित्ये तथाविधानां कथानां अभावः विद्यते। न साहित्ये न वास्तवसमाजे शैवलीसदृशानां चरित्राणाम् अभावः विद्यते। तासामेव यन्त्रणां मूर्तं करोति शैवली इति कथायां लेखकः। तस्यैव वाक्येन प्रतिध्वनिता भवति तादृशानां सर्वेषां वेदना– "मातः, तव बहुकष्टकारणमहम् आजन्मनः। किन्तु न मम किमपि करणीयमासीत्। क्षमस्व माम्।" मरणकाले केकरा, कृष्णा, खर्वा च शैवली परजन्मे चन्द्रमल्लिका इव गौरी सुरूपा च भूत्वा जनिं लब्धुं प्रार्थयति। वाचकाः अपि तथैव इच्छन्ति प्रायः।

हस्-धातोः प्रयोगे नैपुण्यं वैचित्र्यं पाण्डित्यं च प्रदर्शितवान् लेखकः। तद्यथा– हसति, न हसति, जहास, म्लानं जहास। "विरराम वर्षणम्...पत्राणि व्यसृजद् भूमौ" इत्यादिभिः प्रमान्यते, कथायां द्वित्रा शब्दैः विनिर्मितः लघुवाक्यबन्धः व्यञ्जनया रसोत्तीर्णः चित्रमयश्च जातः।

## अथ भेजालकथा

भेजाल इति शब्दस्तु बङ्गीयरूढशब्दः। यस्मात् संस्कृते बङ्गव्यवहारादेव अपद्रव्याणां संमिश्रणार्थेनैव गृहीतः। तस्मात् आधुनिके जीवने भेजालसर्वस्वतायाः चित्रं, द्विराचारः, पाखण्डम् आदि दार्शनिकतत्वेन व्यङ्ग-विद्रूपेण च सह सुचारुतया सरसतया चित्रितं तारापदभट्टाचार्येण अथ भेजालकथा इति कथायाम्। कथायां जम्बुद्वीपकथां जिज्ञासुभ्यः मुनिभ्यः भेजालकथां वक्तुकामः नारदः वदति उत्तमेन सह अधमस्य संमिश्रणमेव भेजालः, अपि च तं मिश्रितद्रव्यमपि भेजालमिति कथयति, यथा ब्रह्ममुहुर्तम्। नारदमते तत्र आलोकेन सह अन्धकारस्य मिश्रणात् तदपि भेजालमिति। अजपादस्य प्रश्नः आसीत् भेजालस्य कारणं किमिति।

नारदस्य उत्तरमासीत् "अभावः।" 'कोकनद'स्य उत्तरम्– अभावो नाम सप्तपदार्थानामन्यतमः। स तु स्यादेव कथं न लोकस्तं सहते?

षष्ठ्याब्दे पश्चिमबङ्गे सर्वत्र परिव्याप्तः खाद्याभावः, अनैतिकतया खाद्यादिद्रव्ये अपद्रव्याणां संमिस्त्रणेन लाभवर्धनम् इत्यादिनां विवरणं सुचारुतया विवृतम्।[१४] येन लेखकः लोके विद्यमानानां छद्मलोकहिताकाङ्क्षीनां नेतृणां छद्मावरणमुद्घाटयितुं यतमानः इति पश्यामः। यत्र नर-नारीणां वस्त्रधारणशैली, विद्युत्संकटम् इत्यादि तस्य व्याङ्गस्य लक्ष्यमासीत्। प्रासङ्गिकतया कदाचित् न्यायसम्मतः अभावाः, व्याप्तिः, अव्याप्तिः, अतिव्याप्तिः आदिनां कदाचित् वेदोपनिषन्मन्त्राणां उल्लेखः कृतः। "यदक्षरं परिभ्रष्टं मात्राहीनञ्च यद् भवेत्। पूर्णं भवतु तत्सर्वम्॥" कथापात्राणां मुनीनां नामानि अपि हास्यकराणि तानि यथा...कदलीप्रियः, पाणित्रासः, हसशिर्षः, कोटराक्षः, सारसञ्चुः इत्यादयः।

## गदाधरविवाहकथा

भरतनिर्दिष्टहास्यरसस्य वर्णः श्वेत एव "सिता हास्यः प्रकीर्तितः", अहो हास्यरसनिपुणा कथाप्रतिभा प्रकटिता तेन गदाधरविवाहकथायाम्। वाक्यगतः, वेशगतः, क्रियागतः इत्येतेषु त्रिविधेषु हास्यरसेषु सः वाक्यगतहास्यरसमेव परिवेशितवान् अत्र। क-तः क्षं यावत् पठित्वा यदा गदाधरः दीर्घश्वासं त्याक्तवान् तदा माता पुत्रं गुरोः सकाशमानितवती। तस्य कथायां "श्रुतञ्च बहुनिर्मलम्।" दरीदृश्यते। "गदाधरविवाहकथा" इत्यस्यां कथायां हास्यरसस्य स्फुरणं वाचकानां निर्मलानन्दाय भवति लेखकस्य निर्मलज्ञानम्। चतुर्दशमाहेश्वरसूत्राणां प्रसङ्गमानीय अध्यापक-गदाधरयोः परिप्रश्ने पर्यवेक्षणे च हासविच्छुरणं जनयति। "केन कृतम्" इति पृष्टे सति अध्यापकेनोक्तम् "नृत्यावसाने नटराजो नवपञ्चवारान् ढक्कां ननाद। तत एतानि उत्पत्यानि" इति। अहो सुपरीक्षाकामी विद्यार्थी गृहमागम्य ढक्कां च संगृह्य वादयित्या आविष्कृतवान् यत् तस्मात् अ इ उ ण् इति ध्वनिः न निर्गच्छति। अनन्तरं गुरुवे अनुयोगं करोति यत् गुरुणा सः मिथ्या अवबोधितः इति।

## मैत्रेयी

काचित् सफला कथा। स्वार्थकलघुकथा इत्युक्ते यदवगच्छामः तत् सर्वमपि पश्यामः अत्र। यस्या आरम्भे एव चमत्कारित्वम् अस्ति। कथां पठितुम् आरभते

[१४]सर्षपतैलेनश्शृगालकण्टकबीजं, तण्डुलेकङ्करं, शर्करयाबालुका, औषधेभेजालम्

चेत् समाप्तिं यावत् न पठित्वा वाचकानां निष्कृतिः न भवति।[१५]

कथानकमेवंविधम्। कस्मिंश्चिद् दिवसे कश्चित् कर्मप्रार्थी बालकः गृहस्थस्य द्वारमुपगतः। स्नानात् प्रत्यागता गृहिणी बालकं दृष्ट्वा पृष्टवती स क इति। बालकं पृष्ट्वा सर्वं ज्ञातवती कार्यं प्रतिश्रृणोति च। अपि तु तस्मै भोजनमपि उपकल्पयति गृहिणी। स एव बालकः अनाथः इति। कृष्णकायः आजन्मपितृहीनः सद्योमातृहीनः मुण्डितशिरस्कः च। गृहस्थेन बालकाय आश्रयः पठनव्यवस्था च दीयते। परीक्षायां प्रथमस्थानं प्राप्नोति सः। काले गृहस्थकन्यायाः मालत्याः गृहशिक्षकपदमपि प्राप्नोति सः। क्रमशः उभयोः मनोविनिमयेन सामीप्यम् अतिगाढं भवति। कुन्दपुष्पमाल्येन तयोः रहसि गान्धर्वेन विवाहः अपि संजातः।

नौकाविपर्ययात् मालत्याः पितरौ परलोकं प्राप्तौ। घटनाक्रमेण मालती उपनीता भवति धनिकात्मिकायाः मैत्रेय्याः गृहे। क्रमशः मैत्रेयी-मालत्योः सख्यं प्रगाढं भवति। कुन्दपुष्पमाल्येन विवाहः अपि तया ज्ञापिता मैत्रेयी। अथ चरमक्षणम् आयाति। मैत्रेय्या विवाहः अनाथेन सह निश्चितः। सर्वदुःखम् अन्तः सङ्गोप्य मालती शङ्खं वादयति।...“सायाह्ने वरः आगतः। अनाथ एवासौ। मालती निगृह्य आत्मानं शङ्खं दधौ।”...विवाहरात्रौ मैत्रेयी विवाहग्रन्थिमुद्घाट्य निर्गच्छति, पत्रे लिखति च “श्रद्धास्पद! भवान् न जानाति मम मनः, न अहं जानामि भवतः मनः, किन्तु यया मालत्या सह भवतः कुन्दपुष्पमालया विवाहः सम्पन्नः, तां मालतीं भवतः हस्ते समर्पयामि। ताम् अनुगृह्णातु।” कथा अत्रैव समाप्ता।

अतिसामान्यं कथानकं वर्णनया व्यञ्जनया असामान्यत्वमाप्नोति कथायाम्। कथायाम् अनाथस्य आश्रयदातारौ स्नेहार्द्रौ गृहिणी-गृहकर्तारौ ईर्षाकातरा प्रतिवेशिनी मैत्रेय्याः करुणार्द्रा माता च एतेषां नामकरणं न कृतं कथाकारेण। तनैव तेषां व्याप्तिः सामग्रिकं कृतम्। एतानि चरित्राणि बङ्गीयानां गृहेषु परिदृश्यमानानि सन्ति। गभीरसंवेदनार्थं संलापस्य उपस्थापनमपि तेन परिपाट्या साधितम्।[१६]

---

[१५]“...एकदा किशोरः कश्चित् कस्यचित् गृहस्थस्य द्वारं जगाम। गृहिणी स्नात्वा पुष्करिण्या आगच्छन्ती तं दृष्ट्वा पप्रच्छ —‘कस्तम्’? —मम कोऽपि नास्ति। —मस्तको मुण्डितः कथम्? —माता मृता। —पिता? —जन्मनः प्रागुपरतः। —किमिच्छसि? —यत् किमपि कर्म। —कीदृशं कर्म? —यदेव दीयते। —कर्ता प्रत्यागच्छतु। आगते पृच्छामि। यावदेहि स्वीकुरु किञ्चित्।...”

[१६]“...चतुर्दशवर्षीया ऊनविंश-वर्षीयं निभृतं निनाय। हृदयदेशात् किमपि वहिरानीय आह– ‘स्मरसि?’ —कुन्दकुसुममाला। त्वया ग्रथित्वा सरस्वतीकन्ठे दत्ता। —च रोपिता लता। —मनसि करोमि। —रक्ष एनाम्। मा विजहीहि कदापि।...”

## श्यामली[१७]

सरसकथावस्तुनः उपस्थापने पटुः तारापदभट्टाचार्यः, तत्रापि यदि प्रेमोपाख्यानवर्णनपरा कथा भवेच्चेत् का कथा, कथायाम् आसमाप्तिं पिपठिषा तिष्ठत्येव। कथायाः आरम्भं परिशीलयामः..."भार्यया सह मुखसंघर्षाद् द्वितीयदिवसे पलाशपुरस्य श्रीयुक्त-हरिहरचट्टोपाध्यायस्तस्य पुत्रं पञ्चमवार्षिकश्रेण्याश्छात्रं नन्दमाहूय जगाद 'तव विवाहं कारयिष्यामि। मनयोगेन पठ 'एवं स कतिपयदिवसमध्ये एव सस्त्रीक पनसग्रामस्य श्रीयुक्त-निकुञ्जमोहन-मुखोपाध्यायस्य कन्यां श्यामलीं निर्वाच्य समागत्य प्रोवाच "तत्रैव विवाहो भावी। तथापि गत्वा पश्य– यदि किमपि वक्तव्यं स्यात्।" यतः– स्थान-काल-पात्र-प्रसङ्गादि सर्वम् आपरितोषं समुल्लिख्य नन्द-श्यामलीभ्यां सम्भावितमिलनदर्शनोत्सुकाः वाचकाः उन्मुखतया कथां अग्रे पठन्तः भवन्ति। नन्दस्य मित्रैः सह चर्चायाः विचार्यविषयस्तु..."चिराय काचिदेका सङ्गिनी निर्वाचनीया या कदापि न वृद्धा भवेत्, तथा, यथा आगता तथैव तिष्ठेत्।" 'कार्यमेतत् दुरूहं यतो'...'पश्चात् स्थूलापि भवितुमर्हति'......'किंवा गृहगोधिका-सदृशा कृशा'...इत्यादयः। अतः बहुधा परिकल्पनां कृत्वा कन्यासन्दर्शनार्थं पनसग्रामं ते त्रयः समागतवन्तः। सन्देशरसोगोलकमधुरसमभिव्यहारेण कन्यासन्दर्शनं तु जातं परं उभौ पात्रौ एव लज्जया नतानतौ एव आस्तां, फलतः सर्वं विफलम्। सुतरां रहसि अन्धकारे पुनर्दर्शनाय गमनम्। सत्यमेतत् तारुण्यसाहसिकमेव शोभे "तस्येदमभियानमागामिनि दिवसे तरूणान् पन्थानं प्रदर्शयेत्।" श्यामल्याः सङ्गीतालापमनुस्मरन् निम्बवृक्षमारुह्य नन्दः वातायनात् द्रष्टुमचेष्टयत्। फलं तु भयावहः अभवत्। तत्रैव समागतं कथायाः चरमक्षणम्। श्यामल्याः "चोरः!" इति चित्कारेण सर्वं नष्टम्। वातायनात् वीक्षन्तं नन्दम् आविष्कृत्य, तस्मै कन्यां सम्प्रदानाय अलमिति निश्चितवान् निकुञ्जमोहनः, लोकनिन्दाभयात् पत्रे तथैव लिखितवान् हरिहराय। नन्दस्य पिता हरिहरः पक्षाभ्यन्तरे द्वितीयमेकं नन्दनामाङ्कितं पत्रं प्राप्तवान् यत्र तेन आविष्कृतः श्यामल्याः मनोदशा। त्वरया सः नन्दस्य वृत्तान्तमपि परिप्रश्नेन ज्ञातवान्। अनन्तरं पनसग्रामं गत्वा श्यामल्याः धान्येन दर्भेण आशिर्वादादिकार्यं[१८] साधितवान्, अहो मधुरमस्याः समापनम्।

---

[१७] संसापः , २००८-९ , पृ० ९

[१८] बङ्गप्रान्तेयत्विवाहार्थंनिश्चितसंकल्पत्वेनज्ञायते। वाग्दानपर्वमिव।

कथामिमां विश्लेषयामः चेत् पश्यामः, तदानीन्तने काले उपविंशवयस्केन तरूणेन सह सद्यतरुण्याः विवाहस्य प्रचलनमासीत्। अपि तु तदा पितृभ्यामेव चितेन सह विवाहस्य प्रचलनमासीत्, प्रणयप्रसङ्गे अद्यतनीयं दुःसाहसिकमभियानं तदा अप्रचलितमासीत् प्रायः। श्यामल्याः पत्रव्यवहारं तु कदाचित् साहसिकं चेदपि अनुचितमिति न प्रतिभाति। अत्यन्तसरला घटना काचित् रसोत्तीर्णतया अत्र वर्णिता। दाम्पत्यकलहं वोधयितुम् अत्र 'मुखसंघर्षः' इति शव्दं व्यवहृतवान् लेखकः। स्नातकोत्तरद्वितीयवर्षश्रेणीं बोधयति 'पञ्चमवार्षिकश्रेणी' इति शब्दः। "तव विवाहं कारयिष्यामि। मनयोगेन पठ।" "तत्रैव विवाहो भावी। तथापि गत्वा पश्य– यदि किमपि वक्तव्यं स्यात्।" पिता-पुत्रयोः अहो मधुरसम्बन्धः सरलाभिव्याक्तिः च द्रष्टव्य। समस्तपदानां प्रयोगे सति– इति योजकचिह्नेन पाठावगमनक्लेशं निवारितवान् लेखकः। विवरणलाघवार्थं तेन सारगर्भसंलापस्यैव व्यवहारः कृतः। कथा तु समाप्ता किन्तु नन्दमित्राणां किंकर्तव्यविमूढता "अन्तः अतृप्तिः स्यात् समाप्ते सति भाति समाप्ता चेदपि न समाप्ता (अन्तरे अतृप्ति रवे साङ्ग करि मने हवे शेष हये हइल ना शेष)" इति सूचयति।

## उपसंहारः

परिशेषे तारापदस्य लघुकथा सार्थकलघुकथा इति वक्तुं शक्यते। कदाचित् तस्य कथा संलापवाहुल्यदोषेण दुष्टा इति कोपि वादमुत्थापयेत्, तत्र तु अयमवगन्तव्यं यत् तत्र संलापयोजनया कथायाः उत्तरणमेव जातमासीत्। कथाद्वादशः कलिकातातः संस्कृतसाहित्यपरिषत्तः प्रकाशितमासीत्। परितापस्य विषयः एतादृशः सरल-सुखबोध-प्राञ्जलश्चेदपि कथाद्वादशस्य प्रकाशने प्रकाशकाः उदासीनाः एव वर्तन्ते। यस्मात् पाठकाः अपि तस्य आस्वादनात् वञ्चिताः भवन्ति। यदा तारापदवर्यः पश्चिमवङ्गप्रदेशे लघुकथायाः ललितसंसर्जनं साधयन् अस्ति प्रायः तस्मिन्नेव कालखण्डे समकाले एव वा भारते अपरापरभाषायां लघुकथायाः लेखनमारब्धमासीत्। किन्तु अपरापरभाषीयलिखितसाहित्यवत् संस्कृतलघुकथायाः विकाशः किमर्थः न जातः तदपि विचार्यम्।

# वैश्विकसंहतिकरणे अनुवादस्य गुरूत्वम्– संस्कृतसाहित्यालोके


## मौमितावरः*


भाषाणाम् आविष्कारात् परं यदा मानवसमाजस्य विकाशः विस्तारश्च जायमानः आसीत् तदा सम्पर्कस्य आदानप्रदानप्रक्रियायाः विस्तारस्य आवश्यकता अनुभूता, तदा एव अनुवादकार्यस्य आरम्भः जातः। ऐतिहासिकतथ्यानुसारं प्राचीनकाले कश्चिन्नृपः राज्यसीमावर्धनार्थम् अन्यदेशाक्रमणाय निर्गच्छति स्म। तदा द्विभाषिजनान् तेन सहैव नयति स्म। तस्मात् ज्ञायते यत् प्रारम्भे अनुवादपरम्परा मौखिकरूपेणैव प्रसृता। साहित्यक्षेत्रे अनुवादकार्यम् अनन्तरं गुरुत्वं प्राप्तम्। वस्तुतः आदौ देशाटनाय ये पर्यटकाः विभिन्नदेशान् प्रति यात्रामार्गे यत्र यत्र गतवन्तः, तत्रत्याः भाषाः पठित्वा तत्तद्भाषीयश्रेष्ठग्रन्थानां स्वस्वभाषासु अनुवादं कृतवन्तः। त एव अनुवादस्य शलाकापुरुषाः आसन्।

अधुना अनुवाद-इत्यस्य कः अर्थ इति पृष्टे सति उच्यते अनु इति शब्दस्तु बह्वर्थकः। अनु इत्यस्य पश्चादित्यर्थः गृहीतः अत्र। 'विधिविहितस्यानुवचनमनुवादः'[१] इत्यस्मिन् सूत्रे अनुवादशब्दस्थम् अनुरिति अव्ययं तु महर्षिणा गौतमेन पश्चादित्यर्थे एव प्रयुक्तम्। विधेरनुवचनं विहितस्य वाऽनुवचनमनुवादः। सूत्रकारगौतमस्य अभिमतमनुसृत्य वृत्तिकारेण आचार्येण विश्वनाथेन अनुवादस्य सुस्पष्टं लक्षणं प्रदत्तम्– "प्राप्तस्य अनु पश्चात् कथनं सप्रयोजनमनुवादः" इति। अनुवादसम्पर्किताधुनिकचिन्तने न्यायशास्त्रगतम् अनुवादस्य वीजमेव प्रकाश्यते। पार्थक्यं तावदेव यत् न्यायमतानुसारमनुवादस्य प्रयोगः समानभाषायाः अन्तर्गतः। तत्र आधुनिकचिन्तनानुसारं कस्याश्चिद्भाषातः भिन्नभाषायां पुनः कथनमनुवादः। एकस्याः भाषायाः आधारीभूतं भावचिन्तनं च अन्यस्यां भाषायां प्रवाहकरणमेव अनुवादः। कैश्चित् पुनः लिप्यन्तरणमपि अनुवादे एव परिगण्यते। किन्तु वैज्ञानिकक्षेत्रे पारिभाषिकशब्दानां लिप्यन्तरणस्य प्रसक्तिः स्यात्। साहित्यक्षेत्रे तु दोषाय एव इति मे मतम्।

---


*शोधच्छात्रा, संस्कृतविभागे, पश्चिमवङ्गराज्यविश्वविद्यालयस्य


[१]न्ययसूत्रम्– ११।१।६५।

## विषयालोचनम्

'संसरतीति संसारः' इत्युक्त्यनुसारं प्रतिक्षणं परिवर्तमानः संसारोऽयम् नास्ति तत्र संशयलेशः। अस्माभिर्ज्ञायते साहित्यं संसारस्य प्रतिविम्बस्वरूपम्। अतः तत्र वैविध्यपरिदर्शनं स्वाभाविकमेव। कालक्रमेण यान्त्रिकयुगेऽस्मिन् ग्रामेषु नगरेषु देशेषु च अन्तर्वर्तिभेदः ह्रासमानः अस्ति। यस्मात् समाजे क्रमशः सांस्कृतिक-सामाजिक-आर्थिक-राजनैतिकविकाशः दृग्गोचरीभूयते। गतिशीला नदी यथा कालेन सह विविधघात-प्रतिघातान् सोढ्वा पूर्वतनं किञ्चित् तत्त्वम् त्यक्त्वा किञ्चित् पुनः स्वीकृत्य अपि च नवीनतत्त्वेन सह निरन्तरम् अग्रे गच्छति। तथैव साहित्यसंसारोऽपि प्राचीनपरम्परां किञ्चित् परित्यज्य किञ्चिद्वा अनुसर्य तथा नवीनपरम्परागतचिन्तनेन सह सततं प्रवहमानोऽस्ति।

अतिप्राचीनता हि यस्याः विशेषता, अनेकासां भाषाणां जननीस्वरूपा या भाषा, या शतकेभ्यः प्रवाहितपरम्पराणां परम्परा वर्तते, शाश्वतमूल्यानाम् आधारशीला, यत्र बहिस्तात् किमपि स्वीक्रीयते चेत् नावज्ञायते एव यत् किमपि मिलितं, सैव संस्कृतभाषा अतीव उत्कृष्टा युगपोयोगी च भाषा अस्ति।

प्रचीनभारते संस्कृतभाषा आत्मानं तादृशि उच्चासने प्रतिष्ठापितवती यत् अस्याः भाषायाः लेखकाः देशीयभिन्नभाषासु संस्कृतग्रन्थानामनुवादे उत अनुवादसम्पर्किते अध्ययने किञ्चिदपि आग्रहिणः न जाताः इति मतं कैश्चित् प्रकाश्यते चेदपि मतमेतत् पूर्णतया न सत्यम्। आरम्भकालादेव भारतं बहुभाषिदेशोऽस्ति। संस्कृतेतरभाषातः लौकिकसाहित्यरचनायाः प्रेरणा गुणाढ्यस्य कथां विहाय अन्यत्रापि दृश्यते। लौकिकसाहित्ये कथादृश्यकाव्येऽपि संस्कृतेतरभाषाणां संस्कृतेन सह युगपत् प्रयोगो दृश्यते। भासकालिदाससदृशा अपि तेषां काव्ये प्राकृतेन सह संस्कृतस्य (संस्कृतानुवादस्य वा) युगपत् प्रयोगं कृतवन्तः। उदाहरणत्वेन– "ईसीसिचुम्बिआइं भमरेहिं सुउमारकेसरसिहाइं। ओदंसअन्ति दअमाणा पमदाओ सिरीसकुसुमाइं।" (प्राकृतम्) "ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेशरशिखानि। अवतंसयन्ति दयमाणाः प्रमदाः शिरीषकुसुमानि॥" (संस्कृतम्)[३] एतेन प्रमाणीयते लौकिक-संस्कृतसाहित्ये अनुवादकार्यं बहुपूर्वादेव सामान्यतः अनायासतया प्राचलदासीदेव।

संस्कृतमधिकृत्य द्विविधानुवादकार्यं क्रियते। तत्र बहुभिः अनुवादकैः

[३]अभिज्ञानशकुन्तलम्– ४।१।

संस्कृतग्रन्थाः इतरभारतीयभाषासु वैदेशिकभाषासु च अनूदिताः सन्ति। तेषु संस्कृतग्रन्थेषु केषाञ्चन ग्रन्थानां पुनः बहुवारं बहुभाषासु अनुवादः जातः। तेषु प्राचीनग्रन्थेषु ऋग्वेदः ऐतरेयारण्यकः ऐतरेयब्राह्मणः अथर्ववेदः इत्यादीनां वैदिकग्रन्थानां रामायण-महाभारत-श्रीमद्भगवद्गीता-काव्यादर्शः-पञ्चतन्त्रादीनां लौकिकानां संस्कृतसाहित्यानां नामानि उल्लेखार्हाणि। अपरतः अपरापरभाषीयप्रसिद्धग्रन्थानां संस्कृते अनूदितसाहित्येषु केषाञ्चन नामानि उल्लिख्यन्तेऽत्र। यथा– प्रख्यातः कथाकारः गुणाढ्यः[४] पैशाची-भाषायां[५] 'बृहत्कथा'[६] इति ग्रन्थं विरचितवान्। एतस्य त्रयः संस्कृतानुवादाः प्राप्यन्ते। तेषु प्राचीनतमोऽनुवादः 'बृहत्कथाश्लोकसंग्रहः' इत्याख्यया नेपालस्थितेन बुधस्वामिवर्येण[७] विहितः। क्षेमेन्द्रेण[८] कृतानुवादः 'बृहत्कथामञ्जरी' इत्यभिधानेन ख्यातः। अस्य कथाग्रन्थस्य तृतीयानुवादः तु सोमदेवभट्टेन[९] कृतः 'कथासरित्सागरः' इत्याख्यानेन जगति प्रसिद्धः। हालकवेः 'गाथा सत्तसई' इति प्राकृतकाव्यस्य अनुवादः गोवर्धनाचार्येण कृतः[१०] 'आर्यासप्तशती' इत्यभिधानेन। जयशङ्करप्रसादस्य 'कामायनी' इति कृतेः भगवद्दत्तवर्येण, नालयिरमित्याख्यस्य तमिलकाव्यस्य कूरुकापुरवासिभिः रामानुजैः, वशिष्टगणपतिमुनिभिः रमणगीता इति तमिलगीतिकाव्यस्य च संस्कृतानुवादः कृतः। आधुनिककालिदासः इत्याख्यस्य शेक्सपीयरमहाभागस्य सर्वेषाम् आङ्ग्लभाषीयनाटकानां मेडपल्लीवेङ्कटरमणाचार्येण तथा मैकवेथ-इति नाटकस्य 'जीवयात्रा' इति अभिधानेन महालिङ्गशास्त्रिवर्येण अनुवादः कृतः। अरेबियन् नाइटस्-जगद्बन्धुमहोदयेन एतस्य ग्रन्थस्य संस्कृतानुवादः कृतः।

पुनश्च कदाचित् मौलिकसंस्कृतग्रन्थस्य अन्यभाषायाम् अनुवादात् परं पुनः तस्मात् अनूदितसाहित्यात् संस्कृते अनुद्य प्रत्यागमनमपि जातम्। यथा– वाल्मीकिरचितरामायणमुपजीव्य महाकविना तुलसीदासेन हिन्दीभाषया

---

[४] 6६०० ई.पूर्ववर्ती

[५] प्रकृतविशेषा

[६] बड्डकहा

[७] नवमशती

[८] एकादशशती

[९] एकादशशती

[१०] १०७५-११२५ ई.पू.

विरचितस्य 'रामचरितमानस' इत्यस्य ग्रन्थस्य पुनः 'मानसभारती' इत्याख्यया संस्कृतानुवादः विहितः डॉ. जनार्दनगङ्गाधररटाटेमहाभागेन।

चतुर्थशताब्द्याः उत्तरार्धे फाहियेन इति चैनिकपरिव्राजकः पञ्चविंशतिवर्षाणि भारते स्थित्वा संस्कृत-भाषा-व्याकरण-इतिहास-दर्शन-साहित्य-शास्त्रादिकं सम्यग् अधीत्य बहूनां ग्रन्थानां प्रतिलिपिं निर्माय स्वदेशं प्रतिगम्य तेषु प्रतिलिपिग्रन्थेषु बहूनां ग्रन्थानां चैनिकानुवादं कृतवान्। चीनदेशे अनुवादकार्यं प्रशस्यते स्म तथा पूर्णतः धार्मिकविधिपालनेनैव अनुवादः क्रियते स्म इति कथ्यते। संस्कृतग्रन्थानां चैनिकानूदितरूपं षष्ठशताब्द्यां जापानदेशीयैः प्राप्तम्। अथ जापानीभाषया अपि तेषां ग्रन्थानाम् अनुवादः कृतः।

इसवीयषोढशशतके एम्.वेङ्कटरमणाचार्येण कृतस्य अनुवादकार्यस्य 'शेक्सपीरीयनाटककथावली' इत्याख्यया प्रकाशनं जातं, यत्र 'आरवीयान-नाइट्स' तथा मेरि-लाम्ब इत्यस्य 'टेल्स फ्रम शेक्सपीयार' इत्यनयोः अनुवादः प्राप्यते। 'आरवीयान-नाइट्स' तथा 'गुलिस्तान्' इत्यनयोः अनुवादः[११] संस्कृतसाहित्यपरिषत्पत्रिकायाः नैकेषु अङ्केषु प्रकाशितः। सिन्दवादकथानां तैलङ्गवर्येण,[१२] राघवनमहाभागेन टालस्टयकथाः,[१३] सोमयाजीवर्येण भगीरथप्रसादत्रिपाठिना च क्रमानुसारं रवीन्द्रनाथस्य तथा प्रभातकुमारमुखोपाध्यायस्य कथा संस्कृतसाहित्यपरिषत्पत्रिकायाः विभिन्नेषु अङ्केषु प्रकाशिताः। वस्तुतः अनूदितकथानां विशेषता एषा एव यत् हास्यरसयुताः इमाः कथाः संस्कृतपण्डितानाम् उपरि तावन्तं प्रभावं जनीतवत्यः यत् तासां कथानां अनुवादकरणेच्छां निवारयितुं ते अशक्ताः।

आधुनिककाले अनुवादस्य या गतिः सा अभूतपूर्वा इति वाक्यं तु निःसंशयं सत्यमेव। परन्तु एतदपि सत्यं यत् अनुवादकार्यस्य आवश्यकता प्रत्येकस्मिन् युगे प्रत्येकस्मिन् काले तथा प्रत्येकस्मिन् स्थाने एव अनुभूता। समग्रे विश्वे विज्ञान-प्रयुक्ति-धर्म-दर्शन-साहित्य-शास्त्रादीनां ज्ञानविज्ञानानां द्रुतं सम्पन्नविकाशेन अनुवादस्य आवश्यकता दिनं दिनं क्रमवर्धमानाऽस्ति।

अथ अनुवादस्य प्रयोजनं किम् इति पृच्छायां कस्याश्चिद् जातेः

[११] १९३४-३५

[१२] १९७८, खिस्तेमहाभागेन सम्पादितः

[१३] १९६० तमे तथा १९७९ तमे वर्षयोः संस्कृतप्रतिभापत्रिकायां प्रकाशितः

समानभाषाभाषिगोष्ठ्याः वा भाषायाम् अन्तर्निहिताः भवन्ति– तस्याः गोष्ठ्याः मनुष्याणां भावसम्पद् जातीयजीवनस्य सामग्रिकाशा-आकाङ्क्षा रीतिः नीतिः चेत्यादयः। अतः जातेः चिन्तनस्य सामग्रिक ऐश्वर्यभाण्डारस्वरूपं ज्ञातुम् अनुवादस्य प्रयोजनमस्ति॥ अनुवादचर्चायाः प्रयोजनानि अधः अतिसंक्षेपेण उल्लिख्यन्ते–

## १) संस्कृतीनां समन्वयः

a) अनुवादेन विविधजातीनां पारस्परिक-भावसम्पदः विनिमयः (आदानं प्रदानं च) भवितुं शक्यते।

b) विभिन्नदेशीयमनीषिणां भावचिन्तनैः आत्मानं ज्ञानसमृद्धं कर्तुं शक्यते।

c) पृथिव्यां स्थितदेशानां प्रामाण्यग्रन्थसमूहस्य विषयवस्तून् ग्रन्थान् वा स्वीकर्तुं शक्यते।

## २) भाषासु समन्वयः

a) अनुवादकार्येण भाषायाः आङ्गिकसौन्दर्य्यं कलाकौशलं प्रयोगरीतिः चेत्यादीनि अन्यभाषायां सञ्चरन्ति।

b) एकस्याः भाषायाः शब्दभाण्डारः वाग्धारा आलङ्कारिकप्रयोगरीतिश्च अपरभाषां पर्याप्तं प्रभवन्ति।

## ३) व्यवहारगतदृष्ट्या

a) पृथिव्याः विविधप्रान्तानां ज्ञानम् अनुवादकार्येण विविधदेशानां स्वस्वभाषासु प्राप्यते।

b) पत्रकारितायां द्विभाषिवृत्तौ चापि विशेषः सहायकः भवति अनुवादः।

## ४) शिक्षागतदृष्ट्या

a) विषयज्ञानं लब्धुम् अनुवादस्य महान् उपयोगः वर्तते। प्रसङ्गेऽस्मिन् रवीन्द्रनाथेनोक्तं यत् “प्रकृतपुस्तकं न लभ्यते चेत् अनुवादकरणे दोषो नास्ति। ज्ञान-विज्ञानं कुत्रत्यापि भवतु भाषा मातृवत् भवेत्” इति।

b) आङ्गलभाषा संस्कृतभाषा उत अन्या कापि भाषा अनुवादेन सरलतया वा शिक्षितुं शक्यते। रवीन्द्रनाथेनापि अनुवादरीतिः वैदेशिकभाषाशिक्षार्थं प्रशंसिता।

## ५) व्यवसायगतदृष्ट्या

a) कार्यालयेषु तथा विचारालयेऽपि अनुवादस्य महत् प्रयोजनं वर्तते।

## ६) राष्ट्रियैक्य-वैश्वीकरणदृष्ट्या

a) न केवलं स्वदेशिक-वैदेशिकसाहित्यसंस्कृतिज्ञान-विज्ञानैः अस्माकं समृद्धकरणे, अपि तु राष्ट्रिय-संहतिसाधने अनुवादस्य महती भूमिका विद्यते।

अधुना विषयेऽस्मिन् वृहत्प्रश्नचिह्नः वर्तते यत् अस्य बहुभाषिकदेशस्य साहित्यिकी सांस्कृतिकी परम्परा अक्षुण्णा कथं तिष्ठेत्? देशवासिनः एकः द्वितीयस्य समीपमागत्य पारस्परिकमिलन-सौभ्रातृत्वादिभावनाः कथम् आयत्तीकरिष्यन्ति? वर्तमानपरिस्थितौ देशवासिषु पारस्परिक-समञ्जसता-सद्भावयोः भावनानां विकाशस्यावश्यकता इतोऽपि वर्धिता येन प्रत्यक्षविविधतायामपि अस्माभिः स्वसंस्कृतिं समानतां सौहार्द्यभावं च दृष्ट्वा अनेकतायामपि एकतायाः संकल्पनायाः मूर्तरूपं प्रदातुं शक्यते। अनया दृष्ट्या भाषागतसद्भावनायाः महती भूमिका वर्तते। सर्वासु भारतीयभाषासु सद्भावनायाः परिवेशः निर्मीयेत, इमाः परस्परैः भावनात्मकस्तरे सम्मिलिताः भवेयुः अपि च तासु पारस्परिकादानप्रदानस्य संकल्पः दृढीभवेत् इत्येव भारतस्य भाषागतसद्भावनायाः मूलमन्त्रः। ईदृशं पवित्रं तथा महत् कार्यं सम्पादयितुं सम्पर्कभाषात्वेन संस्कृतस्य विशेषं योगदानं न तु अस्वीकरणीयम्। इयमेव अद्वितीया भाषा या सम्पूर्णं देशम् एकसूत्रस्थं कृत्वा राष्ट्रिय-एकतारूपिपवित्रलक्ष्यपूरणे सफला भवेत्।

भाषागतसद्भावनायाः आलोचनकाले अनुवादप्रसङ्गः अनिवार्यतया आगच्छति। वस्तुतः अनुवादेन न केवलं भाषागतसद्भावनायाः अवधारणानां पुष्टिविधानं क्रियते अपि च भारतीयसाहित्यास्मिताभ्यां गतिप्रदानकारी कश्चित् सशक्तः आधारभूतश्च माध्यमस्वरूपः। कार्यमिदं तादृशमभिनन्दनीयं येन साहित्यावधारणया वयं परिचिताः भवेम तथा च वयं प्रकृतरूपेण भारतीयाः भूत्वा प्रादेशिकसङ्कीर्णता-परिसीमादि-विषयान् अतिक्रम्य साक्षात्कर्तुं शक्नुयाम। देशस्य साहित्यिक-सांस्कृतिक-परम्परागतप्राप्तसम्पदां दर्शनन्तु अनुवादेनैव सम्भवति। अनुवादविज्ञानिना डाँ जी. गोपीनाथनमहाशयेन लिखितं यत् बहुभाषाभाषिदेशे अस्मिन् भारतवर्षे अनुवादस्य उपादेयता तु स्वयंसिद्धा। भारतस्य विभिन्नप्रदेशानाम् साहित्येषु निहितमूलभूत-एकतायाः स्वरूपदर्शनाय अनुवाद एव एकमात्रं साधनम्। इत्थं मानवानाम् एकतायां वाधकस्वरूपं भौगोलिकं भाषागतं च प्राचीरम् विनश्य विश्वमैत्रीभावनाम् इतोऽपि सुदृढां करोति अनुवादकार्यमिदम्।

आगामियुगम् अन्ताराष्ट्रियसंस्कृतेः युगं भवेत् तथा च सम्प्रेषणस्य

नूतनमाध्यमानाम् आविष्करेण वैश्वीकरणस्य नित्यनूतनक्षितिजा उद्भाविता भविष्यन्ति। अस्यां पूर्णप्रक्रियायाम् अनुवादस्य महद् गुरुत्वं वर्तते। अनेन 'वसुधैव कुटुम्बकम्' इति उपनिषदीयविचारः मूर्ततां प्राप्नुयात्। अनया दृष्ट्या सम्प्रेषणव्यापारस्य उन्नायकरूपेण अनुवादकस्य तथा अनुवादकार्यस्य भूमिका निःसंशयम् अपरिहार्या। प्रसङ्गेऽस्मिन् कविवरबच्चनजी इति कुशलानुवादकस्य अभिमतमुल्लेखनीयं यत् अनुवादः भाषाद्वययोः अन्तः मैत्र्याः सेतुस्वरूपः इति। एकस्याः भाषायाः द्वितीयभाषां प्रति मित्रतायै प्रसारितः हस्तस्वरूपः अस्ति अनुवादः। सः हस्तः यावद्वारं यावदधिकं च दिक्षु प्रसारयितुं शक्यते, तावत् प्रसारणीयः।[१४]

## उपसंहारः

अनुवादकार्येण परोक्षतया राष्ट्रसेवा एव क्रियते। एकेन अनुवादकेन एकतः संस्कृतिद्वयस्य राज्यद्वयस्य देशद्वयस्य विचारधाराद्वयस्य वा परस्परयोः अन्तः सेतुत्वेन कार्यं क्रियते। अपरतः तेनैव भौगोलिक-राजनैतिक-साम्प्रदायिकसीमाः उल्लङ्घ्य भाषासु पारस्परिकं सौहार्द्य-सौमनस्य-सद्भावादिकं संस्थाप्यते। यस्मात् वयम् एकात्मतावैश्विकरणयोः भावनया सम्बन्धयुक्ताः भवामः। अनया दृष्ट्या अनुवादकस्तु कश्चित् समन्वायकः मध्यस्थः संवाहकः भाषीयदूतः इत्यादि-आख्याभिः सम्मानार्हः। अथर्ववेदः अपि सामान्यप्रवाहतः उपरि उत्थाय महल्लक्ष्यं साधयितुं प्रेरयति– 'उत्कुलम् उद्वह'[१५] इति। तथैव समग्रविश्वतः नवीनशाश्वतचिन्तनानि अस्मज्जीवनधारां समागच्छन्तु इत्येवं प्रेरयति ऋग्वेदस्य 'आनोभद्राः क्रतवो यन्तु विश्वतः'[१६] इति वचनम्। इत्थम् उत्कृष्ट-संस्कृत-चिन्तनविनिमयेन समग्रविश्वम् एकनीडं कर्तुम् अनुवादस्य विशेषतः संस्कृततः संस्कृते वानूदितसाहित्यस्य महद्योगदानं वर्तते, कदाचिदपरिहार्यमेव।

---

[१४]साहित्यानुवाद : संवाद और संवेदना, डाँ. आरसू , पृ. 85 ; अनुवाद हमें राष्ट्रिय ही नहीं, अन्तरार्ट्रीय भि वनाता है, ड. शिबन कृष्ण रैणा, 2016, http://hindinest.com/nibandh/n16.htm , 25.05.2017, 01:42 PM

[१५]अथर्ववेदः– ४।१३।६।

[१६]ऋग्वेद– १।८९।१।

# एकशरणनामधर्मः– एका समीक्षा

## जयदेवदे*

तत्कालिकसमाजस्य तथा कविदार्शनिकवर्गस्य विचारसरणिषु धर्मचेतनायाः प्रकाशः मध्ययुगीयभारतस्य लक्षणीयं वैशिष्ट्यम्। आ बहोः कालाद् भारते प्रवाहितानां चिन्ताधाराणां सर्वत्रैव मूले निहितं सुमहदेकं तत्त्वदर्शनं, यासु विचारसरणिषु अन्यतमस्य गौडीयवैष्णवसम्प्रदायस्य उत्सानुसन्धानं बाहुल्येन वेदान्तसूत्रेषूपलभ्यते। अयं गौडीयवैष्णवसम्प्रदाय एव भागवतसम्प्रदायनाम्ना भक्तिसम्प्रदायनाम्ना वाभिहितः। सम्प्रदायस्यास्य उपास्या हि विष्णु-नारायण-वासुदेवादि-संज्ञका देवताः। एते सर्वे स्वतन्त्रतया समवेततया वा कृष्णैकत्वम् उपनीताः। अत्रेदमुल्लेख्यं यद् गौडीयवैष्णवाः कदापि कयाचिदपि देवतया कृष्णस्य साम्यं नाङ्गीकुर्वन्ति। श्रीकृष्णम् एव ते भगवद्भावेन उपासते। तेषां नये काचिदपि देवता भगवान् भवितुं नार्हति, यतो देवतानां देवत्वगुणो भगवत्प्रदत्तः। किन्तु भगवत्ता न कश्चिद् गुणः। कृष्णो भगवत्ता चाभिन्ने। विषयमिमं बोधयितुं भागवते वर्णितं गिरिराजगोवर्धनधारणं देवराजेन्द्रदर्पहरणञ्च। यथा वृक्षस्य प्रतिपत्रं कर्तनात् काण्डच्छेदनमधिकं सुकरं भवति तथैव देवाधिपतेरिन्द्रस्य भगवत्त्वे अनङ्गीकृते देवान्तराणामपि भगवत्त्वानापत्तिरनायासेनैव सिद्ध्यति। तेन च भगवता कृष्णेन सह इन्द्रादिसदृशानां देवतानां समत्वमनङ्गीकृतमिति गौडीयवैष्णवाचार्या मन्यन्ते। तथाह्युक्तं–

> कृष्णयोगानुभावं तं निशाम्येन्द्रोऽतिविस्मितः।
> निस्तम्भो भ्रष्टसङ्कल्पः स्वान् मेघान् संन्यवारयत्॥ [भागवते १०/२५/२४]

अवान्तरसिद्धान्तादिभेदाद् भारते चत्वारो वैष्णवसम्प्रदायाः समजायन्त। ते यथा– क. श्रीसम्प्रदायः (रामानुजाचार्यस्य विशिष्टाद्वैतवादः) ख. रुद्रसम्प्रदायः (विष्णुस्वामिनः विशुद्धाद्वैतवादः) ग. ब्रह्मसम्प्रदायः (मध्वाचार्यस्य द्वैतवादः) घ. सनसम्प्रदायश्च (निम्बादित्याचार्यस्य द्वैताद्वैतवादः)। सनसम्प्रदायः पुनः सनकसनन्दनसनातनसनत्कुमाराणां चतुर्णां ब्रह्मणः मानसपुत्राणां नामानुसारेण चतुर्षु उपसम्प्रदायेषु विभक्तः। वस्तुतो विभागोऽयं सम्बन्धतत्त्वमाधारीकृत्य

---

*शोधच्छात्रः, संस्कृतविभागे, कलिकाताविश्वविद्यालयस्य

विहितस्य व्याख्यानस्य अनुसारेण क्रियते। अस्मिन् विषये वेदान्तसूत्रभाष्यविषये च चतुर्षु वैष्णवसम्प्रदायेषु मिथो मतानैक्ये सत्यपि तेषां राद्धान्तः सर्वत्रैव समानः। तथाह्युक्तं–

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानममृतमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्यते॥ इति। [भागवते १/२/११]

खृष्टीयपञ्चदश-षोडशशतकयोः भारतस्य पूर्वस्याम् आशायां स्थितेषु प्रदेशेषु वैष्णवान्दोलनस्य मार्गदर्शकत्वेन असमेषु शङ्करदेवः, वङ्गेषु चैतन्यदेवः, उत्कलेषु च पञ्च सखाय आसन्। वस्तुतस्तु असमेषु नूतनतया वैष्णवमतप्रचारः सम्पूर्णतया शङ्करदेवस्य एव कारणेन अभवत्। तेन स्वीयरचनासामग्र्या तथा तच्छिष्यमाधवरचितग्रन्थसहायेन असमेषु वैष्णवान्दोलनस्य सूचना विहिता। अपरतः श्रीचैतन्यदेवः स्वयं ग्रन्थादि अप्रणीय अपि ग्रन्थादिरचनाभारं वृन्दावनवासिभ्यो रूपगोस्वामिभ्यः सनातनगोस्वामिभ्यश्च प्रादादिति श्रूयते। तेनैव समग्रा अपि वङ्गाः हरिभक्तिप्लावनेनाकुलीकृता। अन्यतः उत्कलेषु जगन्नाथस्य माहात्म्यप्रचारे पञ्चसखाभिधेयानाम् अस्ति महत्त्वम्।

प्रकृतप्रबन्धे वयम् असमेषु एकशरणनामधर्म-नामकस्य शङ्करदेवेन प्रवर्तितस्य वैष्णवसम्प्रदायस्य समीक्षणं कुर्मः। एतदर्थम् आदावेव शङ्करदेवात् पूर्वकालिकानाम् असमीयानाम् उपासनासम्प्रदायानां विषये किञ्चिद् विचारणम् अपेक्षितम्। इन्दोमोङ्गलीयगोष्ठ्याः शाखाचतुष्टयम्। तद्यथा– वोडो, अहोम्, खासी, कुकी-चीन् चेति। एतासु वोडो अहोम् चेत्येतयोः शाखयोरेव प्राधान्यम्। बहिरागतानामेतेषाम् आर्येतरजातीनां स्वीयाचाराः, देवता, सम्प्रदायाचरणं चेत्येतत्सर्वं कीदृशम् आसीत् तन्निश्चयेन निर्दिष्टतया च न ज्ञातुं शक्यते, यत आ बहोः कालादेव अहोम्-गोष्ठ्या पौराणिकानां देवतानां सम्मिश्रणात् कस्यचित् पृथक् असमीयसम्प्रदायस्य तथा पृथक् कस्याश्चित् संस्कृतेः सृष्टिरभवत्। यथा वोडोगोष्ठ्या चुठियाख्योपजातिभुक्ताभिर्देवताभिः पौराणिकानां देवतानां सादृश्यं परिलक्ष्यते। यथा– चुठियानां प्रधाना देवी केचा खाइति आममांसभोजिनी, तन्त्रोक्तया कालीदेव्या सह तस्याः साम्यं परिलक्ष्यते। एवं वोडोगोष्ठीनां बथान-शिव-राइ इत्यनेन सह, मेच्छानाञ्च बालि-खुंग्रि इत्यनेन सह च यथाक्रमं शिवकाल्योः साम्यं लक्षणीयम्। काशीनाथतामुलिफुकनमहाभागस्य 'असमवुरञ्जि' इति ग्रन्थादपि कानिचन निदर्शनानि प्रदातुं शक्यन्ते। तानि यथा– लेङ्-दान इति पदेन इन्द्रस्य

ग्रहणम्।[१] ज-चिङ्-फ इति पदेन सरस्वत्याः, लाङ्-चाइ-नेट् इति पदेन वायोः, खन्-खम्फ-फ इति पदेन शक्तेः, खुन्-तुन् इति पदेन सूर्यस्य, खुन्-वान् इति पदेन चन्द्रस्य, लाउ-खे इति पदेन विश्वकर्मणश्च उल्लेखः क्रियते। एवम् आर्याणाम् आर्येतराणाञ्च देवतानां समन्वयसाधनम् अन्यत्रापि संघटितम्।"

शङ्करदेवाविर्भावात् प्रागपि असमप्रदेशे सम्प्रदायवैचित्र्यं आसीत्। तद्यथा (क) शैवधर्मः (ख) शाक्तधर्मः (ग) तान्त्रिकवैष्णवधर्मः (घ) वज्रयानीतान्त्रिकबौद्धधर्मः (ङ) नाथधर्मश्च। अत्रेदं लक्षणीयं यत् प्रत्येकमेव धर्मस्य मूलं तन्त्रम्।

अतिबहुलतन्त्रनिर्भरतावशात् निर्मिता असमप्रदेशेऽपि शङ्करदेवस्य नव्यवैष्णवधर्मप्रचारोपयोगिनी पटभूमिः। वस्तुतस्तु कोचगोष्ठीभुक्ता राजानः शैवशाक्तादिसम्प्रदायस्य पृष्ठपोषका आसन्। विश्वसिंहपुत्रस्य नरनारायणस्य समये द्वयोर्मुद्रयोः खचितं 'शिवचरणकमलमधुकरः' 'हरगौरीचरणकमलमधुकरः' इति विशेषणद्वयं मतमिदं स्पष्टीकुर्वदपि मुद्रायामेकस्यां राधाकृष्णयोः खचिता मूर्तिः विस्मयोद्रेकं जनयति। शैवनृपस्य मुद्रायां राधागोविन्दयोः मूर्तिः तेषां युगपत् हरिहरप्रीतिमेव सूचयति। विषयस्यास्य प्रमाणं S.K. Chatterji-कृते Kirata-jana-kriti-नामके ग्रन्थेऽपि प्राप्यते। तद्यथा– 'Nara-narayana and Sukla-dhvaja, like the Ahom rulers patronising Brahmans and Hinduism, did a great deal to raise the cultural level of their people. Hinduism was the dominant religion, but the aboriginal beliefs and rites were allowed full scope, although these were becoming transformed under the aegis of Hinduism.'

एतेनानुमीयते शङ्करदेवं प्रति स्वभ्रातुः शुक्लध्वजस्य अनुरागविषये नरनारायणस्य अवगतिः। किञ्चैतदपि अनुमेयं यत्, शङ्करदेवस्य प्रभावात् तदीयमुद्रायां हरिहरप्रीतिरवलोक्यते।

शङ्करदेवस्य पूर्वकालिकः असमीयः वैष्णवसम्प्रदाय आसीत् तन्त्राचारनिरतः। देवता तत्र वासुदेवः, न हि श्रीमद्भागवतोक्तः श्रीकृष्णः। तेन ज्ञायते यत् शङ्करदेवस्य पूर्वकालिकः असमीयः वैष्णवसम्प्रदायः न कथमपि शुद्धभागवतसम्प्रदायेन भक्तिसम्प्रदायेन वा तुल्यो वर्तते। तान्त्रिकवैष्णवाचाराणाम् उत्सं कालिकापुराणं

[१]प्रसङ्गत उल्लेख्यं यत् अहोम्-गोष्ठीभुक्ता राजान आत्मनः इन्द्रवंशीयत्वेन गणयन्ति यथा हिन्दुनृपतयः चन्द्रसूर्यवंशीयमन्यमानिनः

ब्रह्मपुराणं वा, न तु भागवतपुराणम्। अतः शङ्करदेवात् प्राक् वैष्णवपूजायां नैवेद्यमासीत् सामिषम्।

नओगाँमण्डलस्य आलिपुखर्यां कुसुमवरसत्यसल्ययोः पुत्रत्वेन लब्धजन्मा आचार्यः शङ्करदेवः। जात्या स कायस्थः। विश्ववरेण्यात् पण्डितप्रकाण्डात् महेन्द्रकन्दलीमहाभागात् गृहीतपाठः स योगसाधनायां मनोनिवेशं चकार। किन्तु अध्यात्मजिज्ञासायां समुचितं समाधानम् अनवाप्य स पुनः भागवतचर्चायां मनश्चक्रे। उल्लेख्येषु स्वजीवितेतिवृत्तेषु अन्यतमं तावत् तदीयं तीर्थभ्रमणम्। द्व्यशीत्यधिकचतुर्दशीशवीयाब्दे उत्तरदक्षिणभारतयोर्नैकानि स्थानानि परिभ्रम्य धर्मादिविषये तेन सुस्पष्टं ज्ञानम् अर्जितं स्वदेशं प्रत्यागम्य च प्रचारितः 'एकशरणनामधर्मः'। सम्प्रति शङ्करदेवप्रवर्तितधर्मस्य मूलतत्त्वादिविषयाणां समीक्षणं कर्तुं शक्यते।

**प्रथमतः–** शङ्करप्रवर्तिते नव्यवैष्णवसम्प्रदाये शक्त्यादिबहुदेवतापूजायां सम्मतिर्नासीत्। आदौ अपि उक्तं वैष्णवाचार्याः कृष्णस्य देवतान्तरसाम्यत्वं न स्वीकुर्वन्ति। तस्माद् देवतान्तरपूजा न कथमपि समर्थनयोग्या। स्वीयभागवतपुराणस्यानुवादप्रसङ्गेन स उक्तवान्–

अन्य देवीदेव करिवा सेव
ना खाइवा प्रसाद तार।
मूर्त्तिक ना चाइवा गृह ना पशिवा
भक्ति हइवे व्यभिचार॥ इति।

श्रीकृष्णचैतन्यदेवेन कृष्णस्य भगवत्त्वे स्वीकृतेऽपि देवतान्तरपूजाया निषेधो नाकारि। शङ्कररचितभक्तिरत्नाकरग्रन्थे एव स्वप्रचारितसम्प्रदायस्य गुणावली निवद्धास्ति। एकशरणनामधर्म इति स्वीयसम्प्रदायस्य नामकरणे किं बीजम् इति तेन व्याख्यातमेवं– "सर्वशास्त्रसारमुद्धृत्य भागवतादाशतम्

एकं शास्त्रं दैवकीपुत्रगीतम्
एको देवो देवकीपुत्र एव।
कर्मप्येकं तस्य देवस्य सेवा
मन्त्रोऽप्येकस्तस्य देवस्य नाम। इति।

अपि चोक्तम्– एक देउ, एक सेउ, एक विना नाहि केउ। इति।

अर्थात् दैवकीपुत्रगीतमिति पदग्रहणेन भागवतस्य, दैवकीपुत्र इति पदग्रहणेन अद्वितीयात्मकस्य स्वयं भगवतः कृष्णस्य, सेवा इति पदेन सेवाकर्मत्वाश्रयीभूतस्य अनादेर्गोविन्दस्य सेवायाः, मन्त्रपदेन श्रीकृष्णस्य नाम्नश्च ग्रहणम्। भक्तिप्रदीपाख्ये ग्रन्थे तेनोक्तं–

एकचित्ते तुमि मोको मात्र कर सेवा।
परिहरा दूरते यतेक आन देवा॥
नाम ना शुनिवा तुमि आन देवतार।
येन मते नहिवे भकति व्यभिचार॥ इति।

शङ्करदेवप्रवर्तिते सम्प्रदाये अन्या देवताः प्रति सम्मानप्रदर्शनं तु नैव विहितम् अपि तु तासां देवतानां दर्शनस्य प्रसादादिग्रहणस्य च निषेधेन तेन क्रमेण स्वप्रवर्तितमतस्य सङ्कीर्णत्वम् उपपादितम् इति मन्यते। तदपेक्षया श्रीकृष्णचैतन्यदेवस्य उदारता लक्षणीया। चैतन्यप्रवर्तिते सम्प्रदाये एतादृशो निर्देशस्तु नैव परिलक्ष्यते परम् अन्या देवताः कृष्णशक्त्या एव लब्धशक्तयस्ताः कर्मादिपरिचालका इति व्याख्यायते। वङ्गदेशीयेषु अपि केषुचित् वैष्णवापसदेषु देवतान्तरविरोधः अवलोक्यते। तत्र केचित् श्रीमद्भगवद्गीतायाः इमं श्लोकं प्रमाणीकुर्वते–

अनन्याश्चिन्तयन्तो मां ये जना पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ [गीता ९/२२)

प्रसङ्गतः श्लोकस्यास्य अनन्यपदस्य अर्थविवरणं चैतन्यसम्प्रदायरीत्या प्रासङ्गिकतां वहति। अनन्यशब्दस्य व्युत्पत्तिस्तावत् अविद्यमानः अन्यः यस्य स अनन्यः। अनन्या इति जना इत्यस्य विशेषणम्। जनशब्दोऽत्र भक्तवाचकः।[२] ये भक्ताः माम् अनन्याः चिन्तयन्तः पर्युपासते इत्यस्य तु मम प्रीत्यर्थम् एव ये माम् उपासते न तु प्रयोजनान्तरम् अभिलक्ष्य तेषां नित्याभियुक्तानाम् इत्यादि शेषः। तथाहि श्लोकस्यास्य व्याख्याने बलदेवः– "ये जना अनन्या मदेकप्रयोजना मां चिन्तयन्तो ध्यायन्तः परितः कल्याणगुणरत्नाश्रयतया विचित्राद्भुतलीलापीयूषाश्रयतया दिव्यविभूत्याश्रयतया चोपासते भजन्ति तेषां नित्यं सर्वदैव मय्यभियुक्तानां विस्मृतदेहयात्राणाम् अहमेव योगक्षेमम् अन्नाद्याहरणं

---

[२]श्रीलविश्वनाथचक्रवर्तिना श्लोकस्यास्य व्याख्यानोपक्रमे उच्यते– मदनन्यभक्तानां सुखं तु न कर्मप्राप्यं किन्तु मद्दत्तमेव इति। बलदेवविद्याभूषणेनापि उच्यते व्याख्यानोपक्रमे– अथ स्वभक्तानां विशेषं निरूपयति इति। एतेन जनशब्दोऽत्र भक्तपर इति निश्चप्रचं मन्यते।

तत्संरक्षणं च वहामि।” इति।

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ [गीता १८/६६]

अस्य श्लोकस्य व्याख्यानावसरे अनेके गौडीयवैष्णवम्मन्याः पुनः भ्रमात् शङ्करदेवप्रवर्तितस्य एकशरणनामधर्मः इत्याख्यस्य परद्वेषमूलकस्यैव प्रचारं कुर्वन्ति। किन्तु वैष्णवाचार्याणां ग्रन्थादीनां सम्यगध्ययनेन ज्ञायते यत् चैतन्यानुयायिनाम् अयं न आश्रयणीयः पन्थाः। अस्य श्लोकस्य व्याख्यायां श्रीलविश्वनाथचक्रवर्तिना उच्यते– “एकं मां शरणं व्रच न तु धर्मज्ञानयोगदेवतान्तरादिकम् इत्यर्थः” इति। बलदेवेनाप्युच्यते– “मां सर्वेश्वरं कृष्णं नृसिंहदाशरथ्यादिरूपेण बहुधाविर्भूतं विशुद्धभक्तिगोचरं सन्तम् अविद्यापर्यन्तसर्वकामविनाशकम् एकं न तु मत्तोऽन्यं शितिकण्ठादिं शरणं व्रज प्रपद्यस्व।” यद्यप्यत्र देवतान्तराश्रयणं परित्यक्तव्यम् इति व्याख्यानतः स्पष्टतया ज्ञायते किन्तु तेषां निन्दनं नैव विधीयते। यतः वैष्णवसम्प्रदायस्य प्रमाणभूते लघुभागवतामृते श्रीलरूपगोस्वामिपादैः ब्रह्मशिवादीनां कृष्णावतारत्वेनैव वर्णनं विहितम्।[३] पद्मपुराणेऽप्युच्यते–

सृष्टेरादौ महाविष्णुः सिसृक्षुः सकलं जगत्।
स्रष्टा पाता च संहर्ता त्रिमूर्तिरभवत् स्वयम्॥
सृष्ट्यर्थमस्य जगतः ससर्ज ब्रह्मसंज्ञकम्।
दक्षिणाङ्गज आत्मानमात्मना श्रेष्ठपूरुषः॥
ततस्तु पालनार्थाय जगतो जगतीपतिः।
विष्णुं ससर्ज वामाङ्गान्निजांशं केशवं मुने॥
अथ संहरणार्थाय जगतो रुद्रमव्ययम्।
मुने ससर्ज मध्याङ्गात् हृत्पद्मनिलयः प्रभुः॥
रजः सत्त्वं तमश्चेति पुरुषं त्रिगुणात्मकम्।
यदस्ति केचिद् ब्रह्माणं विष्णुं केचिच्च शङ्करम्॥
एको विष्णुस्त्रिधा भूत्वा सृजत्यत्ति च पाति च।
तस्माद्भेदो न कर्तव्यस्त्रिषु देवेषु सत्तमैः॥ [क्रियायोगसारखण्डे २/१-६]

---

[३]गुणावतारास्तथात्र कथ्यन्ते पुरुषादिह। विष्णुर्ब्रह्मा च रुद्रश्च स्थिति-सर्गादिकर्मणे॥ (लघुभागवतामृते गुणावतारवर्णनप्रसङ्गे।

ब्रह्म-विष्णु-शिवानां हरेर्गुणावतारत्वेन अवतारान्तरवत् तेषां पूज्यत्वम् एव भृशं निर्णीयेत न तु तेषाम् उपेक्षा निन्दा वा। श्रीमद्भागवतस्य सम्यक्-पाठेनैव ज्ञातुं शक्यते यत् तत्र अन्यदेवतापूजाया निन्दा नास्ति। परं तत्रैवोक्तं–

यथा तरोर्मूलनिषेचनेन
तृप्यन्ति तत् स्कन्धभुजोपशाखाः।
प्राणोपहाराच्च यथेन्द्रियाणां
तथा च सर्वार्चनमच्युतेभ्यः॥ [भागवते ४/३९/२४]

यथा वृक्षस्य मूलसेचनात् शाखानां तथोपशाखानां तृप्तिर्जायते यथा वा प्राणतुष्टिविधाने इन्द्रियादीनां तुष्टिस्तथैव भगवच्छ्रीकृष्णसेवयैवान्यदेवतानां पूजा भवति।

ननु देवतान्तराणां दर्शनं प्रसादग्रहणञ्चैवं निन्द्यं स्याच्चेत् प्रकारान्तरेण कृष्णपूजाया एव निकृष्टत्वं प्रतिपन्नं, तेन च परोक्षतया तस्या निषेध एव प्रख्यापितः, यतः शङ्करदेवोऽपि भागवतानुगामी। भागवतनिर्देशः तस्यापि अलङ्घ्यः प्रमाणस्वरूपश्च। वैष्णवाचार्याः श्रीमद्भागवतं ब्रह्मसूत्रस्य व्यासभाष्यत्वेन स्वीकुर्वन्ति। अतः भागवतस्य प्रामाण्यं सर्ववैष्णवसम्प्रदायेषु समानतया आद्रियते। किन्तु प्रकृते श्लोके भगवतः श्रीकृष्णस्य मूलप्राणैः, अन्यदेवतानाञ्च यथाक्रमं शाखोपशाखाभिस्तथा इन्द्रियैः साकम् औपम्यं विहितम्। लौकिकोदाहरणे लौकिकन्यायस्याधिकारो विद्यते। अतो विचार्यमेतत् यत् कश्चित् निपुणद्रष्टा वृक्षदर्शनकाले किं स मूलमात्रं पश्येत्, उत काण्डमात्रं, किमुत शाखोपशाखामात्रम्? स तु सम्पूर्णवृक्षं पश्येत्। अर्थात् क्रान्तदर्शी कश्चिद् भक्तः कृष्णदर्शनकाले तत्रैव सर्वदेवान् पश्येत्। यथा कुरुक्षेत्रे रणभूमावर्जुनो भगवत्कृपयाधिकृष्णं सर्वदेवता अपश्यत्। अतः शङ्करदेवविहितो देवतान्तरविरोधः चिन्त्य एव विदुषामिति प्रतिभाति। अनुरूपतया श्रीकृष्णमुद्दिश्य दीयमानं नैवेद्यं तच्छरीरांशभूता अन्यदेवता अपि गृह्णन्ति एव इति कल्पनं नानुचितम्। तस्माच्छ्रीकृष्णप्रसादो देवतान्तराणामपि प्रसादः। देवतान्तराणां प्रसादग्रहणं वारितश्चेद् भक्ताः कृष्णप्रसादादेव वञ्चिताः स्युः। एवम् एव श्रीकृष्णाङ्गभूताभ्यः तदवतारभूताभ्यो वा ब्रह्मशिवादिभ्यो देवताभ्य निवेदितः प्रसादः वस्तुतः श्रीकृष्णायैव निवेद्यते अवताराणां तस्माद् अभेदात्। एतेन देवतान्तरप्रसादग्रहणं तिरस्कृतं चेत् पर्यवसानं तु कृष्णप्रसादतिरस्कारे एव इत्यपि विचार्यं सुधीभिः।

शङ्करदेवप्रदत्तेषु उद्धृता निषेधावली अधोलिखितान् अर्थान् प्रतिपादयति चेत् सा अधिकं वैष्णवोचिता स्यादित्यनुमीयते। देवतान्तरपूजाया विरोधस्तेन विहितः(!)। वृक्षस्य कस्याश्चिदुपशाखाया जलसेचनेन यथा शाखान्तराणां प्रदत्तजलाया उपशाखाया वा न कस्यापि तृप्तिर्जायते तथैव विशेषफलाभिमानिन्या देवतायाः पूजाया न तस्यास्तृप्तिर्न वा भक्तानाम् अभीष्टसिद्धिर्जायते। अतो मूलभजनेन कृष्णपूजया वा देवतान्तरप्रीत्युत्पादनमेव श्रेयः। अन्यथा देवान्तरान् उद्दिश्य दीयमानं नैवेद्यं कृष्णप्रसादवाच्यतां नेयात्। तस्मात् निष्फलभजनायां देवगणाभीष्टमानवजन्मरूपसाधनकालापव्ययस्तेन वारितः।

**द्वितीयतः–** आसीत् स पूजाङ्गपशुहिंसाया विरोधी। शङ्करप्राग्वर्तिनः असमीयवैष्णवसम्प्रदायस्य तन्त्राश्रयत्वात् तत्रापि पशुहिंसा पूजाया अविच्छिन्नाङ्गरूपेण परिगण्यते स्म। किन्तु भागवतसम्प्रदायस्य नामान्तरं दयाधर्मः। तस्मात् काचिदपि हिंसा तत्र न युक्ता, हिंसाया धर्मविरुद्धत्वात्। शङ्करदेवेनापि भागवतधर्मस्य अनुरूपाचारः निर्देशितः, विहितश्च पशुहिंसाया विरोधः। वैष्णवाचार्या अपि पशुवधम् आध्यात्मिकोन्नतेः बाधकं गणयन्ति। तद्यथा–

> यज्ञे यज्ञे पशून् हत्वा कृत्वा रुधिरकर्दमम्।
> अनेन प्राप्यते स्वर्गो नरकं केन गम्यते॥ [सात्वततन्त्रम्]

अत्रायमाक्षेपः यत् वेदप्रामाण्यवादी हि वैष्णवसम्प्रदायः। वेदे अश्वमेधादियागेषु पश्वालभनविषयकः विधिः परिलक्ष्यते। वेदविहितस्य धर्मत्वं, वेदनिन्दितस्य चाधर्मत्वमिति नियमात् पश्वालम्भस्य वेदविहितत्वेन तस्य धर्मत्वमेव सुतरां सिद्ध्यति। किन्तु वैष्णवसम्प्रदाये पश्वालभनं दार्ढ्येन वारितम् अवहेलितञ्च। एवं वेदे पश्वालम्भनाङ्गीकारे सत्यपि वैष्णवसम्प्रदाये तस्य निषिद्धत्वात् प्रकारान्तरेण परोक्षतया वा वेदविरोधित्वेन तस्य धर्मविरोधित्वं वेदाप्रामाण्यवादित्वापत्तिश्च। अत्रोच्यते– वेदविहितहिंसाया अधर्मजनकता न क्वापि निर्दिश्यते। कामतः प्राप्तस्य मांसादिभक्षणस्य नियमनार्थं हि परमकारुणिक्या श्रुत्या एवं निर्देशा दीयन्ते। अस्मिन् विषये च साङ्ख्यकारिकाया स ह्यविशुद्धिक्षयातिशययुक्तः इति कारिकांशस्य व्याख्याने साङ्ख्यतत्त्वकौमुदीकारेण पदवाक्यप्रमाणपारावारीणेन श्रीमता वाचस्पतिमिश्रेण सप्रमाणं प्रतिपादितं यज्ञाङ्गभूतहिंसाया अपि अधर्मजनकता। पुनश्च श्रुतीनाम् इव तदनुवादरूपाणां पुराणेतिहासादीनाम् अपि अस्ति प्रामाण्यम्। तस्मात्

पुराणादिष्वपि प्राप्ता निर्देशाः श्रुतिनिर्देशा एव इति ध्येयम्। सर्वप्रमाणशिरोभूतस्य वेदस्य प्रामाण्यं न हि कादाचित्कं क्षणिकं कालिकं वा परं शाश्वतं सर्वकालिकं सनातनम्। अत्र कोऽपि विशेषः नास्ति। किन्तु धर्मसङ्कटे सति स्वसृष्टेः यथायथं संस्थित्यै पालनाय रक्षणाय च धृतविग्रहो भगवान् धरायाम् अवतीर्य यत् सर्वं निर्दिशति तत्र विशेषो विद्यते। सामान्यविशेषयोः पुनर्विशेषस्य बलवत्त्वम् इति। ब्रह्मवैवर्तपुराणस्य कृष्णजन्मखण्डे कलौ पश्वालम्भस्य निषेधः विहितः। तद्यथा–

अश्वमेधं गवालम्भं सन्न्यासं पलपैतृकम्।
देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्॥ इति।

अत एतद्विशेषविधिबलात् पूर्वोक्ताः– अश्वमेधः, गवालम्भः, सन्न्यासं, पितृपुरुषान् उद्दिश्य क्रव्यतर्पणं, देवरेण सुतोत्पादनञ्चेत्येते पञ्च विषयाः सविशेषं वर्जनीयाः।

आलोच्यमानेऽस्मिन् प्रसङ्गे पुनरप्येकस्य प्रश्नस्य निरसनं प्रासङ्गिकमित्यहं मन्ये। ननु कलौ सन्न्यासे निषिद्धे सति श्रीचैतन्यः कथं सन्न्यासं स्वीकृतवान् सन्न्यासस्य पूर्वोक्तविधिविरुद्धकर्मत्वात् इति चेदुच्यते– श्रीचैतन्यदेवः सन्न्यासी नासीदिति मन्यते। यद्यपि चैतन्यचरितामृते चैतन्यमङ्गले वा तस्य सन्न्यासविषयकं कथनं समुपलभ्यते तथापि तत्र एतदेव निर्दिशति यत् स भारतीसम्प्रदाये ब्रह्मचर्यमात्रम् अङ्गीकृतवान् इति। तत्र प्रमाणं हि यदि स पूर्णसन्न्यासी स्यात् तथात्वे तस्य नाम श्रीकृष्णचैतन्यभारती इत्येवमुचितं स्यात्। यथा तदीयसन्न्यासिनो गुरोर्नाम केशवभारती इति। अथवा दीक्षागुरोः परम्परानुरोधेन तस्य नाम श्रीकृष्णचैतन्यपुरीभारती इत्येवमपि युक्तं स्यात् (दीक्षागुरोः ईश्वरपुरीमहाभागस्य उपाधियोगात्)। तस्मात् स पूर्णसन्न्यासी आसीन्न वेत्येतद् गवेषणास्पदं विवेच्यञ्च।

**तृतीयतः**– शङ्करदेवाविर्भावात् पूर्वम् असमप्रदेशे प्रचलितो वैष्णवधर्मः वस्तुतस्तु कालिकापुराणेन तथा संस्कृतभाषया रचितैरन्यैः शास्त्रैः प्रचारित आसीत्। किन्तु शङ्करदेवेनैवादौ स्थानीयलोकायतभाषया सम्प्रदायप्रचारः कृतः यश्च क्रमेण सर्वोपकारकः वैष्णवजनोचितः समजनि। अनायासबोध्यया तथा समाजव्यवहार्यया भाषया प्रचारात् तदीयो धर्मो बौद्धजैनादीनां धर्म इव साधारणजनमुपेतः, गतश्च सर्वजनग्राह्यताम्। स तदनुगतश्च माधव उभावेव स्थानीयलोकायतभाषया धर्मप्रचारं चक्रतुः। अस्या भाषासमस्यायाः

श्रीचैतन्यदेवस्य धर्ममतप्रचारकालेऽपि महती भूमिका आसीत्, यस्याः सविशदम् आलोचनम् अपेक्षितम्।

प्रसङ्गत उल्लेख्यं वङ्गभाषया रचितत्वात् चैतन्यचरितामृतस्य प्रकाशे यद्यपि कृष्णदासकविराजस्य बहुतरविघ्ना अवलोकितास्तथापि गौडीयवैष्णवानां समीपे तदासीद् वेदवत् प्रमाणम्।

**चतुर्थतः**– तदीयभक्तिमार्गे समेषाम् एव मानवानां धर्माचरणाधिकारः समभावेन प्रवर्तते। नहि तत्र जातिधर्मौ प्रतिबन्धकौ। तत्र एवम् अपि श्रूयते यत् कोऽपि शूद्राचार्यो चतुर्वर्णेषु श्रेष्ठतमाय ब्राह्मणायापि नामोपदेशं प्रदातुं शक्नुयात्। अतस्तत्प्रवर्तितो धर्मो लोकप्रियताम् अवाप। अत एवोच्यते तत्कृते भक्तिविवेके– चण्डालोऽपि द्विजश्रेष्ठो हरिभक्तिपरायणः इति। अपि च, “शरणे जात्यादिर्नियमो नास्ति” इति।

किं बहुना, तच्छिष्यो रामानन्दद्विजोऽप्यनुरूपमेवोवाच–

जाति पङ्क्ति पुच्छइ नाहि कोइ।
जो हरिको भजे, सो हरिका होइ॥ इति।

अयमेव संस्कारः भगवता चैतन्यमहाप्रभुणा प्रतिवाद्यान्दोलने समानीतः।

किन्तु गच्छता कालेन शङ्करदेवप्रवर्तितं सम्प्रदायम् आदौ विरोधं कुर्वन्तोऽपि ब्राह्मणाः परं तस्य लोकप्रियताहेतोः स्वीकृतवन्तः। ततस्तदीयशिष्यो दामोदरदेवः “ब्रह्मसंहति” इत्याख्यां गोष्ठीं प्रवर्तितवान्, यत्र हि शङ्करदेवस्य ब्राह्मणानुयायिनो योगदानं कृतवन्तः। अतो “ब्रह्मसंहति” इति गोष्ठी “ब्राह्मणसत्रम्” इत्यपि वक्तुं शक्यते। तेन तत्र भक्तिधर्मशीलेन साकं ब्राह्मणानाम् आचारोऽपि प्रचलन्नासीत्। तत्फलतया शङ्करदेवेन वारितापि जातिभेदप्रथा तत्र कठोरतया प्रचलन्ती आसीत्। कुत्रचित् सत्रे तन्त्रदीक्षापि दीयते।

**पञ्चमतः**– यद्यपि शङ्करदेवो न विग्रहपूजने कृतादरः तथापि तैरुक्तं सकामभक्तस्य कृते विग्रहपूजायाः प्रयोजनम् अस्ति। परं निष्कामोत्तमभक्तस्य तन्नावश्यकम्। तन्मते उत्तमभक्तो भगवतो नामोच्चारणेन तत्पादपद्मयोः श्रद्धां निवेदयति। तद्विग्रहो हि श्रीमद्भागवतमहापुराणस्य ग्रन्थकलेवर एव। स्वयं भागवतमेव भगवतः श्रीकृष्णस्य स्वरूपविग्रहं मन्यमानं तमेव पूजयन्ति। तस्मिन् समये नहि कस्मिन्नपि सत्रे विग्रह आसीत्। तत्र केवलम् आसीत् उपासनागृहम् एकम्, एकञ्च गुरोरासन्दनम्। ततः परवर्तिनि काले निखिले सत्रे विग्रहपूजायाः

प्रचलनम् अभवत्। पुरुषोत्तमठक्कुरप्रवर्तिते "पुरुषोत्तमसंहति" इत्याख्ये तथा गोपालदेवाताप्रवर्तिते "कालसंहति" इत्याख्ये च सत्रे शङ्करदेवस्य परम्परा अविकृता एवानुसृता भवति स्म।

**षष्ठतः**– असमीयवैष्णवसम्प्रदाये मूलवस्तूनि चत्वारि– देवः, नाम, भक्तः, गुरुश्चेति। तदीयशिष्यमाधवदेवोक्तिः एवात्र मानम्–

शङ्करदेव पुनरपि देखाइलन्त।
गुरु देव नाम भक्त चिनाइ दिलन्त॥ इति॥

साधारणप्रत्ययेनादितो मूलवस्तुत्रयं शङ्करदेवेनोक्तं, परं तच्छिष्यो माधवः चतुर्थवस्तुरूपेण गुरुरिति पदं योजितवान्। चतुर्षु वस्तुषु देवविषये तु एकशरणनामधर्मस्वरूपालोचनावसरे पूर्वमेव चर्चा जाता। नहि भक्तिरत्नाकरग्रन्थस्य प्रथमाध्यायस्य विषयवस्तुना साकमस्य साम्यं वर्तते। गुरुविषये शङ्करमाधवयोर्मध्ये मतसाम्यं नास्ति। गुरुवस्तुविषयकं मतवैभिन्न्यं परम् आलोचयिष्यते।

अथ समासेन द्वितीयवस्तुनः नाम्नः आलोचनं क्रियते। असमे शङ्करदेवात् प्राग् वैष्णवधर्मे तन्त्र-क्रियाकर्मणोः प्राधान्यात् नाम प्रति एतादृशः प्रत्ययो न दृष्टपूर्वः। परन्तु शङ्करदेवोक्तायां पद्धतौ उपासनप्रक्रियाद्यपेक्षया भक्तेः अधिकमाहात्म्यं परिलक्ष्यते। एतेन एतदेव अनुमीयते यत् शङ्करदेवात् प्राग् असमीयवैष्णवसम्प्रदायो यदि वेदस्य कर्मकाण्डेन साकम् उपमीयते तदा तु तदीय एकशरणनामधर्मो बाहुल्येन आरण्यकोक्तया प्रतीकात्मिकया उपासनया तुल्यो वर्तते, यत्र भागवतमेव श्रीकृष्णस्वरूतया पूज्यते जनैः। अत्रेदमुल्लेख्यं यदुपनिषदो यथा ब्रह्मसाक्षात्कारं कारयन्ति तथैव श्रीचैतन्यमहाप्रभुप्रवर्तितः कृष्णभक्तिमूलधर्मः कृष्णसाक्षात्कारं जनयति।

नामनामिनोः अभिन्नत्वम् अखिलवैष्णवसम्प्रदायैः सर्वसम्मतिक्रमेण स्वीकृतम्। जीवगोस्वामिनापि तथैवाङ्गीकृतम्– "नामनामिनोरभेदः। भगवत्स्वरूपम् एव नाम" इति।

वैष्णवाचार्या मन्यन्ते कलौ श्रीकृष्णनामस्मरणमेव भक्तिसाधनसोपानम्। तथाहि भणितं भागवते–

कलौ दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्॥

कृते यद्ध्यायतो विष्णुं त्रेतायां यजते मखैः।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्तनात्॥ [भागवते १२/३/५१-५२]

अपि च, बृहन्नारदीयतन्त्रे–

हरेर्नाम हरेर्नाम हरेर्नामैव केवलं।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा॥ [३८/१२६]

**सप्तमतः**– भक्तिनाममाहात्म्ययोर्विषये ऐकमत्ये सत्यपि गौडीयवैष्णवाङ्गीकृतनवविधसाधनभक्तिषु केवलमादितः चतुष्टयं श्रवणं, कीर्तनं, स्मरणं, अर्चनञ्चेति शङ्करदेवैः गृहीतम्। यद्यपि भक्तिरत्नाकरस्य भक्तिसन्दर्भे तैः दशविधभक्तेरुल्लेखस्तथा पूर्वोक्तानां चतसृणां भक्तीनाम् एकैकस्या उपविभागोऽपि कृतः। साधनभक्तिः द्विविधा। तयोः शङ्करदेवस्वीकृता साधनभक्तिः चतुर्धा विभक्ता श्रवणकीर्तनस्मरणार्चनभेदात्। अन्यवैष्णवसम्प्रदायस्वीकृता साधनभक्तिश्च नवधा विभक्ता श्रवण-कीर्तन-स्मरणा-र्चन-पादसेवन-दास्य-सख्य-वन्दना-त्मनिवेदन-भेदात्। तथाह्युक्तं–

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥ इति॥

शङ्करस्वीकृतः श्रवणविधिः पुनः उपक्रमो-पसंहारा-भ्यासा-पूर्वता-फला-र्थवादो-पपत्तिभेदात् षोढा, कीर्तनविधिः नाम-स्तुति-भागवतव्याख्या-गीत-भेदात् चतुर्धा, स्मरणविधिः नाम-लीला-रूपभेदेन त्रिधा, अर्चनविधिश्च सकाम-निष्कामभेदेन द्विधा विभक्तः।

अत्रेदं वक्तव्यं नृसिंहपुराणोक्तकीर्तनं त्रिधा विभज्यते। विभागानां नामदर्शनात् स्पष्टमेतत् प्रतीयते यत् कीर्तनं जपश्च तत्र न पृथक्तया गृह्येते। नृसिंहपुराणे उक्तकीर्तनस्य वाचिकोपांशुमानसात्मकं विभागत्रयं वैष्णवाचार्याः जपप्रकारभेदत्वेन अङ्गीकुर्वन्ति। मन्ये एतदेव परवर्तिनि काले वङ्गप्रदेशीयवैष्णवसमाजं द्वयोः पृथक् गोष्ठ्योः विभाजयामास। अनयोरेका तारकब्रह्मनाम्नः 'हरे कृष्ण' इत्यादिमहामन्त्रस्य वा उदात्तकीर्तनपक्षपातिनी अपरा च जपार्थं तारकब्रह्मनाम संरक्षति, कीर्तनार्थञ्च सम्प्रति अलभ्यमानस्य श्रीचैतन्यदेव-महाप्रभुणादिष्टेन परमभागवतेन श्रीरूपगोस्वामिना अनुलिखितस्य गौरव्रजपरिक्रमाख्यग्रन्थस्य षष्ठे

किरणे 'जय जय राधे कृष्ण गोविन्द मधुसूदन राम नारायण हरे' इति महामन्त्रस्य उच्चैः कीर्तनं करोति।

वृन्दावनस्य सुरमाकुञ्जे तथा चान्यत्र अद्यत्वेऽपि अस्य नाम्नः सङ्कीर्तनं क्रियते। यत् गौरव्रजपरिक्रमाग्रन्थः कुत्रापि समुपलभ्यते चेत् तेन वैष्णवसम्प्रदायानां मतवैमत्यं विदूरीकुर्यात्।

**अष्टमतः**– शङ्करदेवोक्तधर्मेषु तृतीयस्तावद् भक्तः। भक्तिरत्नाकरग्रन्थस्य तृतीयाध्याये भक्तविष्ण्वोरभेद उररीकृतः। तथाहि तेन गदितं– "विष्णु वैष्णवर किञ्चिते नाहि भेद"। इति।

विषयेऽस्मिन् तदीयमतम् अनेकत्र अद्वैतिनः शङ्कराचार्यस्य मतेन साम्यं वहति। तेन तस्य ग्रन्थस्य द्वाविंशाध्याये जीवात्मपरमात्मनोरभेदः प्रतिपादितः। मायायवशात् तयोर्भेदबुद्धिः, भक्तिश्च मायोत्तरणस्य तथा प्रमायाः करणम्। अत्र कारणं हि– "भगवदनुग्रहम् अन्तरेण न कस्यापि ज्ञानसम्भव इति" इति।

तन्मते नहि यज्ञादिवैदिककर्मणा भक्तिः वैराग्यं वा जायते। अतः कर्मफलबन्धनाद् मुक्तेः अहङ्कारलोपस्य वोपायभूतं वैराग्यम् ऐकान्तिकभक्त एव समाश्रयितुं समर्थः। कारणं भक्त ईश्वरं व्यतिरिच्य नान्यस्य कस्यापि सत्त्वम् अङ्गीकरोति। यथा "पटादिकार्यं तन्त्वादिव्यतिरेकेण न दृश्यन्ते... विश्वमिथ्यादृष्टित्वात् शुक्तिरजतादिवत्" इति।

तन्नये भक्तः त्रिविधः– उत्तमः, मध्यमः, प्राकृतश्चेति। उत्तमो भक्तः कृष्णैकचित्तो निष्कामश्च। यः खलु भगवन्तम् अखिलप्रपञ्चे तथा भगवति तन्मायास्वरूपं निखिलं भुवनं पश्यति। अत एव तेनागादि–

सकल प्राणीक देखिवेक आत्मसम।
उपाय मध्यत इठो अति मुख्यतम॥ इति।

मध्यमभक्तः श्रीकृष्णं सर्वनियन्तृरूपेण जानाति। प्राकृतभक्तस्य विग्रहपूजनं भक्तिमार्गस्य प्रथमं सोपानम्। एतेन स भागवतभाष्यकारस्य श्रीधरस्वामिनः अनुगः इति प्रतिभासते– 'प्रकृत्या प्रारम्भकः। अधुनैव प्राकृतभक्तः सन् शनैरुत्तमो भविष्यतीत्यर्थः' इति भाष्यवचनेन एतन्मतस्य पुष्टिर्भवति। किञ्च स मन्यते भक्तानां नित्यनैमित्तिककर्मभ्रंशाद् अपि प्रत्यवायो न जायते। इदं च पुनः श्रीधरस्वामिप्रदत्तस्य– 'इदानीन्तु नित्यनैमित्तिकस्वधर्मनिष्ठाम् अप्यनादृत्य केवलं हरिभक्तिरेवोपदेष्टव्या' इति निर्देशस्य अनुसारीति ज्ञायते। स्वीये भक्तिरत्नाकरनामके

ग्रन्थे तेन भक्तिः उत्तमान्तरङ्गसप्रेमनिर्गुणभेदेन चतुर्धा विभक्ता।

**नवमतः**– शङ्करदेवप्रवर्तितसम्प्रदायस्य चतुर्थस्तावद् गुरुः। अत्रेदं स्मर्तव्यं यत् तन्नये यतो हि विग्रहपूजा विशेषेण न गृहीता ततः साक्षात्कृष्णरूपेण भागवतरूप-ग्रन्थकायस्य तथा गुरोः साक्षात् कृष्णेन सहाभेदः बहुत्रैव प्रतिपादितः। परवर्तिनि काले प्रतिष्ठितेषु सत्रेषु एकम् एव कीर्तनगृहं गुरुदेवस्य च कृते एकमासन्दनं निर्दिष्टम्। उपासनायै न कश्चिद् विग्रहस्तत्र स्थापितः। तथाहि भागवते–

आचार्यं मां विजानीयान्नावमन्येत कर्हिचित्।
न मर्त्यो बुद्ध्यासूयेत सर्वदेवमयो गुरुः॥ [भागवते ११/१८/२७]

श्लोकस्यास्य प्रभावादेव शङ्करदेवैरुक्तं– "गुरुरेव हरिः" इति, नाम वासुदेव एव गुरुः। तेन खलु गुरुदेवे वासुदेवस्य सत्ता स्वीकृता उत स्वयं वासुदेवे गुरोः सत्ताङ्गीकृता इति निश्चयेन ज्ञातुं न शक्यते। परं न स कदापि स्वकीयजीवने मानवदेहधारिणं गुरुरूपेण वृतवान्। स स्वयं भगवतः सच्चिदानन्दं श्रीकृष्णम् एव गुरुरूपेण स्वीकृतवान्। एवं सूक्ष्मातिसूक्ष्मतया परिशील्यमाने मानवदेहधारिणं गुरुरूपेण स्वीकुर्वते अपि भक्ताय विष्णुम् एव गुरुरूपेण वरीतुम् आदिष्टवान् इति प्रतीयते–

हृदयर परम ईश्वर मोर गुरु।
प्रभु भगवन्त भकतर कल्पतरु॥ इति॥

अपरतः तच्छिष्यस्य माधवदेवस्य गुरुतत्त्वं दृश्यते चेत् तदन्यथा प्रतीयते। तेन गुरुभातिमायामुक्तं– "विने गुरु भक्ति रकति कवहु ना होइ" इति।

एतेन एतदेव ज्ञायते विनैव गुरुभक्तिं न कदापि कृष्णानुरक्तिः सम्भवति। किञ्चानेन एतदपि स्पष्टं यत् गुरुः कृष्णश्च मिथः पृथक्। अर्थात् स मानवदेहधारिणं मार्गदर्शकं गुरुरूपेण स्वीकृत्य तत्रैव भगवतः श्रीकृष्णस्य सत्तां स्वीचकार। शङ्करदेवप्रवर्तिते सम्प्रदाये गुरुवरणसम्बन्धिनिर्देशः कस्मिन्नर्थे ग्रहीतव्यः इति विषये इतोऽपि शोधः अपेक्षित इति भाति। किन्तु इदमत्र वक्तुं शक्यं यत् गुरुशिष्यपरम्परायां येन प्रकारेण धर्मः प्रचारितः तत्र केवलं गुरुरूपेण परमात्मनः स्वीकारे तन्न सम्भवतीति।

परवर्तिनि काले गुरुः चतुर्धा विभज्यते– इष्टगुरुः अर्थात् श्रीकृष्णः, उपकारिगुरुः नाम तत्त्वोपदेशकः, अञ्जनीयागुरुः शिक्षागुरुः वा, सुहृद्गुरुश्च भक्तगुरुः। आदितः त्रयो गुरवः सार्थकनामानः। परं भक्तगुरोः स्थानावबोधाय

माधवदेवनिर्दिष्टस्य गुरोरपेक्षया गुरुभक्तौ विशेषारोपो द्रष्टव्यः। अत्र शङ्करदेवकृते वैष्णवसम्प्रदाये तथा चैतन्यभागवते 'मद्भक्तपूजाभ्यधिका' इत्ययं भागवतभावः स्पष्टं परिलक्ष्यते। तद्यथा–

आमार भक्तेर पूजा आमा हइते वड।
सेइ प्रभु वेदे भागवते कइला दड़॥ इति॥ [चैतन्यभागवते १/१]

अनुरूपञ्चोक्तं शङ्करदेवानुगामिना माधवदेवेनापि–

भकते से मोर हृदि जानिवा निश्चय।
भकत जनर जान आमि से हृदय॥ इति॥

**दशमतः**– नहि शङ्करदेवो विशिष्टसम्प्रदायप्रणेता। तत्प्रवर्तितधर्मो हि गीताभागवतयोरनुसारी आसीत्। शङ्करदेवस्तथा तत्परवर्तिनः भट्टदेवादयः सर्वे एव गीताभागवतयोः श्रीधरस्वामिकृतटीकाम् अनुसृत्य स्वकीयं राद्धान्तं प्रतिष्ठापितवन्तः। स्वमतप्रतिष्ठापनाय तेन भागवतानुसारि प्रमाणचतुष्टयं स्वीकृतम्– श्रुतिः, प्रत्यक्षं, महाजनप्रसिद्धिः, अनुमानञ्चेति। विषयेऽस्मिन् श्रुतिः, स्मृतिः, न्यायश्चेति प्रस्थानत्रयं न मुख्यतया अङ्गीकृतम्। तेन भागवतेन एव तस्य अधिकाधिकानां राद्धान्तानां सिद्धिः परिलक्ष्यते। यथा तस्य अद्वैततत्त्वं प्रथमस्कन्दस्य द्वितीयाध्यायस्य एकादशश्लोके प्रतिष्ठितम्– "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इति। अर्थात् नामरूपयोः भेदे सत्त्वेऽपि वेदान्तस्य ब्रह्म, साङ्ख्यस्य परमात्मा, भक्तस्य भगवान् च एक एव।

**एकादशतः**– जगद्ब्रह्मणोर्विषयेऽपि शङ्करदेवस्य मतम् अत्रोल्लेखार्हम्। तन्नये अद्वयतत्त्वमेव अखिलसृष्टेः कारणम्। कारणं पुनः निमित्तोपादानभेदेन द्विविधम्। मायावशाद् जगदिदं सदाभासत्वेन भासते। तथाहि भावार्थदीपिकायां श्रीधराचार्येणोच्यते–

यत् सत्त्वतः सदाभाति जगदेतदसत्स्वतः।
सदाभासमत्यस्मिन् भगवन्तं भजाम तम्॥

अनुरूपमेव दृश्यते शङ्कदेवस्य कीर्तनघोषायाम्। तन्नये भगवन्नारायणो हि परब्रह्म। सर्वातिशायिमायावशाज्जीवेन तत्स्वरूपं न ज्ञायते। तथाहि कीर्तनघोषायां–

तुमि सत्यब्रह्म तोमात प्रकाशे
जगत इठो असन्त।
जगतत सदा तुमिओ प्रकाश
अन्तर्यामी भगवन्त॥

जगतः सृष्टिस्थितिलयहेतुः स एकाकी एव। अतः श्रीकृष्णं व्यतिरिच्य इतरेषां देवतानां सत्ताभावात् देवान्तरस्वीकारेण प्रयोजनं नास्ति।

तथाहि कीर्तनघोषायां–

तुमि से केवल सँचा, सव सवे मायामय।
तोमाते से हन्ते सृष्टि होवे स्थिति लय॥ इति॥

**द्वादशतः–** शङ्कराचार्यो हि विवर्तवादी। तन्मते जीवो जगच्च ब्रह्मणो विवर्तः, न तु परिणामः। जीवो जगच्च परमार्थविचारेणांशमात्रम्। शङ्करदेवस्य मते जीवः श्रीकृष्णस्यांशः। नाम विवर्तवादी यथा गीतायां स्वीकृतम्। अत्रेदमुल्लेख्यं रामानुजाचार्यः परिणामवादी। गौडीयवैष्णववादः भागवते प्रतिष्ठितः सन्नपि परिणामवादी। शङ्करदेवशङ्कराचार्ययोः अद्वैतवादमायावादौ सदृशौ। वस्तुतो शङ्करदेवस्य वैष्णवीयसम्बन्धतत्त्वे विवर्तपरिणामयोः सम्मिश्रणं दृश्यते, यत् खलु अधिकाधितया सत्कार्यवादसमम्। शङ्कराचार्यस्य निर्गुणब्रह्मधारणा, मायावादः, मोक्षधारणा, कर्मसन्न्यासयोगः, ज्ञानयोगश्चेत्यादिषु विषयेषु शङ्करदेवस्य सम्मतौ सत्यामपि श्रीधरस्वामिनः आदर्शेन प्रतिष्ठिते स्वीयधर्मे अद्वैतवादभक्तिवादयोः सम्मिश्रणात् विवर्तपरिणामयोः प्रतिच्छाया स्पष्टा।

**त्रयोदशतः–** भागवतस्य तृतीयस्कन्धं वामनपुराणं चानुसृत्य विरचितस्य अनादिपातनस्य सृष्टिप्रक्रियायां शङ्करदेवो भागवतपुराणस्य व्याख्यानुसारि सांख्यानुवर्तनं चक्रे। तत्र योगनिद्रां गते परमपुरुषे परमात्मनि ईश्वरे श्रीकृष्णे जीवात्मा पुरुषः अविद्यावशात् परमात्मानं नावगतवान् ततो भगवतः श्रीकृष्णस्यादेशेन महत् ततश्च साङ्ख्यानां चतुर्विंशतत्त्वानां सृष्टिरभूत्। तद्वर्णितसृष्टितत्त्वेन साकम् उपनिषदः सृष्टितत्त्वस्य सादृश्यं दृश्यते। शङ्करदेवो भागवतानुगामी सन्नपि तन्नये सृष्टिः प्रकृतिपुरुषात्मिका। तच्छिष्यस्य माधवदेवस्योक्तिरेव मानम्– "प्रकृतिपुरुषे दुयो नियन्ता माधव" इति। शङ्करदेवनये पुरुषो भगवतः अंशस्वरूपः माया च प्रकृतेरंशः।

**चतुर्दशतः–** शङ्करदेवप्रवर्तिते धर्मे योगदर्शनस्य प्रभावोऽपि परिलक्ष्यते। एवं श्रूयते यत् स भागवतानुरागात् प्राक् योगाभ्यासम् अकरोत्। अतस्तेन भक्तिरत्नाकरे तथा अनादिपातनग्रन्थे देहकेन्द्रिकयोगव्याख्या कृता। काये इडा, पिङ्गला, सुषुम्ना च मुख्या नाड्यः। मेरुमण्डलादिषड्चक्रसंयुक्तेऽनाहतचक्रे भगवतः श्रीकृष्णस्य अधिष्ठानम्। नाडीनां प्राणापाणादिदशविधा वायुप्रवाहाः जीववपुः सजीवं कुर्वन्ति।

**पञ्चदशतः–** शङ्करदेवप्रवर्तितः एकशरणनामधर्मो भागवतानुसारी। अतो तत्प्रवर्तितसम्प्रदाये राधाया अस्तित्वं तेन नाङ्गीक्रियते, यतो हि भागवतस्य रासपञ्चाध्याय्यां राधाया उल्लेखो नास्ति। ब्रह्मवैवर्तपुराणे स्वीकृता राधापि श्रीकृष्णस्य स्वकीया। किन्तु बृहद्गौतमीये, पद्मपुराणे, तथा गोविन्दलीलामृते च राधाया उल्लेखो दरीदृश्यते।

तथाहि पद्मपुराणे–

यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रिय तथा।
सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा॥ इति॥

यद्यपि शङ्करदेवेन तद्धर्मे राधाया उल्लेखो न कृतस्तथापि तत्प्रवर्तिते केलिगोपाल इति ग्रन्थे राधाया उल्लेखः प्राप्यते, नान्यत्र कुत्रापि–

निशम्य गर्वं गोविन्दो गोपीनां प्रेमवृद्धाय।
राधां विधाय हृदये तत्त्याज व्रजयोषितः॥ इति॥

बि.के.बडुयामहाभागेन तस्य History of Assamese Literature इति ग्रन्थे उक्तम् "It should however be noted that, unlike as in the vaishnavite literature of other provinces, Radha does not appear, nor does she find a place in the whole shankarite literature."

अतः उपर्युक्तान् पञ्चदश बिन्दून् पर्यालोच्य एतदेव वक्तुं शक्यते यत् शङ्करदेवप्रवर्तितः सम्प्रदायः शङ्कराचार्यस्य अद्वैतसम्प्रदायाद् एव उद्भूतः नवीनो वैष्णवसम्प्रदायः, यः खलु एकशरणधर्मनाम्ना अभिधीयते। नेदं केवलं सम्प्रदायरूपेण किन्तु प्रतिष्ठानरूपेण परिकल्पितं सत् समाजसंस्कारकं भवति। शङ्करदेवस्य सत्रप्रतिष्ठा एक उल्लेख्यः विषयः, यन्न केवलं देवगृहमात्रम् अपि तु आवासिकविद्यासत्रतया परिगण्यते, यत्र सत्राधिकारिणः न्यासिभ्यो वैष्णवशास्त्रपाठस्य संस्कृतग्रन्थस्य असमीयानुवादस्य मातृकानुलेखनस्य च प्रशिक्षणं ददति तदनु च विभिन्नप्रदेशेषु धर्मप्रचाराय तान् प्रेरयन्ति। परवर्तिनि काले नामघर इत्याख्यस्य कीर्तनगृहस्य व्यवहारो धर्मस्य शास्त्रालोचनस्य वा सीमाम् अतिक्रम्य समाजे दृश्यमानानां बहूनां प्रतिबन्धकानां राजनीतेर्वा अलोचनसत्रत्वेन परिगण्यते। एतेन स्पष्टम् अनुमीयते यत् तत्प्रवर्तितधर्मो हि तत्कालिकसमाजसंस्कारस्य वार्तावाहकः।

# सामाजिकदुष्कृतीनां निवारणार्थं मूल्यशिक्षायाः प्रयोजनम्

## एस.टि.पि.कनकवल्ली*

साम्प्रतं वयं सर्वेऽपि पाश्चात्त्यविचारधारया प्रभाविताः सन्तः स्वसम्प्रदायं विस्मृतवन्तः। स्वेच्छाचारिणो युवानः। सर्वत्र आङ्ग्लभाषायाः प्रभावः, परसंस्कृतेः व्यामोहश्च। औद्योगिकः शिक्षणक्रमः। आचार्येषु अनादरः, विद्यायामनासक्तिः, विद्यालये विना कारणं विरोधः, परिसरे दुर्वर्तनं, विना कारणं कक्षायाम् अनुपस्थितिः, अनुत्तीर्णतायां सत्याम् अध्यापके एव आरोपः, एतादृशा दुराचारा अपि दृश्यन्ते। स्त्रीपुंसोः बहुधा अनैतिकबन्धाः, अत्याचारादयः जायमानाः वर्तन्ते। तथा च अपघातादिषु प्राप्तापत्तेः जनस्य नास्ति साहाय्यम्। एवं च वयं शिक्षायां, प्रशासने, राजनीतिक्षेत्रे किं बहुना जीवनस्य सर्वस्मिन्नपि रङ्गे प्रतिदिनं प्रवर्धमानां मूल्यावनतिम् अवलोकयामः। अस्माकं नीतिनिर्धारकाः अधुना एनम् अंशं साक्षात्कुर्वन्तः अनुभवन्तश्च नितरां दूयन्ते। दूरदर्शनवार्तापत्रादिमाध्यमेन प्रसार्यमाणासु वार्तासु भ्रष्टाचारवार्ता एव प्रचुराः। आसामवलोकनेन इदमवश्यं स्फुटं भवति यत् साम्प्रतं देशे सर्वस्मिन्नपि रङ्गे औत्कर्षस्य, कर्मनिष्ठायाः, राष्ट्रियभावनायाः आवश्यकता च नितरां वरीवर्तीति। तथा च यूनां संरक्षणाय तेषां मूल्यशिक्षणम् अनिवार्यम्। शिक्षणं मूल्याधारितं भवेत् तदर्थं प्रप्रथमं मूल्यं नाम किं इति ज्ञातव्यम्।

## किं नाम मूल्यम्

मूल्यं नाम सद्गुणानां समूहः। यस्मिन् मानवीयाः धारणाः, विश्वासाः, मनोवृत्तयः, आस्थाः इत्यादीनां समुच्चयो विद्यते। मूल्यरहितस्य जनस्य सर्वत्रावहेलनं जायते तत् कुत्सितं जीवनं केनाऽपि सोढुम् असक्तः। अतः माघेन प्रोक्तम्–

मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति।
तस्याजननिरेवास्तु जननीक्लेशकारिणः॥

---

*स्वतन्त्रगवेषिका, valli.stp@gmail.com

परावज्ञायाः कारणं मूल्यमेव। मूल्यं इति पदम् आङ्ग्लभाषायां Value इत्युच्यते। तच्च पदं लैटिन् भाषायाः Valera इति शब्दात् निष्पन्नम् इत्युच्यते। अस्य अयमाशयः। वस्तुनः मूल्यं वस्तुनः गुणाधारितं भवति, यस्मिन् वस्तुनि अधिकगुणवत्ता अस्ति तस्य मूल्यम् अधिकं भवति। एवम् एव मानवीयव्यक्तित्वस्य निर्माणाय तदीयजीवनशैलीनां परिचयाय मनुष्याणां विचारमनोवृत्त्यासक्तिश्रद्धादिप्रणीतानि अनेकानि मूल्यानि भवन्ति, यत् बहुजनहिताय बहुजनसुखाय भवति तदेवाचरणीयमिति मूल्यमापनदण्डोऽस्ति। तदनुसारं स्वच्छता, दया, स्नेहः, निर्भयता, त्यागः, प्रियभाषणं, सत्यकथनं, सेवाभावः, पवित्रता, सहयोगः, अहिंसा इत्यादि सद्गुणाः जीवनशोभाकराः इति सन्दृश्यन्ते।

## मूल्योत्पत्तिः मूल्यविकासप्रक्रिया च

१. बाल्यावस्थायामेव मूल्यविकासप्रक्रिया बाले प्रारभ्यत इति शिक्षाविदः आमनन्ति। अस्यां प्रक्रियायां पितृणां पालनरीतिः नितरां प्राधान्यमावहति। मूल्योत्पत्तिप्रक्रियायां नैके स्वतन्त्रचराः अन्तर्भवन्ति ते अधो दृश्यन्ते–

i. गृहं परिवारश्च।
ii. येन समूहेन वा बालस्सम्बद्धः तस्य मूल्यव्यवस्था।
iii. समाजनायकस्य आदर्शपूर्णानि भाषणानि, तेषां सम्मानसमूहैः व्यवहारश्च।
iv. धार्मिकसंस्थाः, वृत्तिसम्बद्धसंस्थाः, सामाजिकप्रतिष्ठानानि च यत्र जनाः निवसन्ति, वर्धन्ते च।
v. सर्वस्तरीयशिक्षकैः स्वीयव्यवहारकर्तव्यनिर्वहणाद्युदाहरणैः उपदिश्यमाना आदर्शा विचारा वा।
vi. वैद्य-यन्त्रवेतृ-उद्यम्यादिभिः अनुपाल्यमानं वृत्तिगतं वृत्तम्।
vii. दूरदर्शन-आकाशवाणी-वार्तापत्रिकादिप्रसारसाधनैः प्रसार्यमाणा आदर्शाः।

इत्थम् आजीवनं दीयमानेन प्रशिक्षणेन अभिरुचिसिद्धान्तमूल्यानां शनैश्शनैरुत्पत्तिर्भवति बालके।

## मूल्यविकासप्रक्रिया

मूल्यविकासप्रक्रियायां प्रधानाः अवधारणाः इत्थं भवितुमर्हन्ति–

i. मूल्यानि वैयक्तिकसम्प्रत्ययाः, ताः जीवनपरिस्थितेः स्पष्टता द्वारा अधिगम्यन्ते।
ii. मूल्यानि वैयक्तिकसामाजिकव्यवहारस्य विकासं कुर्वन्ति।
iii. सामाजिकीकरणवैकासिकप्रक्रियाभ्यां द्वाभ्यां नैतिकमानवस्य विकासः सम्भवति–

- सामाजिकीकरणप्रक्रियायां मानवः स्वीयसंस्कृतेः वैशिष्ठ्यानि अधिगच्छति।
- वैकासिकप्रक्रियायां मानवः नैतिकविमर्शनेन स्वीयबुद्धिवैभवं वर्धयति।

## मूल्यवर्गीकरणम्

स्प्रेंजवर्येण मानवानामिमे षडाधारप्रकारा इत्थं सन्ति–

i. आदर्शपूर्णाः उत सिद्धान्तवादिनः येषां प्रधानं मूल्यं सत्यान्वेषणम्।
ii. आर्थिकव्यक्तेः मूल्यानि - येषां उपयोगिता निकषोपलो भवति।
iii. सौन्दर्याराधकः समरसतां प्रधानमूल्यत्वेन चिनुते।
iv. समाजवादी प्रेमसहानुभूतीनां प्राधान्यां कल्पयति। स इतरेषां विषये दयापूर्णतया व्यवहरति।
v. राजकीयनेता तु अधिकारस्य महत्त्वं कल्पयति। तस्य प्रधानदृष्टिरधिकारे, बलप्रदर्शने, स्वीयाधिकारविस्तरणे च भवति।
vi. आध्यात्मिकपुरुषस्य धार्मिकव्यक्तेर्वा ऐक्यं प्रधानमूल्यं स्यात्। स स्वीयधार्मिकदर्शनेन उच्चस्तरीयमूल्यानुभवानधिगन्तुं यतते।

तान्येव पुनः केचन इत्थमपि विभक्तः–

1. धार्मिकमूल्यानि
2. शैक्षिकमूल्यानि
3. नैतिकमूल्यानि
4. सामाजिकराजनैतिकमूल्यानि
5. जागतिकमूल्यानि
6. वैज्ञानिकमूल्यानि

7. सांस्कृतिकमूल्यानि
8. आध्यात्मिकमूल्यानि
9. पर्यावरणीयमूल्यानि

## अन्तिममूल्यानि साधनमूल्यानि च

अन्तिम-साधनमूल्ययोरुभयोर्मध्ये कार्यात्मकसम्बन्धो वरीवर्ति। वैयक्तिक-सामाजिकरूपेण अन्तिममूल्यानि द्विधा। अन्तिममूल्यानि आत्मकेन्द्रितानि समाजकेन्द्रितानि च। वैयक्तिकसामाजिकमूल्यानां प्राथम्यनिर्धारणप्रसङ्गे मानवाः विभिन्ना भवेयुः। तदनुसृत्यैव तेषाम् अभिवृत्तिव्यवहाराश्च नानाविधा भवन्ति।

सामाजिकनैतिकमूल्यानां वैयक्तिकसामर्थ्यमूल्यानाञ्च मध्ये पारस्परिकसम्बन्धो न भवतीति। सामाजिकमूल्यवान् कश्चन पुरुषः सामर्थ्यमूल्यान्यभिकाङ्क्षते, अन्यो वैयक्तिकमूल्यवान् मनुजः नैतिकमूल्यानां स्वीयजीवने प्राधान्यं दद्यात्। अयमंशः अधोरीत्या दर्शनीयो भवति–




## भारतीयदर्शने मूल्यवर्गीकरणम्

भारतीयाः मूल्यानि धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थेषु व्यभजन्। कुप्पुस्वामी (१९७२) अकथयत् यत् प्राचीनेषु एषु मूल्येषु आधुनिकमूल्यानि न संयुक्तानीति कथनमयुक्तमिति। प्राचीनसामाजिकमूल्यानीत्थं सन्ति–

1. धर्मः, कर्तव्यनिर्वहणम्।
2. भौतिकसुखसम्पदर्जनपराणि कार्याणि, अर्थः।
3. कामे तु स्वास्थ्यसौन्दर्यपुनस्सर्जनसुखसम्बद्धानि मूल्यान्यन्तर्भवन्ति।
4. आत्यन्तिकदुःखनिवृत्तिः परमात्मनः प्राप्तिश्च मोक्षः इत्यभिधीयते।

## मूल्यशिक्षायाः आवश्यकता

मूल्यशिक्षा बालकं सम्पूर्णकर्मनिष्ठं सम्पाद्य समाजे सुखमयसन्तोषपूर्णजीवनयापने सामर्थ्यं सम्पादयतीति तार्कुण्डे [Tarkunde, 1978] अभिप्रैति॥

स्वयं सहायकसामाजिक-नैतिककौशलानां पर्याप्तविकासेन बालकः पर्याप्तमात्मविश्वासं लभते तथा स समुदायेन अङ्गीक्रियते च। आत्मनि प्रकाशदर्शनं शिक्षायाः वास्तविकमुद्देश्यम्। स्वान्तर्निष्ठसत्यज्योतिषः प्रज्वलनेनैव विद्यालये प्राप्तं ज्ञानं विवेकत्वेन परिणमते। एतत्सम्पादनार्थं बालकेषु मानवमूल्यविकासो विधेयः मूल्यानां प्राथम्यं देयमित्येषाभिवृत्तिः जागरणीया, येन तदीयव्यवहारे गुणात्मकपरिवर्तनं स्यात्। शिक्षकोक्तानङ्गीकारे छात्राः न बिभ्येरन्। मूल्यशिक्षया जीवनस्य सामान्यसिद्धान्ताः मूलभूतलक्ष्याणि च अधिगम्यानि। मूल्यशिक्षणं शिक्षकाणामुत्तरदायित्वं मत्वा केचनविद्यालयाः तद्व्यवस्थां न कुर्वन्तो दृश्यन्ते।

## विद्यालये मूल्याधारितशिक्षा

विद्यालयीयक्रियासु मूल्याधारितशिक्षा निम्नप्रकारेण भवन्ति–

1. विद्यालयीय पाठ्यविषयेयु मूल्यानां समावेशः।
2. अप्रत्यक्षविधिः यथा– प्रार्थना, सामूहिकगीतानि, कथाकथनं, सामूहिकक्रियाः इत्यादयः।
3. प्रत्यक्षविधिः यथा– मूल्यानां महत्त्वविषयकव्याख्यानं, जीवनं तदनुसरणक्रमः इत्यादिकं कस्मिंश्चित् कालांशे पाठनम्।
4. पाठ्यसहगामिक्रियाणां माध्यमेन मूल्यानां विकासः। यथा– समाजसेवा, क्रीडा, श्रमदानं, उत्सवानामायोजनम्, N.C.C, Scouts & Guides

इत्यादिक्रियाभिः मूल्याधारितशिक्षा तथा बालकानां सर्वाङ्गीणविकासोऽपि कर्तुं शक्यते॥

## सारांशः

मानवसंस्कृतौ, समाजे, सामाजिकसंस्थासु च जनानां परस्परपारतन्त्र्यम् अभिलक्ष्य मूल्योत्पत्तिर्भवति। तेषां सामाजिकानुमतिरपेक्षिता भवति। मूल्यानाम् आधारस्तु सांस्कृतिकपृष्ठभूमौ, व्यक्तिगतानुभवेषु, मानवीयपारस्परिकान्तस्सम्बन्धेषु अस्माभिर्द्रष्टुं शक्यः। मूल्यानि स्थिराणि स्युः, प्रमाणरूपेण तान्यनुमन्येरन्, तानि सर्वाधिकमानवसन्तोषं जनयेयुः। समूहकृतदमनैः सह समञ्जनसम्पादने मूल्यानि व्यक्तेः अहंप्रत्ययविकासे, परिसरज्ञानवर्धने, स्वाभिज्ञाने च मनुजानुपकुर्वन्ति। व्यक्तेः मूल्यानि गृह-वर्ग-धर्म-संस्था-समूहाभिप्राय-विद्यालय-वार्ताप्रसारसाधनादि-विभिन्नकारकैः प्रभावितानि भवन्ति तथा सामाजिकदुष्कृतीनां निवारणार्थमुपकरोति। अतः मूल्यशिक्षा आवश्यकी।

# विष्णुपुराणे परिवेशभावना


## चिरञ्जित मण्डल*


परिवेश इति शब्दस्य व्युत्पत्त्यर्थः वेष्टनं परिवृत्तं वा। अस्माकं परिमण्डले नराः पशुपक्षिणः पतङ्गाः वृक्षाः जलं मृत्तिका ज्योतिर्वायुराकाशः समद्रा नद्यः पर्वता इत्यादयो ये केचित् चक्षुषा प्रत्यक्ष्यन्ते ते परिवेश इति नाम्नाभिधीयन्ते। वर्तमानप्रजन्मेऽयमतीव गुरुत्वपूर्णो बहुचर्चितो विषयः। जगतोऽत्यमूल्यानां चेतनाचेतनसम्पदां रक्षितुं परिवेशसुरक्षावश्यमेव कर्तव्या। “प्रकृतिः जनानां प्रयोजनसन्तुष्टौ दायबद्धा”– अस्या धारणाया वशवर्तिनो मनुष्याः सुदीर्घकालात् परिवेशं न केवलं निर्विचारं शोषयन्ति अपि तु तस्मात् सर्वाकाङ्क्षां पूरयन्ति। तदारभ्य परिवेशः क्रीतदासत्वेन परिणतः। प्रतिवादरूपेण अधुना सा मनुष्योपरि प्रत्याघातं करोति। फलतः भूकम्पनं जलप्लावनं घूर्णवातादिविपर्ययांश्च संसृज्य प्रकृतिः परिवेशस्य भारसाम्यं रक्षितुं चेष्टते। मनुष्यसृष्टैः प्रदूषणैः मनुष्याणामस्तित्त्वमेव सङ्कटे निमज्जितम्। एतस्मात् सङ्ककटात् तथा प्रकृतिविपर्ययात् मुक्तयेऽद्य समग्रजातीनां परिवेशरक्षणमवश्यमेव कर्तव्यमिति मतम्। यस्मात् समग्रविश्वे सुस्थिररूपेण वयं जीवनधारयितुं समर्था भविष्यामः। तस्मादेव विश्वपरिवेशरक्षणाय विश्वपरिवेशरक्षा-विश्वकङ्ग्रेसदर्शन इति द्वयोः संस्थयोर्यौथप्रचेष्टया परिवेशनीतिशास्त्रं निर्मीतम्। प्राचीनभारतीयशास्त्रेषु प्रधानतो विष्णुपुराणे प्रकृतिसचेतनत आधुनिककालस्य प्रकृतिभावनेव नासीत्। तत्काले प्रकृतिभावना धर्मीयभावनासमन्विता आसीत्। तत्र विविधा निर्देशा आसन्। विष्णुपुराणे सृष्टितत्त्वस्य वर्णनायां स्पष्टतया परिवेशभावना प्रतिफलिता। तत्र वर्णितं यत् सर्वे सजीवनिर्जीवाः विष्णोः समुद्भूताः। उक्तं यद्– “यतो यश्च स्वयं विश्वं स विष्णुः परमेश्वर एव” (विष्णुपुराणम्– १।१७।२२) इति। अपि च–

> देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः।
> रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम्॥ [वि.पु– १।१९।४७]

तत्राप्युल्लिखितं विष्णुरेव सूर्य-तारका-ग्रह-नक्षत्रमयं निखिलं जगत्–

> त्वं वेदास्त्वं तदंगानि त्वं यज्ञपुरुषो हरे।

---


*अतिथिप्राध्यापकः, संस्कृतविभागे, कांदडा-राधाकान्तकुण्डुमहाविद्यालयस्य

सूर्य्यादयो ग्रहास्तारा नक्षत्राण्यखिलं जगत्॥ [वि.पु– १।४।२३]

अतः सर्वमिदं जगद् विष्णुना संसृष्टम्। विष्णुभक्तिः तथा विष्णुं प्रति चानुगत्यमेव परिवेशरक्षायाः प्रधानं कारणम् आसीदिति प्रतीयते। परिवेशं प्रत्यश्रद्धायां कृतायां विष्णुं प्रत्यश्रद्धा कृतेति भावना मनुष्येषु सुप्रतिष्ठा।

विष्णुपुराणस्य मूलमन्त्रं– सर्वत्र समदर्शी भव, समभावेन च विष्णोरुपासना कर्तव्या अस्माभिः इति। देवमनुष्यादिप्राणिनो विष्णोरंशसम्भूतत्वेन तत्र वर्णिताः। यतो हि स्थावरजङ्गमात्मकं विश्वमात्मवद् द्रष्टव्यम् इत्येवं परामर्शं पुराणकारोऽस्मभ्यं प्रयच्छति। एवं भगवान् परमेश्वरो मनुष्योपरि प्रसन्नं भूत्वा सर्वक्लेशान्नाशयति–

देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः।
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम्॥
एतद्विजानता सर्वं जगत् स्थावरजङ्गमम्।
द्रष्टव्यमात्मवद्विष्णुर्यतोऽयं विश्वरूपधृक्॥
एवं ज्ञाते स भगवाननादिः परमेश्वरः।
प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसंक्षयः॥ इति। [वि.पु– १।१९।४७-४९]

तत्र चोक्तं स्वपुत्रवत् सर्वभूतानां मङ्गलकामनाय कार्यं कर्तव्यमस्माभिः–

यथात्मनि च पुत्रे च सर्वभूतेषु यस्तथा।
हितकामो हरिस्तेन सर्वदा नेष्यते सुखम्॥ [वि.पु– ३।८।१७]

स्वार्थं विसृज्य प्रकृति-परिवेशस्य संरक्षणं मनुजानाम् अवश्यं कर्तव्यम्। तत्रापि प्राणिहिंसा न समर्थिता। सा महापापाय परिकल्पिता। प्राणिहिंसायाः फलस्वरूपा पुराणवर्णिता भयङ्करनरकयन्त्रणा यथा वर्णिता तथा यो भ्रूणहत्याकारी गोघातकश्च स 'रोध' इति दुःसहनीयं नरकं गच्छति इत्यपि वर्णिता–

भ्रूणहा पुरहर्त्ता च गोघ्नश्च मुनिसत्तम।
यान्ति ते नरकं रोधं यश्चोच्छासनिरोधकः॥ [वि.पु– २।६।८]

तत्र प्राणिहननं पापरूपेण प्राणिरक्षणञ्च पुण्यकर्मत्वेन परिगणितम्। यः किञ्चिन्मात्रं जीवं न विनश्यति स एव भगवते विष्णवे सन्तोषितुं समर्थो भवति–

न ताडयन्ति न हन्ति प्राणिनोऽन्यांश्च देहिनः।
यो मनुष्यो मनुष्येन्द्रः तोष्यते तेन केशवः॥ [वि.पु– ३।८।१५]

अरण्यसम्पद् अत्यमूल्यसम्पत् परिवेशस्य। वास्तुव्यवस्थायाः भारसाम्यरक्षणाय अरणस्य गुरुत्वम् अपरिमितम्। नगरायणात् निर्विचारम् अरण्य-निधनयज्ञम् अधुना प्रचलति। फलतो विश्वोष्णायनो भूमिक्षयो प्लावनमतिवृष्टिरनावृष्ट्यादिविपर्ययः सम्भवति। एतस्माद् विपर्ययाद् मुक्तये समग्रविश्वे वनसुरक्षाविधिः प्रतिष्ठितः। समभावेन पुरा तथा विष्णुपुराणे वनसंरक्षणस्य विषये विविधः पन्थाः परिलक्षितः। तत्र वनच्छेदनं पापरूपेण वर्णितम्। सुष्पष्टमुक्तं तत्र– “असिपत्रवनं याति वनच्छेदी वृथैव यः” (विष्णुपुराणम्–२।६।२३)। अतो यो वृथा वनच्छेदनं करोति स ‘असिपत्रवन’ इति नामकं नरकं पतति। तत्र परिकल्पनायुक्तं वनच्छेदनं पापरूपेण न वर्णितम्।

नदी परिवेशस्य एका गुरुत्वपूर्णाङ्गा। मनुजसमाजे नद्याः व्यवहारमुपलक्ष्य वास्तुसंहतौ अस्याः भूमिकामभिलक्ष्य च वर्तमानप्रजन्मे प्रदूषणात् नदीरक्षणम् अस्माभिः कर्तव्यम्। मृतदेह-मलमूत्र-वर्ज्यपदार्थनिक्षेपाद् नदी क्रमेण प्रदूषिता, येन परिवेशस्यापूरणीया क्षतिः साधिता। विष्णुपुराणे नदी पुण्यपवित्रतायाः प्रतिमूर्तिरूपत्वेन चित्रिता। पुरा तस्याः किञ्चित् क्षतिसाधनमकल्पनीयं व्यापारम्। तत्रोक्तं– गङ्गा-शतद्रुविपाशादिनदीरवगाह्य सादरेण पितृलोकार्च्चनां कृत्वा सर्वविधेभ्यः पापेभ्यो विमुच्यते–

गङ्गाशतद्रुमयथा विपाशां सरस्वतीं नैमिषगोमतीं वा।
अत्रावगाह्यार्च्चनमादरेण कृत्वा पितृणां दुरितं निहन्ति॥ [वि.पु– ३।१४।१९]

एवं नदीर्देवभावेन स्थापयित्वा परिवेशरक्षायामेकं नवदिगन्तमुन्मोचितवन्त ऋषयः। अधुनेत्येवं भावना प्रासङ्गिकी वर्तते। विष्णुपुराणे यत्र तत्र मलमूत्रादिपरित्यागे निषेधोऽदृश्यत। जनाः परिवेशं निर्मलं स्वास्थ्यकरञ्च रक्षितुं प्रायतन्त सदा। तत्र एकत्र प्राप्यते–

न कृष्टे शस्य शस्यमध्ये वा गोव्रजे जनसंसदि।
न वर्त्मनि न नद्यादितीर्थेषु पुरुषर्षभ॥
नाप्सु नैवाम्भसस्तीरे न श्मशाने समाचरेत्।
उत्सर्गं वै पुरीषस्य मूत्रस्य च विसर्ज्जनम्॥ [वि.पु– ३।११।११-१२]

## विषयनिष्कर्षः

परिवेशगतभावना न केवलं पाश्चात्यचिन्तनप्रसूता, सा भावना पुराकालतः

प्राचीनशास्त्रसमूहेषु लिपिवद्धा। सृष्टेरालोचना प्रसङ्गे विष्णुपुराणे वर्णितं यत् सजीवनिर्जीवादयो यथा नराः पशुपक्षिणः सरीसृपाः पतङ्गोद्भिदः समुद्रा नद्यः पर्वता मृत्तिका जलं वायुराकाशो ग्रहनक्षत्राश्च विश्वसृष्टयो विष्णोर्परमसत्तायाः समुद्भूताः। सर्वं प्रत्यक्षीभूतं जगत् तस्य रूपभेदस्वरूपात् प्रकृति-परिवेशोऽस्माकं श्रद्धापात्रम्। अतो जीवजगतः तथा जडजगतः क्षतिसाधने न कस्यापि अधिकारः। अपि तु मानवैः कर्तव्यं सदा विश्वसृष्टिरक्षणम्। विष्णुं प्रति यथार्थश्रद्धाभक्तिश्च प्रकृतिरक्षयैव साधिता। विष्णुपुराणे तद्रक्षा पापपुण्ययोराधारत्वेन वर्णिता। परिवेशोपरि यथेच्छाचारे कृते मनुष्याः पापेनाबद्धाः भवन्ति, फलतः ते नरकं गच्छन्ति। अन्यच्च परिवेशरक्षणस्य फलरूपेण पुण्यम् अर्जयित्वा नराः स्वर्गलोकं गच्छन्ति। यतो हि पापात् ते बिभ्यति। पुण्यकर्मेषु मनुष्यानुद्बोधयितुं परिवेशरक्षाजनितः पुण्यफलोपदेशः विष्णुपुराणे उद्घोषितः। एतद्व्यतीतमपि परिवेशान्तर्गतानां वस्तुसमूहानामान्तसम्पर्कमभिमुखे विष्णुपुराणम् अस्माकं दृष्टिमाकर्षयति, परिवेशरक्षायै यन्मूल्यमपरिसीमं वर्तते। सर्वोपर्युल्लेखनीयञ्च यन्मानवानां मात्रातिरिक्तां भोगस्पृहां सीमितं रक्षितव्यं, सा भोगतृष्णा हि परिवेशध्वंसस्य मूलं कारणम्। अतो विष्णुपुराणे प्रतिष्ठिता परिवेशरक्षाविषयकचिन्ता प्रशंसायोग्या भावना इयञ्च आधुनिकपरिवेशस्य सङ्कटमोचने यथार्थरूपेण प्रासङ्गिकी वर्तते।